आरण्यकम्
अर्धवार्षिकं संस्कृतशोधपत्रम्

सितम्बर 2007/मार्च 2008
आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

संयुक्ताङ्कः

संस्कृतप्रसारपरिषद्
आरा (विहारः)

सितम्बर 2007
मार्च 2008

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
   (क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
   (ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना 'आरा' ( विहारः ) नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

## संयुक्ताङ्कः

वर्षाङ्कौ - चतुर्दश वर्षम्, द्वितीयाङ्कः
पञ्चदश वर्षम्, प्रथमाङ्कः

आश्विनः, वि.सं. २०६४ तथा च चैत्रः, वि.सं. २०६५

सितम्बर, २००७ तथा च मार्च, २००८

प्रतिवर्ष प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम् - २५ रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि

वार्षिकं शुल्कं ५० रूप्यकाणि

**परामर्शदात्री समितिः**

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

❀

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

❀

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी

❀

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

❀

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301

❀

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

समतायाः प्रशंसा सर्वत्र क्रियते, विषमतायाम् अश्रद्धा ऊह्यते। विश्वस्मिन् स्थानकालपात्रम् अविशिष्य समता राजताम्, तत्प्राप्त्युपायाश्च अन्वेष्टव्या इत्येतादृशो विमर्शः अधिपृथिवि प्रवर्तमानो दृश्यते। कैषा समता? कुत इयं प्रभवति? कुत्र तिष्ठति? कथं चाऽऽप्तव्या? इति जिज्ञासाशृङ्खला पुरत आयाति। समता समत्वं साम्यमिति 'समस्य भावः' इत्यस्मिन्नर्थे पर्यायभूताश्शब्दाः। समः कः? विषमाऽभावः समः। सम एव विषमं सूचयति। छन्दश्शास्त्रे सम-अर्धसम-विषमेति छन्दांसि प्रथन्ते। अर्थात्, विषमे सम्भाविते समस्य प्रवृत्तिः। संसारे प्रतिसृष्टि आकारदृष्ट्या विषमतैव परिलक्ष्यते। कोटिशो मनुष्येषु प्रतिजनम् आकृतिः भिद्यते। तथैव इतरेषु जङ्गमेषु स्थावरेष्वपि। कदाचित् पशुषु समाकृतिष्विव दृश्यमानतायां सत्यामपि तेषां परस्परं प्रकृतिवैषम्यं तु भवत्येव। समाकृती धेनू समकालं न प्रसुवाते, न च समपरिमाणं दुग्धं ददाते। एवम् अवश्यम्भाविनि नैसर्गिके वैषम्ये कीदृशी समता अपेक्ष्यते, कथं च साऽवाप्येत इति मौलिकः प्रश्नः समुदेति।

गीतायां श्रीभगवानुवाच-**'समत्वं योग उच्यते'** (२.४८) इति।

अत्र समत्वम् उद्देश्यं योगश्च विधेयः। एतस्य सिद्धान्तस्य उच्चमानता वेदादिशास्त्रैः पूर्वसूरिभिश्च असाध्यत, मया तु केवलम् एषः अनूद्यतेऽत्र न तु ऐदम्प्राथम्येन प्रथ्यते इति श्रीभगवत आशयोऽत्र ऊह्यः।

**'योगश्चित्तवृत्तिनिरोधः'** इति पतञ्जलिः योगसूत्रे। अतो गीतोक्तो योगसिद्धान्तः 'समत्वं चित्तवृत्तिनिरोधः' इति वाक्यान्तरे पर्यवस्यति। तत्रैव गीतायाः शिष्य अंशा एवं सन्ति-

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा.........॥** (२-४८) इति।

योगसूत्रस्थयोगपरिभाषामादाय गीतोक्तस्य श्लोकस्य आशयान्तरम् एवं विमर्ष्टुं शक्यते यत् यः योगस्थः सन् कर्माणि न कुरुते सः सङ्गं न त्यजति, सिद्ध्यसिद्ध्योश्च समो न भवति। योगस्थितिः सङ्गत्यागे यथा हेतुः भवितुमर्हति तथा सिद्धावसिद्धौ च समभावम् आदातुं सैव शक्ता अस्तीति तात्पर्यमत्र स्फुटं भवति। अन्ततः समभावं समत्वं वा 'योग'रूपेण उपन्यस्तुं प्राभवत् श्रीभगवान्।

उपर्युक्तं विवेचनमिदं बोधयति यत् योगो नाम कश्चित् अन्तर्गतो बोधः येन

चित्तस्य वृत्तिद्वयी निरुध्यते-एका सङ्गो नाम विषयेषु आसक्तिः, अपरा च सिद्धौ असिद्धौ असमता। एतां सहजतया लोकव्यवहारे दृश्यमानाम् असमताम् आशङ्क्य तां परिहर्तुं श्रीभगवान् अनेकश उपदिशति, तद्यथा–

**समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते।** (४.२२)

**समः शत्रौ च मित्रे च तथा मानाऽपमानयोः।**

**शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।।** (१२.१८)

**आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।**

**सुखं वा यदि वा दुःखं स योगी परमो मतः।।** (६.३२)

अर्थात्, मनुष्यः सिद्धौ सफलतायां वा, मित्रे सम्प्राप्ते, मानेऽधिगते, सुखे चाऽनुभूते यथा व्यवहरति तथा असिद्धौ सत्यां, शत्रौ समायाते, अपमानेऽधिगते दुःखे चाऽनुभूते तद्वैपरीत्येन व्यवहरति। तद्वत् शीते उष्णे च तस्य व्यवहारः प्रत्येकं भिद्यते। किञ्च, एष व्यवहारः अतीव सहजः, तदर्थं कुत्रचित् न किमपि प्रशिक्षणं प्रदीयते, न च तदर्थं कश्चित् उपदिशति। यथा कश्चिदितरप्राणी वृष्टौ आतपे वा स्वयमेव कञ्चित् आश्रयं काञ्चित् वृक्षच्छायां वा आश्रयितुं स्वतः यतते तथा मनुष्योऽपि। तथैव सुखसाधनेषु स्रक्चन्दनादिषु स्वत एव तस्य प्रवर्तनं लक्ष्यते। तथैव मानसवृत्तावपि यथा कल्पना तथा कञ्चित् विषयं जनं स्थलं वा प्रति द्वेषः अथवा आत्मीयता उत्पद्यते। तत्र तस्य विषयस्य वैशिष्ट्यं न हेतुः, अपि तु तादृशहानोपादानबुद्धये मानसकल्पना एव हेतुः भवति। तद्यथा उक्तं स्वप्नवासवदत्तनाटके महाकविना भासेन-

**प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।** (प्रथमोऽङ्कः)

तत्र यदि बौद्धिकप्रसङ्गे उभयोः विपरीतधर्मयोः कृते समाना बुद्धिः प्रवर्तते तर्हि सः समबुद्धिसम्पन्नो जनः भिन्न-भिन्नव्यवहारप्रवृत्तिधर्मणो चित्तस्य वृत्तिं निरुध्य समभावं सम्पादयति, तेन च वस्तुतो योगं संसाध्य संसारे विशिष्टताम् अधिरोहति। उक्तं च गीतायाम्–

**समबुद्धिर्विशिष्यते।** (६.९)

पक्षान्तरं च प्रस्तूयते गीतायाम्–

**समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।।** (९.२९)

अर्थात्, ईश्वरस्वरूपः विषयविशेषः सर्वेषां कृते समभावेन स्थितोऽपि केनचित् द्वेष्यतया केनचिच्च प्रियतया दृश्यते। यथा कस्यचित् आकृतिः वचनं व्यवहारः च तदितरेषां सर्वेषां कृते समानाः सन्तोऽपि भिन्नभिन्नग्राहकद्वारा भिन्नभिन्नतया स्वीक्रियन्ते,



कस्मैचित् सा आकृतिः सुन्दरी प्रतीयते, कस्मैचिच्च नैव सा रोचते। तद्वद् वचनव्यवहारादीनि समान्यपि बोद्धृसापेक्षतया भिद्यन्ते। श्रीमद्भागवते कंसराजप्रासादे स्वाग्रजेन सह रङ्गपीठं प्रविष्टस्य भगवतः कृष्णस्य चित्रमेवंरूपेण प्रस्तुतमस्ति–

**मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्**
**गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः।**
**मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां**
**वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः।।**

(श्रीमद्भागवतम् १०.४३.१७)

अत्र यद्यपि बालः कृष्णः अग्रजेन सह समभावेन प्रवर्तते, किन्तु तस्मिन् मल्लाः वज्रे इव घातकतां पश्यन्ति, तथैव स्त्रियः कामदेवम्, गोपाश्च स्वजनताम्, दुष्ट राजानः शासकविशेषम्, देवकीवसुदेवौ शिशुकृष्णम्, कंसश्च मृत्युम्, योगिनः परमं तत्त्वं परमात्मानं वा पश्यन्तः सन्ति इति तत्तद्बोद्धृगततत्तत्कल्पनासम्भूता भावाः समुत्पद्यन्ते, किञ्च अनन्तरं तदनुसारं भगवतः तत्तद्बोद्धृनुरूपं व्यवहारोऽपि प्रावर्तत, उक्तं च भगवता गीतायाम्–

**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।।** (४.११)

अतः यादृशी श्रीभगवतः समदृष्टिः तादृशी समदृष्टिः बोधदशायां भवितुम् अर्हति। दृश्यविषयाणां आकृतिषु समता शक्या नास्ति, तेषु द्वेष्यता प्रियता वा दर्शकस्य संकल्पात् उपजायते। एतेन कारणेन समभावं समुत्पादयितुं विद्यालयेषु विविधकार्यालयेषु आरक्षकेषु सैन्येषु वा तत्तद्गतबालादीनां गणवेशधारणं नियम्यते, समूहप्रार्थनासभा आयोज्यते, समूहभोजनशाला व्यवस्थाप्यते। तेषु तेषु प्रसङ्गेषु समाजस्य आर्थिक-सामाजिकादिवैषम्ये परिपालिता अपि जनाः समवेश-प्रार्थनादिप्रसङ्गैः दर्शकदृष्ट्या समतां भजन्ते। तेषु तत्तद्गतवैषम्ये स्थितेऽपि तान् प्रति द्वेष्यता प्रियता वा विशिष्टतया यथा नोत्पद्येत तदर्थं तेषां गणवेशादि आचरणीयम् इति कल्पना समाजे समभावसमुपासकानां मनसि आगता स्यात्। अतः दर्शके समत्वाख्यं योगं सम्पादयितुं तद्गतायाः चित्तवृत्तेः साङ्कर्यं निरोद्धुम् एते वेश-भोजनासनादिसाम्यं भौतिकरूपेण निरूप्यते। एतादृश्या दृष्ट्या दर्शकः सर्वत्र ईश्वरसत्ताम् अनुभवितुं सर्वान् समभावेन पश्येदित्यत्र आशयो विद्यते। तद्यथोक्तम् गीतायाम्–

**समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्।**

**न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्।।** (१३.२८)

एतादृशसमभावेन आत्मना आत्मनः हिंसनं प्रतिषिध्यते, ततश्च श्रेष्ठा गतिर्लभ्यत

इत्यत्र भावः। अर्थात् अन्तरङ्गतया समदृष्टेः अभावेन सर्वत्र विद्यमानोऽपि ईश्वरो न दृश्यते नानुभूयते वा, तेन च आत्मा एव आत्मनः शत्रुवत् आचरति, अन्तः भेदबुद्धेः प्रवेशात् सर्वदा च अन्तर्द्वन्द्वसद्भावात्। अतः समत्वबुद्ध्या न केवलं येषां कृते एषा बुद्धिः तेषां कल्याणं भवति, अपितु समत्वबुद्धिसम्पन्नस्य सर्वत्र समं पश्यतो वा जनस्याऽपि आत्मा स्वस्य हिंसको न भवतीत्यतः स्वस्याऽपि कल्याणं सम्पद्यते। अत एव समत्वम् एव योगः, तादृशे योगे स्थितेन सता कर्माणि करणीयानि इति **योगस्थः कुरु कर्माणि** इति पूर्वोल्लिखितस्य श्लोकस्याऽयं भावः ऊहितुं शक्यः।

**आरण्यकम्** इदं स्वप्रभवकालाद् आरम्य चतुर्दश वर्षाणि यावत् विविधेषु विषयेषु विविधैः जनैः संस्तुतेषु समीक्षितेषु च प्रसङ्गेषु समत्वबुद्ध्या प्रवर्तितुं यतमानम् अस्ति। न मे द्वेष्योऽस्ति न प्रियः इति वचनमुचितमपि एतदनुपालने सर्वेषां सामान्यानामिव आरण्यकस्य कष्टजातमपि अनस्वीकार्यमस्ति। द्वन्द्वाः मोहाश्च संसारे आकर्षणहेतवो भवन्ति। तत्र **ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः** (गीता ७.२८) इति परिपालयितुकामेनाऽनेन दृढव्रतेन भवितव्यमिति विचिन्तयताऽपि आरण्यकेन सर्वथा व्रते दार्ढ्यम् अनुसर्तुम् अवश्यं क्षमेण स्थीयते इति स्थैर्येण कथयितुमपि न प्रभवामः। तथापि अनाकाङ्क्षितेषु व्यवधानेषु आगतेष्वपि **आरण्यकम्** उपर्युक्तं धर्ममपरित्यज्य सुतरां प्रवर्तेत इति आकाङ्क्ष्य तदर्थं पाठक-लेखक-समीक्षकाणां विदुषां सौहार्दं च आशास्य विरम्यते।

**गोपबन्धुमिश्रः**
सम्पादकः
आरण्यकस्य



# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 1. शब्दार्थसम्बन्धविचारः | आचार्य रामयत्न शुक्लः<br>व्याकरणविभागाध्यक्षचरः<br>सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी | 1 |
| 2. संस्कृतस्य प्राच्यभाषा-वाङ्मये दशा दिशा च | प्रो. रमाशङ्कर मिश्रः<br>साहित्यविभागाध्यक्षः<br>सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी | 5 |
| 3. ईशाद्येकादशोपनिषत्स्व-लङ्कार सौन्दर्यम् | डॉ. शिवराम शर्मा<br>व्याख्याता, संगीतविभागः<br>काशी हिन्दू विश्वविद्यालयः, वाराणसी | 9 |
| 4. भर्तृहरेः स्फोटसिद्धान्तः | डॉ. श्रीमती कामिनी<br>482, से.3, पा.16, द्वारका-75, दिल्ली | 21 |
| 5. पाणिनीयव्याकरणे गिद्धा-सिद्धत्वविमर्शः | डॉ. हरिशङ्करमणि त्रिपाठी<br>संस्कृतशिक्षकः<br>ज्ञाननिकेतन, बेली रोड, पटना | 25 |
| 6. प्राचीनवाङ्मये मातृस्वरूपम् | डॉ. मञ्जू कुमारी<br>प्रवक्त्री, संस्कृतविभागः<br>आर्य महिलामहाविद्यालयः, वाराणसी | 29 |
| 7. आधुनिकसंस्कृतसाहित्ये कतिपयव्यक्तिनिष्ठ-काव्यानां परिचयः | डॉ. रवीन्द्र कुमार पण्डा<br>प्राध्यापकः, संस्कृतपालीप्राकृतविभागः<br>म.स.विश्वविद्यालयः, बडोदा | 35 |
| 8. वैदिकभाषायां स्वरोपयोगिता | सुधीर कुमार पाठकः<br>शोधच्छात्रः, संस्कृतविभागः<br>म.गा.काशी विद्यापीठम्, वाराणसी | 45 |
| 9. यज्ञोपवीतस्य कालविमर्शः | डॉ. नरेन्द्रदत्त तिवारी<br>प्रशिक्षकः, अ.सं.शिक्षणकेन्द्रम्<br>वेदविभागः, का.हि.वि.विद्यालयः, वाराणसी | 49 |

10. वाल्मीकिरामायणे कर्म-मीमांसा — डॉ. पूनम शर्मा, दर्शनशास्त्रविभागः, मगधमहिला कालेज, पटना — 57

11. मधुररसविमर्शः — प्रभाती मिश्रः, शोधच्छात्रा, संस्कृतविभागः, विश्वभारती, शान्तिनिकेतनम् — 61

12. उपमालङ्कारे चमत्कार-तत्त्वम् — लीना केसवानी, शोधच्छात्रा, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी — 67

13. नैषधीयचरिते कतिपयव्या-करणसिद्धान्तानां शब्दाना-ञ्च काव्यात्मकाः प्रयोगाः — कु. बिन्दुः, शोधच्छात्रा, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी — 71

14. प्रेमतत्त्वम् — डॉ. शरदिन्दुकुमार त्रिपाठी, व्याख्याता, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी — 77

15. ब्रह्मसूत्रशाङ्करभाष्यमङ्गला-चरणविमर्शः — डॉ. करुणानन्दमुखोपाध्यायः, व्याख्याता, संस्कृतविभागः, काशी हिन्दू विश्वविद्यालयः, वाराणसी — 81

16. आधुनिकसंस्कृतकवयित्र्यः — डॉ. उमा तिवारी, अध्यापिका, संस्कृतविभागः, महारानी बनारस महिला महाविद्यालयः, रामनगरम्, वाराणसी — 85

17. जयशेखरसूरिकृतजैन-कुमारसम्भवम् - समीक्षणम् — डॉ. नीलम रानी श्रीवास्तव, रीडर, संस्कृतविभागः, ए.पी.सेन.मेमो गर्ल्स पी.जी.कालेज, लखनऊ — 87



# शब्दार्थसम्बन्धविचारः

आचार्य रामयत्न शुक्लः

घटपदात् पटबोधवारणाय तत्पदजन्यशाब्दबोधम्प्रति तत्पदजन्यतद्विषयकोपस्थितिः कारणमिति कार्यकारणभावः स्वीक्रियते। ततश्च घटपदात् पटार्थोपस्थित्यभावेन घटपदात् पटबोधो न जायते। किन्त्वेवं सत्यपि एकसम्बन्धिज्ञानमुद्रया घट-पदादाकाशोपस्थित्या घटपदादाकाशशाब्दबोधः स्यादतः तत्पदजन्यतद्विषयकशाब्दबोधे तत्पदनिष्ठवृत्तिज्ञानाधीनतद्विषयकोपस्थितिः कारणमिति कार्यकारणभावान्तरं कल्प्यते। तथा च घटपदादाकाशोपस्थितेर्वृत्तिज्ञानाधीनत्वाभावेन घटपदादाकाशबोधो न जायते। उक्तकार्यकारणभावशरीरे घटकतया प्रविष्टा वृत्तिः केति जिज्ञासायां शक्तिर्लक्षणा व्यञ्जना च। तत्र शक्तिः कः पदार्थ इति प्रश्ने इच्छारूपा सा शक्तिः, तदाकारश्च, अस्मात्पदादयमर्थो बोद्धव्यः, इदम्पदमिममर्थं बोधयतु इति। प्रथमेच्छा अर्थविशेष्यिका द्वितीया पदविशेष्यिका। तन्निरूपणं यथा– प्रथमेच्छायाम् अर्थः प्रथमान्तम्, नैयायिकनये प्रथमान्तार्थमुख्यविशेष्यकबोधस्वीकारात् तस्याः मुख्यविशेष्यकत्वं तद्यथा पदादिति पञ्चम्यर्थः जन्यत्वं तस्य स्वरूपेण बोधेऽन्वयः। बोधस्य तव्यदर्थविषयतायां निरूपक-त्वसम्बन्धेनाऽन्वयः। विषयतायाः अर्थेऽन्वयः। तथा च इदमभिन्नपदजन्यबोध-विषयतावानयमर्थो भवतु, अस्यामिच्छायाम् अर्थस्य विशेष्यतया मानम्, इयमिच्छा अर्थविशेष्यिका जाता द्वितीयेच्छा पदविशेष्यिका तथा हि इदं पदमिममर्थं बोधयतु इत्याकारा सा। तत्र सविषयकार्थधातुसमभिव्याहारे कर्मप्रत्ययार्थो विषयतेति नियमेन अर्थमिति द्वितीयार्थो विषयता तस्याश्च निरूपकत्वसम्बन्धेन बुधधात्वर्थे बोधेऽन्वयः तस्य च णिजर्थजनकत्वेऽन्वयः जनकत्वस्य स्वरूपेण पदेऽन्वयः अतः सम्मेल्य इदमभिन्नार्थविषयकबोधजनकतावदभिन्नमिदं पदमिति बोधाकारः, तथा चास्यामिच्छायां पदविशेष्यकत्वं भासते। यद्यपि इच्छाया विषयत्वलक्षणः सम्बन्धो बोधे अर्थे पदे जनकतायाञ्च भासेत तथा सति वाच्यवाचकयोर्विवेको न स्यादतः इच्छायां बोधजनक-त्वेन यो विषयः तद्वाचकम् बोधविषयत्वेन विषयः स वाच्य इति नातिप्रसङ्गः।

नैयायिकमते उक्तम् इच्छाद्वयं शक्तित्वेन न स्वीकृतम्, तत्रोच्यते शक्तिग्राहकेषु व्यवहारः शिरोमणितया स्वीक्रियते। व्यवहारः प्रयोज्यप्रयोजकव्यवहारः। तथा हि प्रयोजकवृद्धेन (आज्ञापकवृद्धेन) घटमानयेत्युक्ते घटमानयन्तं प्रयोज्य (आज्ञाप्य)

वृद्धं बालो व्युत्पित्सुः पश्यति, ततश्च बालः अनुमिनोति-प्रयोज्यवृद्धस्य घटानयनप्रवृत्तिः ज्ञानपूर्विका प्रवृत्तित्वात् मदीयप्रवृत्तिवद् इत्यनुमानेन प्रवृत्तेर्ज्ञानपूर्वकत्वानुमानानन्तरं प्रयोज्यप्रवृत्तिजनकं ज्ञानं शब्दजन्यं शब्दानन्तर्भावित्वात्, यद्यदनन्तरं यद् भावि तत्तज्जन्यमिति नियमात् प्रयोज्यज्ञानं घटमानयेत्यादिशब्दोच्चारणानन्तरमेव अतस्तद् ज्ञानं शब्दजन्यमिति निश्चेतुं शक्यते। ततः आवापोद्वापाभ्याम् अन्वयव्यतिरेकेण पदादिषु पदार्थबोधजनकत्वं निर्धार्यते। तच्च वाक्ये पदे वा बोधजनकत्वं बोधकारणीभूत-पदवाक्ययोरर्थेन सह सम्बन्धाभावे नोपपद्यते, विषयेण सह सम्बद्धानामेव प्रमाणानां चक्षुरादीनां ज्ञानोत्पादकत्वदर्शनात्। न हि घटेन सह सम्बन्धं विनैव चक्षुरादि ज्ञानं जनयति। तथा च कारणत्वान्यथानुपपत्त्या कल्प्यमानः शक्तिरूपः कारणसम्बन्धः ज्ञानानुरूपकार्योत्पत्तेः प्रागेवापेक्ष्यते। तदानीं तस्य ईश्वरेच्छारूपस्य त्वदभिमतस्यासिद्ध-त्वेनासतश्च ज्ञातुमशक्यत्वेन ज्ञाताया एव शक्तेर्बोधकत्वेन तदसम्भव एव।

अयमभिप्रायः शाब्दबोधात् प्राक् तत्कारणीभूतशक्तिज्ञानमपेक्षितम्। इदानीं चास्य शक्तिज्ञानं न जातम्। तथा च उक्तरीत्या कार्यकारणभावे ज्ञानं प्रति शब्दस्य कारणत्वे सिद्धे कारणतावच्छेदकतया शक्तिरेव सम्बन्धतया कल्पनीया सा च उक्तेश्वरेच्छारूपा, सा जनकत्वघटितरूपेति जनकताया अवच्छेदिका जनकत्वघटितरूपा शक्तिरिति स्वस्य स्वावच्छेदकत्वस्वीकारे आत्माश्रयदोषः।

प्राचीनवैयाकरणैः इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा-

'**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथे**'ति रीत्या बोधजनकत्वं शक्तिरिति मन्यते। किन्तु अत्र स एव आत्माश्रयदोषः, जनकताया अवच्छेदकत्वेन जनकतायाः स्वीकारात्। तस्मात् पदपदार्थयोः सम्बन्धः नेच्छारूपः नापि बोधजनकत्वरूपः तयोः सम्बन्धत्वानुपपत्तेः। अनयोः द्विष्ठत्वाभावेन सम्बन्धत्वानुपपत्तेः। सम्बन्धो हि सम्बन्धि-भिन्नत्वे सति द्विष्ठत्वे सति विशिष्टबुद्धिनियामकः। न हि इच्छासम्बन्धेन पदविशिष्टोऽर्थः अर्थविशिष्टपदमिति व्यवहारः बोधजनकत्वस्य पदवृत्तित्वसम्भवेऽपि अर्थपदयोः रूपयोः बोधजनकत्वसम्बन्धेन वैशिष्ट्याभावात्। तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव वाच्यवाचकभावापरपर्याया शक्तिरिति कल्पनीयम्। सा च पदपदार्थयोरुभयोरपि वर्तते। तस्याः द्विष्ठत्वादिना सम्बन्धत्वम्। सम्बन्धत्वे एकसम्बन्धिज्ञानेनाऽपरस्मारकत्वमिति न्यायेन पदज्ञानेन पदार्थस्मृत्या समुचितशाब्दबोध इत्यादिरीत्या दोषाभावः।

तादृशसम्बन्धग्राहकं चेतरेतराध्यासरूपं तादात्म्यम्। तादात्म्यस्य पदनिष्ठशक्त्यु-पकारकत्वात् शक्तिरिति व्यवहारः, तस्य भेदाभेदघटितस्य तादात्म्यस्य शक्तित्वानुपपत्तेः। तदुक्तं पातञ्जले भाष्ये-



"**सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः योऽयं शब्दः सोऽर्थो योऽर्थः स शब्द**" इति। केचित् तादात्म्यस्यैव शक्तित्वमाहुः। तत्तु उपकार्योपकारकयोस्तादात्म्यम् आश्रित्येति वक्तुं शक्यते। मञ्जूषाकारस्तु तादात्म्यस्य शक्त्युपकारकत्वात् शक्तित्वमाह। तस्यापि पदनिष्ठशक्त्युपकारकत्वात् शक्तिरिति व्यवहारः तस्य सम्बन्धत्वाऽसम्भवात् भेदाभेदरूपस्य तस्य तत्त्वासम्भवात्। न चाऽभेदस्य सम्बन्धत्वं तत्राह तत्रैव अभेदस्यापि तत्त्वं खण्डयिष्यते सम्बन्धपदार्थघटकं सम्बन्धिभिन्नत्वाऽभावादिति।

कः शब्दः कोऽर्थः इति प्रश्ने अयं शब्दः घट इत्ययमर्थ इत्येकाकारोत्तर-दर्शनात्तयोरध्याससिद्धिः घट इत्याकारकं ज्ञानमिति व्यवहाराच्छब्दज्ञानयोरपि सा। अत एव पदं श्रुतं पदार्थं शृणु अर्थं वदति इत्यादिव्यवहारात् शब्दे अर्थे च समानरूपेण श्रवणधर्मताप्रतीतिः।

शब्दार्थयोरध्यासादेव वृद्धिरादैच् ओमित्येकाक्षरमिति शक्तिग्राहकश्रुतिस्मृत्योः सामानाधिकरण्येन प्रयोगः। तादात्म्यञ्च तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम्। न च भेदाऽभेदयोर्विरोधात् सामानाधिकरण्यानुपपत्तिः तत्राभेदस्याध्यस्तस्तया तयोरेकत्र कथनेऽविरोधात्। भेदाभेदघटिततादात्म्ये क्वचित् भेदस्योद्भूतत्वविवक्षा तेन अस्यार्थस्यायं वाचकः, उञः प्रगृह्यं तस्य वाचकः प्रणव इत्यादौ भेदनिबन्धना षष्ठी। अभेदस्योद्भूतत्वे प्रथमा यथा वृद्धिरादैच् ओमित्येकाक्षरमित्यादौ प्रथमा इत्यादिव्यवहाराः। अत एव अर्थं शृणु इत्यादौ अर्थे शब्दधर्मश्रवणकर्मत्वादिव्यवहारश्च। अत्यन्तभेदे अश्वपुरुषयोरिव तादात्म्यापत्तिः स्यात् अत्यन्ताभेदे घटे नाभेदव्यवहारः। अतः भेदाभेदघटितस्य तादात्म्यंस्वीकारे न काप्यनुपपत्तिः। अयं शक्तिरूपः सम्बन्धः तादात्म्यरूपः आदि-व्यवहारकृदीश्वरकृत एव संकेतरूपः वाच्येन सह वाचकस्य ईश्वरस्य स्थितमेवोच्यते। अस्यायमर्थ इत्यादिना यथा वा स्थितः पितापुत्रयोः सङ्केतेनावगम्यते, अयमस्य पिता अयमस्य पुत्रः। हरिरप्याह-

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।** (वा.प.3.3.29)
**सम्बन्धशब्दे सम्बन्धो योग्यताम्प्रति योग्यता।**
**समयाद् योग्यता संविन्मातापुत्रादियोगवत्।।** (वा.प.3.3.31)
**सति प्रत्ययहेतुत्वं सम्बन्ध उपपद्यते।**
**शब्दस्यार्थे यतस्तस्मात् सम्बन्धोऽस्तीति गम्यते।।**(वा.प.3.3.37)

इन्द्रियाणां चक्षुरादीनां स्वविषयेषु स्वविषयज्ञानेषु अनादिः पुरुषप्रयत्ननिरपेक्षा योग्यता, तथैव शब्दानामर्थैः साकम् अनादिर्योग्यता। दीक्षितमते बोधजनकतैव योग्यता

सैव शक्तिः मञ्जूषाकारमते बोधजनकतावच्छेदकीभूतो यो वाच्यवाचकभावापरपर्याय-शक्तिरूपः यः सम्बन्धः स एव योग्यता।

ननु शब्दार्थयोरभेदे अग्न्यादिशब्दोच्चारणे मुखदाहाद्यापत्तिः मधुशब्दोच्चारणे मधुधारणापत्तिरिति चेन्न अभेदस्यारोपितत्वेनोक्तदोषाभावात्।

वस्तुतस्तु बौद्ध एवार्थः शक्यः पदमपि बौद्धमेव शक्तम्, तयोरभेदः। न च बौद्धे दाहादिशक्तिरिति न दोषः।

ईश्वरसङ्केत एव शक्तिरिति न युक्तम्। अयमेतच्छक्यः इदमस्य वाचकमित्यादि सङ्केतस्यापि शक्तिविषयकत्वात्। अत्रोक्तशक्तिरूपसम्बन्धस्य ईश्वरकृतत्वे वाचस्पत्येऽप्युक्तः सर्गादिभुवां महर्षिदेवतादीनामीश्वरेण साक्षात्कृतः सङ्केतः तद्व्यवहाराद स्मदादीनामपि सुग्रहः सङ्केतः। स च शक्तिरूपः सम्बन्धः पदे वाक्ये च। तदाह न्यायभाष्यकारः समयज्ञानार्थं चेदं पदलक्षणायाः वाचोऽन्वाख्यानं व्याकरणम्, वाक्यलक्षणायाः वाचोऽर्थलक्षणम्, अनेन पदेष्विव वाक्येष्वपि ऐश्वरः सङ्केतः, वाक्यविषये समयग्राहकमाकाङ्क्षाद्यपि समयज्ञानार्थमित्यस्य सङ्केतज्ञानार्थं पदलक्षणायाः पदरूपायाः वाचः प्रकृतिप्रत्ययादिप्रदर्शनद्वारा बोधकं व्याकरणम्। वाक्यलक्षणायाः वाक्यरूपायाः अन्वाख्यानम् अर्थलक्षणम्, वाक्यार्थबोधकं शास्त्रं तर्कमीमांसादि इति साधूनामिति शेषो बोध्यः। अतः साधुशब्दानामेवार्थबोधकं व्याकरणादि। अतः तस्यैव साधुत्वम्।

सा च शक्तिः साधुष्विवापभ्रंशेष्वपि शक्तिग्राहकशिरोमणेर्व्यवहारस्य तुल्यत्वात्। अत एवोक्तम्-

**वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः।** (वा.प.3.3.30)

साधुभिर्भाषितव्यमित्युक्त्या साधुप्रयोगात् पुण्यम् असाधूच्चारणे वाचकत्वे पुण्यं नोपलभ्यते।

नैयायिकास्तु अपभ्रंशाः न वाचकाः साधुस्मरणद्वारा बोधकाः। तदेवाह-

**ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः।** (वा.प.1.156)

ननु व्यवहारदर्शनस्य कथं शक्तिग्राहकत्वम्, तद्बोधकशब्दाभावात्। इष्टसाधनत्व-ग्रहाभावे स्तनपाने बालानां प्रवृत्त्यनुपपत्तिरिति चेन्न तादृशव्यवहारदर्शनेन उद्बोधकद्वारा प्रवृत्त्युपपत्तेः। जीवनादृष्टस्योद्बोधकत्वस्वीकारेण प्रवृत्त्युत्पत्तेः च बालप्रवृत्त्युपपत्तेश्च। तस्मात् पदपदार्थसम्बन्धोऽनादिः अत एवोक्तम्-

**'सिद्धे शब्दार्थसम्बन्धे'** इति।



# संस्कृतस्य प्राच्यभाषावाङ्मये दशा दिशा च

**प्रो. रमाशङ्करमिश्रः**

संस्कृता संस्कारसम्पन्ना, वाचिक-गुणगुम्फिता, वाग्दोषविरहिता भाषा, संस्कृत-भाषा। सा हि वेदोत्तुङ्गश्खरादवरोहन्ती उपनिषत्-स्मृति-पुराण-रामायण-महाभारत-दृश्यकाव्यकाननेषु विहरन्ती उत्तरोत्तरं परमोत्कर्षोल्लासमालिङ्गन्ती विलसतितराम्। प्राकृत-पाल्यपभ्रंशादयो न जाने कियत्यो ज्ञाताज्ञाता भाषालतिका अस्याः संस्पर्शसौख्यमवाप्यैव कतिचित्कालं यावत् समुज्जृम्भन्ते स्म, परं मनागेव पार्थक्य-गर्वमाघ्राय तास्ताः संस्मृतिशेषतामवापुः। संस्कृता तु नित्यनूतनेव सौभाग्यरञ्जिता तरुणीव अद्यापि काव्यच्छविभ्रूभङ्ग्या सहृदयसरसलोकानावर्जयत्येव भृशम् इत्यहो विजयन्तेतरां संस्कृता-भामिनी-काटाक्षविलासाः।

अस्ति खलु महान् विभेदो वैदिकसंस्कृतसाहित्ये लौकिक-संस्कृतसाहित्यस्वरूपे च। वैदिकं साहित्यं नाम जनभाषा-साहित्यं, देववाङ्मयात्मकं साहित्यं, ग्राम्यसंस्कृतिमापन्नं साहित्यम्, किन्तु लौकिकं संस्कृतसाहित्यम् अभिजातवर्गीय-साहित्यिकभाषा-बद्धं साहित्यं, मानवीयं साहित्यं, नागरिकसंस्कृतिमापन्नं च साहित्यम्। वैदिकसाहित्यकाले आर्य-दस्यु-समाजस्वरूपद्वयी प्रवलायमानाऽऽसीत् यत्र विजेतृ-विजितयोरुत्कर्षापकर्षौ दृश्येते स्म। लौकिकं संस्कृतसाहित्यन्तु वर्णाश्रमव्यवस्था-पालकं पौराणिकं ब्राह्मणसमाजं समर्थयते स्म। उत्तरवैदिककालिकं साहित्यं न भावुकताधिक्यचुम्बितं, परन्तु चिन्तनार्चिश्चर्चितमासीत्। उपनिषत्साहित्यं नाम भावना-चिन्तनयोस्सामञ्जस्यं भजते। सूत्रसाहित्यं बुद्धिबलसंवलितं राजतेतराम्।

शनैश्शनैः पुरः पदमादधानं संस्कृतसाहित्यं रामायणस्य, महाभारतस्य, पुराणवाङ्मयस्य, यथाकालं प्राप्तोदयस्य लोकानुप्राणितस्य प्रेष्ठ-कथा-वितानस्य च मूलसम्पदा समृद्धं सत् सूत्रसाहित्यस्य गभीरचिन्तनमाणिक्यैराढ्यतां लभमानं मनुयाज्ञवल्क्यात्रि-पराशरादि-स्मृत्यनुमोदितं सामाजिक-दृष्टिकोणमालम्ब्यास्माकं समक्षं

सोल्लासं नरीनर्ति। पाणिनिनाऽपि व्याकरणसूत्रेषु 'लोक-वेद-भाषादि' पदविन्यासैः संस्कृतभाषाया वैदिकी लोकिकी च विच्छित्तिः पार्थक्यमापादिता। भगवान् पाणिनिरेव सर्वप्रथमो वैयाकरणशिरोमणिरासीत्, येन स्वकालिकी भाषा 'संस्कृता' कृता, वैज्ञानिकी प्रखरतरतर्कशतैरभेद्या च विहिता। अहो दाक्षीपुत्रेण सहस्रचतुष्टय-सम्मितसूत्रगुम्फितायाम्, 'अष्टाध्यायी'ति लघीयस्यां कृतौ संस्कृता भाषा अनुशासनसूत्रिता नियन्त्रिता च!

संस्कृतभाषा पाणिनिकालोत्तरवर्तिनि पर्याप्तकालावधौ उच्च-मध्यमाभिजातवर्ग-वल्लभा भाषाऽऽसीत्। ईसाब्दतः प्राक्तनकाले परवर्तिकाले च द्वादश-ख्रैताब्दकालं यावत् सेयं देवगवी राज्याश्रिता भाषा, सर्वजनाभिनन्दनीया, विदेशिजनप्रणम्या चासीत्। सामन्तानां, राजवंशजानां, कवीन्द्राणां, दर्शनकोविदानां विविधशास्त्रकाराणां च मनोरम्या सेयं भाषा द्वादशशती-परकालेऽपि राजाश्रयमालिङ्गन्ती सभ्यसमाजे रिङ्गन्ती न केवलं शिलालेखेषु, अभिलेखकदम्बकेषु, ताम्रपत्रकेषु, पट्टादिलेखेष्वेव च प्राप्तपदाऽऽसीत् प्रत्युत राजसभासु सदस्य-सङ्घेषु सादरं समुच्चार्यमाणापि समुल्ललास।

ख्रैस्ताब्दतः षट्शतकपूर्ववर्तिनोः रामायणमहाभारतयोरनन्तरकाले संस्कृतसाधकेषु प्रथमः श्रव्यकाव्यकर्ता अश्वघोष एव प्रातिनिध्यं संवहति, दृश्यकाव्यसाधकेषु च भास-शूद्रकौ प्रतिष्ठमापन्नौ दृश्येते। किन्तु रामायणाश्वघोषाभ्यां प्रागपि पाणिनिरचितानां जाम्बवतीविजय-पातालविजयादीनां काव्यानां चर्चा कर्णरसायनीभूता विराजत एव। विष्णुगुप्तापरनामानं चाणक्यं को न वेत्ति यस्य चाणक्यनीतिः कौटिल्यीयमर्थशास्त्रं च भारतभारतीध्वजमद्यापि समुत्तोलयतः।

कनिष्कोत्तरवर्त्तिषु साम्राज्येषु गुप्तसाम्राज्यं संस्कृतसाहित्योत्कर्षकरं सिद्धम्। गुप्तसाम्राज्यकाले कवीन्द्राः पण्डितमण्डलाखण्डलाः दार्शनिकनिकराः, शास्त्रकृतः कलाकाराश्च राजाश्रयं प्राप्य रचनाचातुर्री चारु चित्रितवन्तः। सूक्ष्ममेधया दार्शनिकाः, अप्रतिमप्रतिभया कविकुलकुञ्जराः, कार्यकौशलेन स्थपतयः चित्रणोत्कण्ठितकूर्चिकया चित्रकाराः, जटननैपुण्या मूर्तिकलाकाराश्च प्रचुरं पाटवं प्रदर्शितवन्तो नवनवरचना-सम्पदे। तदा तु पाटलिपुत्रनगरं विद्यानाम्, उज्जयिनी-नगरञ्च कलाकौशलानां प्रख्यातं केन्द्रमासीत्। आचार्य-राजशेखरेण खलु पाटलिपत्तनं शास्त्र-विद्यानाम्, उज्जयिनीनगरञ्च काव्यकलानां परीक्षा-समीक्षाकेन्द्रमिति वर्णितम्–



श्रूयते चोज्जयिन्यां काव्यकारपरीक्षा–

**इह कालिदासमेण्ठावत्रामर-रूपसूर-भारवयः।**
**हरिचन्द्रचन्द्रगुप्तौ परीक्षिताविह विशालायाम्।।**

श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा–

**अत्रोपवर्ष-वर्षाविह पाणिनिपिङ्गलाविह व्याडिः।**
**वररुचिपतञ्जली इह परीक्षिताः ख्यातिमुपजग्मुः।।**

(काव्यमीमांसायाम् 10 अ., पृष्ठे 55 तमे)

गुप्तकाल एव कालिदास-कुमारदास-वसुभूति- दिङ्नागयाज्ञवल्क्यादीनां मनीषिणां प्रकृष्टानां मेधानां दर्शनं जायते। गुप्तकालानन्तरं सर्वसमृद्धं शास्त्रवैभवोपेतं वर्धनसाम्राज्यं लोचनगोचरायते। वर्धनसम्राड्गणप्रतिष्ठापितं कान्यकुब्जनगरं बाणभट्ट-मयूर-मानतुङ्गेशानादीनां कवितल्लजानां समालम्बनभूतलं जातम्। यशोवर्मणस्साम्राज्ये भवभूति-वाक्पतिराजप्रभृतीनां कवीन्द्राणां काव्यभारती विजृम्भते स्म। तदनु गुर्जरराज्याश्रिताः भट्टि-माघ-हेमचन्द्रादयो जयन्ति, बंगीयसेनराज्यावलम्बिता जयदेव-रूपगोस्वामिजीवगोस्वामि-सनातनादयो विलसन्ति। को न वेत्ति संस्कृतभाषासाहित्योभय-परिष्कारकं सरस्वतीकण्ठाभरणशृङ्गारप्रकाशकर्तारं कविगण-परमोपकारकं धाराधराधीशं भोजदेवम्। मुञ्जभोजाभ्यामनुपालिता धनञ्जय-धनिक-पद्मगुप्तपरिमलादयः कवीन्द्राः शास्त्रचिन्तकाश्च ग्रन्थान् जग्रन्थुः।

भामहादिभिः काव्यशास्त्रिभिः कृत्रिमा भाषा विनिन्दता, काव्यभाषायाश्च प्रसादगुणगुम्फनकला प्रशंसिता। भामह-पूर्ववर्तिनी कृत्रिमा काव्यभाषा नाधिकं कालं यावत् प्राप्तप्रतिष्ठा तस्थौ। भामहदृष्ट्या सैव सर्वप्रिया काव्यभाषा भवितुमर्हति या प्रौढया समासान्तदीर्घ-पदावल्याऽऽलिङ्गिता न स्यात्, या च बालवृद्धनारीजनैरनायासमेव बोध्या स्याद्, या च माधुर्य्यगुणधुर्य्या स्यात्।

**माधुर्यमभिवाञ्छन्तः प्रसादञ्च सुमेधसः।**
**समासवन्ति भूयांसि न पदानि प्रयुञ्जते।।**
**केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि।**
**श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते।**
**आविद्वदङ्गना-बाल-प्रतीतार्थं प्रसादवत्।।**

(भामहकृते काव्यालङ्कारे 2/1-3)

भाषाचमत्काराय भामहेनैव स्वभावोक्ति-वक्रोक्ती अपि कवीन्द्रैरालम्बनीये निरूपिते, किन्तु शब्दालङ्कारापेक्षया अर्थालङ्कारा एव अर्थगाम्भीर्योपस्थापनाय कविभिः प्रयोज्या इति भामहाचार्या निजगदुः-

**सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।।**

अप्पयदीक्षितजयदेव-पर्वतीयविश्वेश्वरपाण्डेय-पण्डितराजजगन्नाथादयो हि अर्थालङ्कारानेव कविताकामिनी-हृदयहारान् प्रतिपादयामासुः। संक्षेपेण वक्तुं शक्यते यत् संस्कृतभाषा सुचिरन्तनकालादद्यावधि नित्यनूतना तारुण्यारूण्यवती रमणीया वधूरिव रचनाभ्रूभङ्गीभिर्विदग्धजनानाह्लादयन्ती विश्वविद्वज्जनहृदयतल्पविराजिता विराजते। भारतीयां संस्कृतिं गौरवमयीं प्राक्तनीं प्रतिष्ठां च परित्रातुं संस्कृतभाषा-रसास्वादनमेव शरणं नान्यत् किमपि-"नान्यः पन्था विद्यतेऽयनाय।"

**"भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा।"**



# ईशाद्येकादशोपनिषत्स्वलङ्कारसौन्दर्यम्

**डॉ.शिवराम शर्मा**

वेदार्थज्ञानाय व्याकरणादिषडङ्गानां ज्ञानमावश्यकमिति विदन्त्येव वेदविदो विद्वांसः। वेदाङ्गेष्वेतेषु अलङ्कारशास्त्रस्य परिगणनमनवलोक्य नैतद्विभावनीयं यदलङ्कार-शास्त्रमनावश्यकं वेदार्थपरिज्ञानायेति। यतो ह्याचार्यराजशेखरेण काव्यमीमांसायाम् "उपकारकत्वादलङ्कारः सप्तममङ्गम्" इत्युक्त्वालङ्कारशास्त्रस्य वेदोपकारिताङ्गता चाभ्युपगता। राजशेखरस्य नैतदलङ्कारशास्त्रस्य वेदाङ्गतास्थापनाभिनिवेशमात्रं, यतः सन्ति वेदेष्वनेकानि तथाभूतानि स्थलानि येषामलङ्कारशास्त्रज्ञानं विना यथार्थज्ञानं विवक्षितार्थज्ञानं वा कर्तुं न शक्यते, अतो वेदार्थज्ञानोपयोगित्वादलङ्कारशास्त्रस्य वेदाङ्गतायां नास्ति कश्चन सन्देहावसरः।

काव्यशास्त्रसाहित्यशास्त्रादिपदैरप्यभिधीयमानेऽस्मिन्नलङ्कारशास्त्रपदे समागतोऽ-लङ्कारशब्दो व्युत्पत्तिभेदाद् द्विधा प्रवर्तते। "अलङ्कृतिरलङ्कार"· इति भावव्युत्पत्त्या निष्पन्नोऽलङ्कारशब्दः समस्तस्य काव्यसौन्दर्यस्य "अलंक्रियतेऽनेनेत्यलङ्कार" इति करणव्युत्पत्त्या निष्पन्नोऽनुप्रासोपमादीनां शब्दार्थसौन्दर्याधायकत्वविशेषाणामभिधायको भवति।

ईशाद्येकादशोपनिषत्स्वलङ्कारसौन्दर्यानुसन्धानावसरे पूर्वोक्तस्योभयविधस्यालङ्कार-सौन्दर्यस्यानुसन्धानमौचित्यमावहति किन्त्वत्र शब्दार्थसौन्दर्यसम्पादकानामनुप्रासो-पमाद्यलङ्काराणामेव सौन्दर्यमेवोद्घाट्यते।

ब्रह्मविद्योपदेशप्रधानासूपनिषत्सु लोकवर्णनप्रधानेषु महाकाव्येष्विव बाहुल्येनालङ्कार-सन्निवेशो न सम्भाव्यते, किन्तु यत्रालङ्काराणां सन्निवेशो विलोक्यते तत्र सर्वत्र मन्त्राभिप्रेतार्थावबोधने तेषां साहाय्यमर्थसौन्दर्याधायकत्वञ्च प्रतीतिपथमायात्येव। अलङ्कारेषूपमारूपकातिशयोक्तिसाराद्यलङ्काराणामेवोदाहरणान्यत्रोपलभ्यन्ते। तत्रापि उपमारूपके एव विशेषतो दृश्येते।

## उपमा

उपनिषत्सु दार्शनिकसिद्धान्तान् बोधविषयतामानेतुमवलम्बितासूपमासु उपमानतया विभिन्नलौकिकपदार्था एवोपन्यस्ताः सन्ति। वृक्षाः, नद्यः, पृथिव्यादिपञ्च भूतानि,

सोपकरणो रथः, रथचक्रम्, अश्वादिपशवो विशेषतोऽत्रोपमानतामानीताः। अनेकाः सर्पोर्णनाभिप्रभृतयो जीवा अपि अत्रोपमानानि सन्ति।

**(i) (क) ऊर्णनाभिः –** तत्र पूर्वमूर्णनाभ्युपमानिकोपमा विलोक्यताम्– मुण्डकोपनिषदि ब्रह्मविद्याचार्यमङ्गिरसं शौनको मुनिः–"कस्मिन्नु खलु विज्ञाते सर्वमिदं विज्ञातं भवति" इति जिज्ञासितवान्। अङ्गिराः "परापराख्ये द्वे विद्ये वेदितव्ये" इत्याद्युपक्रम्य पराविद्यया ब्रह्मज्ञानं भवति, ज्ञाते च ब्रह्मणि सर्वमिदं विज्ञातं भवतीति व्याख्याय ब्रह्मणो भूतयोनित्वं ज्ञापयितुमूर्णनाभिनामानं कीटविशेषं भूमिं पुरुषञ्चोपमानतया परिकल्प्यार्थं बोधयामास। यथा–

**यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।**
**यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह विश्वम्।।** (मु.1-7)

अत्र प्रथमोपमया–"यथोर्णनाभिः स्वमुखतः पूर्वं तन्तून् सृजते पश्चाद् गृह्णते च तथैवाक्षरमिदं ब्रह्म संसारं जनयति प्रलये स्वात्मन्येव विलापयति" इति, द्वितीयोपमया–"यथा पृथिव्यामोषधयो जायन्ते तथैव जगद्रूपे ब्रह्मण्यपि संकल्पबीजानुसारं जीवास्तत्तच्छरीराणि लभन्त" इति, एवं तृतीयोपमया च–"यथा सतः अस्तित्ववतश्चेतनात् पुरुषात् विनाशीनि जडरूपाणि केशलोमानि जायन्ते तथैव क्षरणवर्जितात् परमात्मनो विश्वं, विलक्षणं प्राणिजातञ्च सम्भवति"–इत्युक्त्वा परब्रह्मस्वरूपं बोधविषयतामानीतम्। प्रथमोपमया तस्माज्जातत्वे सति तत्रैव लय उक्तः तेन च ब्रह्मणोऽखण्डनिमित्तोपादानकारणत्वमुक्तम्। द्वितीयोपमया–परमात्मनः संकल्पबीजानुसारं स्वात्माव्यतिरिक्ता जीवा जायन्त इति, बीजानुसारं यथौषधयो जायन्ते तथैव कर्मफलानुसारं शरीरोपलब्धिः भवतीति च प्रतिपादितम्। तृतीयोपमया च नित्यादनित्योत्पत्तिरुक्ता। इत्थमत्र उपमात्रयमाध्यमेन श्रुत्या परमात्मनो यत्स्वरूपमुदघाटि तत्तथा अन्यप्रकारेण बोधयितुं न शक्यते। अत्र प्रयुक्तेयं मालोपमा स्वकीयां वाक्यार्थालङ्कारतां स्फुटतयैव व्यनक्ति।

**(ख)** श्वेताश्वतरोपनिषद्यपि जगति मायान्तरितस्य ब्रह्मण उपमानत्वेन तन्तुनाभः प्रकल्पितः। यथा– **यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः स्वमावृणोत्। स नो दधाद् ब्रह्माप्ययम्।।** (श्वेताश्वतर 6-10)

"यथा तन्तुनाभ आत्मप्रभवैस्तन्तुभिरात्मानमेव संवृणोति तथैव यस्तन्तुतुल्यैर्नामरूपकर्मभिरात्मानमावृणोत् स नो ब्रह्माप्ययमात्मन्येकीभावं सर्ववृत्तिलयमादधातु"इति मन्त्रस्यास्य विवक्षितोऽर्थः। अत्रापि श्रुत्या तन्तुनाभोपमया ब्रह्मणो जगति वर्तमानत्वे सति मायातिरोहितत्वात्मकं स्वरूपं बोधितम्।उपमां विना नैष स्वरूपबोधः शक्यसम्भवः।



**(ii) चक्रारोपमा–**उपनिषत्सु चक्रारमुपमानत्वेन परिकल्प्य महर्षिभिर्बहवः सूक्ष्माः सिद्धान्ता व्याख्याताः। यथा–

(क) सर्वेषां जागतिकतत्त्वानां परमात्मनि सम्पृक्तत्वं निरूपयन्ती बृहदारण्यकश्रुतिराह – **स वा अयमात्मा सर्वेषा भूतानामधिपतिः सर्वेषां भूतानां राजा, तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वाणि भूतानि, सर्वे देवाः, सर्वे लोकाः, सर्वे प्राणाः, सर्व एत आत्मनः समर्पिताः।।** (बृहदारण्यक. 2-5-15)

अयं भावः – "यथा रथनाभौ रथनेमौ च समर्पिताः सर्वेऽराः चक्रानुसारं परिगच्छन्ति तथैव एतस्मिन्नात्मनि ब्रह्मादिस्तम्बपर्यन्तानि सर्वाणि भूतानि समर्पितानि सन्ति।" अत्रानेकेषामेकमूलत्वरूपं साधर्म्यं पुरस्कृत्य प्रवर्तितयानयोपमया श्रुत्यर्थः सरलीकृत्यावबोधयोग्यः कृतः।।

(ख) मुण्डकोपनिषद्यपि अरोपमानिकोपमालङ्कृता श्रुतिः विद्यते। यथा-
**अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमानः।**
**ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात्।।**
(मुण्डक. 2-2-6)

अत्र नाडीसम्बद्धहृदयस्य साम्यम् अरसम्बद्धरथचक्रेण सह प्रदर्श्य हृदयस्य नाडीसञ्चालनकेन्द्रत्वं निरूपितम्।

(ग) प्रश्नोपनिषदि रथनाभिग्रथितानामराणां साधर्म्येण श्रुतिः प्राणानां सर्वाश्रयत्वं न्यबोधयत्। यथा–

**अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्।**
**ऋचो यजूंषि सामानि यज्ञः क्षत्रं ब्रह्म च।।** (प्रश्नोपनिषत् 2-6)

अत्रापि वेदानां यज्ञक्षत्रियब्राह्मणानाञ्च प्राणे प्रतिष्ठां ज्ञापयितुं रथनाभिस्था अरा उपमानत्वेन कल्पिताः, ते च श्रुत्यर्थबोधने साहाय्यं कुर्वन्त्येव।

**(iii)** उपनिषत्सु मधुकरमक्षिका मधु चोपमानतया उपस्थाप्य महर्षिभिः गूढदार्शनिकसिद्धान्तानामुन्मीलनं कृतमस्ति। यथा–

(क) छान्दोग्य उद्दालकः स्वपुत्रं श्वेतकेतुं सुषुप्तिकाले जीवस्य मरणप्रलयावस्थां वर्णयन् कथयति–

**यथा सोम्य मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणां रसान् समवहारमेकतां रसं गमयन्ति।। ते तथा तत्र विवेकं न लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवं खलु सोम्येमाः प्रजाः सति**

सम्पद्य न विदुः सति सम्पद्यामह इति। (छन्दोग्य. 6-9-1-2)

अत्रेदं तात्पर्यम् - यथा मधुमक्षिकाभिः नानावृक्षेभ्यः समादृता एकत्र च संगृहीता रसा एकरूपतामुपेत्य कस्य वृक्षस्य रसोऽस्म्यहमिति विवेकं न लभन्ते तथैव इमाः प्रजा अहन्यहनि सुषुप्तिकाले, सति सम्पद्यापि सति सम्पद्यामहे इति न विजानन्ति। अत्र मधुरूपेण संगृहीतानां रसानां यथात्मविस्मृतिः तथैव सुषुप्तौ जीवानामात्म-विस्मृतिर्जायत इत्येवंप्रकारेण श्रुत्योपमया सिद्धान्तः बोधितः।

(ख) प्रश्नोपनिषदि भार्गवः शरीरे वर्तमानेष्वन्तःकरणेन्द्रियभूतेषु को वरिष्ठ ? इति जिज्ञासितवान्। तत्र पिप्पलादो मक्षिकामधुकरराजोपमया प्राणानां वरिष्ठतमत्वं निरधारयत्। यथा-

**सोऽभिमानादूर्ध्वमुत्क्रमत इव तस्मिन्नुत्क्रामत्यथेतरे सर्व एवोत्क्रामन्ते, तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रतिष्ठन्ते। तद्यथा मक्षिका मधुकरराजानमुत्क्रामन्तं सर्वा एवोत्क्रामन्ते, तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रतिष्ठन्त एवं वाङ्मनश्चक्षुः श्रोत्रं च, ते प्रीताः प्राणं स्तुवन्ति।।** (प्रश्न 2-4)

अत्र मधुकरराजमक्षिकाणामुपमानत्वं परिकल्प्य महर्षिणा न केवलं प्राणानां वरिष्ठता निर्णीता अपि तु शास्त्रज्ञानेन सह सूक्ष्मलोकज्ञानमपि प्रकाशितम्।

**(iv)** उपनिषत्सु सिद्धान्तप्रतिपादनाय सर्पा अन्ये च जन्तव उपमानतया वर्णिताः सन्ति। यथा-

(क) प्रश्नोपनिषदि सत्यकामेन महर्षिणा ओङ्कारेण परमपुरुषध्याता पुरुषः कतमं लोकं जयति? इति पृष्टः पिप्पलादः त्रिमात्रेणोङ्कारेण परमपुरुषध्यातृभिः जय्यान् लोकान् तेषां परमपुरुषेक्षणात् पूर्वं पापविनिर्मुक्तिं सर्पनिर्मुक्त्वगुपमया बोधयामास। यथा-

**यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नः। यथा पादोदरः त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते।** (प्रश्न. 5-5)

अत्र सर्पस्य त्वग्विनिर्मुक्तिरिव जीवस्य पापविनिर्मुक्तिरित्युपमयानया अनायासमेव पापविमुक्तिर्निरूपिता।

(ख) बृहदारण्यकेऽपि आत्मज्ञानिनो विनिर्मुक्तस्य शरीरस्य साम्यमहिनिर्म्मोकेण विधाय तस्य निरर्थकता प्रतिपादिता। यथा-

**यथाहिर्निल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽ-**



**थायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते ददामीति होवाच जनको वैदेहः।।** (बृहदारण्यक. 4-4-7)

अत्र शरीरस्योपमानतया वल्मीकस्थां सर्पनिर्ल्वयिनीं संस्थाप्य महर्षिणा प्राणवियुक्तस्य शरीरस्य निरर्थकता प्रतिपादिता।

(ग) तत्रैव शरीरं परित्यज्य अन्यच्छरीरं प्रति संक्रम्यमाणस्य जीवस्य संक्रमण-प्रकारं ज्ञापयितुं तृणजलायुकाख्यं कीटमुपमानत्वेन संस्थाप्य महर्षिः कथयति-

**तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रमाक्रम्यात्मानमुपसंहरत्येवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति।।** (बृह.4-4-3)

तृणजलायुका नाम तृणचारीकीटविशेषः स यथाश्रयभूतस्य तृणस्यान्तं गत्वा अन्यत्तृणमाश्रयतयावलम्बते पूर्वस्माच्चात्मानमुपसंहरति, एवमेव आत्मापि अविद्या-वशादन्यच्छरीरमाश्रित्य पूर्वस्माच्छरीरादात्मानमुपसंहरति। अत्र जीवस्य देहान्तरप्राप्तिं बोधयितुमुपकल्पिता तृणजलायुकोपमा विवक्षितार्थं सरलतयावगमयति।

**(v)** उपनिषत्सु पक्षिणोऽप्युमानतया कल्पिताः सन्ति।

(क) पक्षिण उपमानीकृत्य महर्षिः प्रश्नोपनिषदि कथयति-

**स यथा सोम वयांसि वासोवृक्षं संप्रतिष्ठन्ते एवं ह वैतत्सर्वं पर आत्मनि संप्रतिष्ठते।** (प्रश्न. 4-7)

यथा वयांसि नानादिग्देशेषु परिभ्रम्य सायंकाले स्वावासभूते वृक्षे संप्रतिष्ठन्ते तथैव सर्वमेतं भूतजातं मायाप्रपञ्चे परिभ्रम्यान्ते परे ब्रह्मणि संप्रतिष्ठते।

(ख) छान्दोग्ये प्राणाश्रितस्य मनसश्चाञ्चल्यं, दिशि-दिशि भ्रमणमन्याश्रयाभावात् पुनः प्राणाश्रयत्वञ्च ज्ञापयितुं सूत्रबद्धः शकुनिरुपमानत्वेन कल्पितोऽस्ति। यथा-

**स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपाश्रयते एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयते, प्राणबन्धनं हि सोम्य मन इति।** (छा. 6-8-2)

(ग) बृहदारण्यके नानायोनिषु परिभ्रम्य श्रान्तस्यान्ते च परमात्मनि लब्धविश्रामस्य पुरुषस्योपमानतया आकाशे परिभ्रम्य श्रान्तः नीडोन्मुखः श्येनखगः प्रकल्पितः। यथा-

**तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्यान्ताय धावति यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति।** (बृहदा.4-3-19)

(घ) तत्रैव पुरुषस्य जागरितस्वप्नावस्थयोः संचरणं ज्ञापयितुं नद्या उभयकूलसञ्चरणशीलो मर्त्य उपमानतयोपनिबद्धः। यथा–

**तद्यथा महामत्स्य उभे कूलेऽनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तं च बुद्धान्तं च।।** (बृहदा. 4-3-18)

**(vi)** उपनिषत्सु क्वचिदश्वानुपमानतया संस्थाप्यापि उपमा निबद्धाः सन्ति।

(क) श्वेताश्वतरोपनिषदि प्राणायामविधिनिरूपणावसरे महर्षिरिन्द्रियसंसक्तमनः धारणोपायं निरूपयन् दुष्टाश्वसंसक्तवाहमुपमानतया निर्दिशति। यथा–

**प्राणान् प्रपीड्येह संयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत।**
**दुष्टाश्वयुक्तमिव वाहमेनं विद्वान् मनो धारयेताप्रमत्तः।।**(श्वेताश्वतर.2-9)

अत्र प्रयुक्तस्य वाहशब्दस्य भगवत्पादैः शङ्कराचार्यैः यन्तेति अर्थः कृतः, किन्तु "मनः प्रग्रहमेव च" इति कठोपनिषद्युक्तत्वात् वाहपदेन प्रग्रहा एव धर्तव्याः।

(ख) कठोपनिषद्यपि अश्वमुपमानीकृत्योपमाद्वयं कल्पितमस्ति। यथा–

**यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा।**
**तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः।।** (कठ . 1-3-5)

अविज्ञानवतो विशुद्धबुद्धिरहितस्य तथा अयुक्तमनसा असमाहितमनसा सह वर्तमानस्य पुरुषस्य इन्द्रियाणि सारथेः दुष्टाश्वा इव अवश्यानि भवन्ति। अत्र अविज्ञानवत इति विशेषणस्य पुरुषपक्षे विशुद्धबुद्धिरहितस्येत्यर्थः. सारथिपक्षे च रथसञ्चालनज्ञानरहितस्येत्यर्थः कर्त्तव्यः। एवमेव अयुक्तेनेति पदं मनःपक्षे असमाहित-वाचकं प्रग्रहपक्षे च असम्बद्धवाचकं स्वीकृत्य आभ्यामन्वितमवश्यत्वं साधारणधर्मतया पुरस्कृत्योपनिबद्धेयमुपमा विवक्षितार्थप्रत्यायनेऽनुकूलतां कलयति।

तत्रैव वैपरीत्येन, विज्ञानवतः समाहितेन मनसा सह च वर्तमानस्य पुरुषस्य वश्येन्द्रियत्वं प्रतिपादयितुं सदश्वोपमापि वर्तते। यथा–

**यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।**
**तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः।।** (कठ . 1-3-6)

अत्रापि पूर्वोक्तप्रकारेण साधारणधर्मं परिकल्प्योपमासमन्वयः कर्तव्यः।

**(vii)** वृक्षानुपमानतयोपस्थाप्योपनिषत्सु नैका उपमा निबद्धाः सन्ति। श्वेताश्वतरे परमपुरुषः वृक्षेणोपमितः। यथा–

(क) **वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः तेनेदं पूर्णं पुरुषेण सर्वम्।**(श्वे.3-9)

अत्र स्वे महिमनि वर्तमानस्य आप्तकामस्य ब्रह्मणः स्वरूपं विज्ञापयितुं महर्षिणा स्तब्धो वृक्ष उपमानतया परिकल्पितः। लोभमोहादिदोषविवर्जितत्वं सदा



सन्तुष्टत्वं विषयेष्वनासक्तत्वञ्च साधर्म्यतया परिकल्प्य निबद्धयानयोपमया परमपुरुषस्य यथार्थस्वरूपं विज्ञातं भवति।

(ख) एवमेव बृहदारण्यकेऽपि–

**यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा।**
**तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः।।**
**त्वच एवास्य रुधिरं प्रस्यन्दित्वच उत्पटः।**
**तस्मात्तदातृण्णात् प्रैति रसो वृक्षादिवाहतात्।।** (बृहदा.6/9/1-2)

**(viii)** उपनिषत्सु क्वचित् सिद्धान्तं बोधयितुं नद्योऽपि उपमानतया कल्पिताः सन्ति।

(क) यथा प्रश्नोपनिषदि– **स यथेमा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रं प्राप्यास्तं गच्छन्ति भिद्येते तासां नामरूपे, एवं षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति।** (प्रश्न. 6-5)

अत्र–"समुद्रे लये सति यथा नदीनां नामरूपादि किमपि नावशिष्यते तथैव प्राणादिषोडशकलानां पुरुषे लये सति नामरूपादिकं नावशिष्यत" इत्युक्त्वा महर्षिः प्राणादीनां लयस्वरूपं व्याख्यातवान्।

(ख) मुण्डकेऽपि (3-2-8)

**यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय।**
**तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्।।**

अत्र नदीनां समुद्रे गमनमिव जीवस्य मुक्तौ सत्यां परमपुरुषोपगमनं भवतीत्युक्त्वा सारूप्यमुक्तिस्वरूपं विज्ञापितम्।

(ग) छान्दोग्येऽपि नद्युपमया अहन्तापूर्वकं जायमानाया मुक्तेः स्वरूपं वर्णितमस्ति। यथा–

**इमाः सोम्य नद्यः. . . समुद्रमेवापियन्ति. . . एवमेव सोम्येमाः प्रजा सत आगम्य न विदुः सत आगच्छामह इति।।** (छा.6-10-1,2)

**(ix)** तैलदुग्धदधिघृतादिद्रव्याण्यपि उपमानत्वेन विन्यस्य उपनिषत्सु रमणीया उपमा निबद्धाः सन्ति।

(क) यथा श्वेताश्वतरे ब्रह्मणो व्यापकतां तत्प्राप्त्युपायञ्च निर्दिशति महर्षिः–

**तिलेषु तैलं दधनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः।**
**एवमात्मात्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनुपश्यति।।** (1-15)

यथा निष्पिष्टेषु तिलेषु तैलं, निर्मथिते दधनि घृतम्, उपगतेषु स्रोतःसु जलम्,

घर्षितासु चारणीषु अग्निः लभ्यते तथैव वेदानुवचनेन निष्पिष्टे, व्रतेन मथिते, तपसा विशदीकृते अनाशकेन घर्षिते च प्रत्यगात्मनि तेनैव साधकेन तत्र स्थित एव परमात्मा उपलभ्यते। अत्र "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन व्रतेन तपसानाशकेन" इत्यस्य श्रुतिवचनस्य विवक्षितोऽर्थ उपमानचतुष्टयकल्पनेन सम्यगवज्ञातो भवति।

(ख) श्वेताश्वतर एव परमात्मनो जगद्व्याप्तिः क्षीरव्याप्तसर्पिषोपनीता। यथा–

**सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम्।**

**आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परम्।।** (श्वेताश्वतर. 1-1-16)

अत्र क्षीरसारभूतं घृतं यथा तस्य प्रतिपरमाणुव्याप्तं भवति तथैव जगत्सारभूतः परमात्मा सर्वव्यापी वर्तत इति बोधो जायते।

**(x)** अन्येऽपि विविधा लौकिकपदार्था उपनिषत्सु उपमानतया उदाहृता वर्तन्ते। यथा बृहदारण्यके–

(क) **यथाऽनः सुसमाहितमुत्सर्जद् यायादेवमेवायं शारीर आत्मा प्रज्ञानेनात्मनान्वारूढ उत्सर्जन् याति।** (4-3-35)

अत्र आत्मना अनः उपमितः, सशब्दगमनं साधारणधर्मः।

(खं) **यथा पेशस्करी पेशसो मात्रामुपादायान्यन्नवतरं कल्यांणतरं रूपं तनुत एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरं रूपं कुरुते।** (बृहदा. 4-4-4)

अयं भावः–यथा सुवर्णकारः पुरातनसुवर्णं नीत्वा तं परिशोध्य नवीनमाभूषणं करोति तथैवायमात्मा मृत्युकाले वर्तमानं शरीरं परित्यज्यान्यत् कल्याणतरं रूपं तनुते। इत्येवमत्रोपमयात्मनो देहान्तरप्राप्तिप्रकारः ज्ञापितः।

(ग) कठोपनिषदि परोपदेशे पण्डितानामविद्याग्रस्तानां साम्यम् अन्धेन नीयमानैरन्धैः सह प्रदर्शयन्ती श्रुतिः तेषामुपहासमिव करोति–

**अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः।**

**दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः।।**(क.1-2-5)

अत्रान्धेन नीयमाना अन्धा यथान्ते गर्ते पतन्ति, स नायकोऽपि पतति तथैवाविद्या-ग्रस्ताः पण्डितम्मन्याः स्वयं तु संसारे पतन्त्येव परानपि पातयन्तीति वाक्यार्थे अन्धद्वयसादृश्येन श्रुतिरविद्याग्रस्तानां स्वरूपं प्रकाशयति।

(घ) एका शाङ्र्गारिकी उपमापि बृहदारण्यके लभ्यते। यथा– **तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवायं पुरुषः प्राज्ञेनात्मना**



**सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्।** (बृहदा.4-3-21)

(ङ) उपनिषत्सु बहुत्र राजापि उपमानतामानीतो विलोक्यते। यथा–

**सम्राडेवाधिकृतान् विनियुङ्क्ते एतान् ग्रामानेतान् ग्रामानधितिष्ठस्वेति, एवमेवैष प्राण इतरान् प्राणान् पृथक् पृथगेव सन्निधत्ते।।** (प्रश्न. 3-4)

अयं भावः–यथा कोऽपि सम्राट् स्वाप्तपुरुषान् ग्रामाधिकारित्वेन नियुङ्क्ते तथैव प्राणोऽपि इतरान् प्राणान् सन्निधत्ते। श्रुत्या विवक्षितार्थप्रत्यायनाय कृत उपमाप्रयोगः कमपि वाक्यार्थसौन्दर्यं पुष्णात्येव।

## उपनिषत्सु रूपकालङ्कारसौन्दर्यम्

गूढसिद्धान्तानवबोधयितुं रूपकालङ्काराश्रयणमुपनिषत्सु बहुत्र विलोक्यते। अत्र पुरधनूरथनदीनक्रादिपदार्थानामारोपं विधाय महर्षिभिः ब्रह्मविद्योपदेशेऽपि काव्यनिर्विशेषः चमत्कारोऽभिव्यञ्जितः। तत्र साङ्गनिरङ्गपरम्परितव्यस्तसमस्तरूपकादिभेदानां प्रयोगोऽवलोक्यते।

(क) यथा कठोपनिषदि साङ्गपरम्परितरूपकं व्यस्तम्–

**आत्मानं रथिनं विद्धि शरीरं रथमेव च।**

**बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।।**

**इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान्।**

**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।** (कठ. 1/3/3-4)

अत्रात्मनि रथिनः, शरीरे रथस्य, बुद्धौ सारथेः, मनसि प्रग्रहस्य, इन्द्रियेषु हयानां, रूपरसादिविषयेषु च गोचराणामारोपं विधाय साङ्गपरम्परितरूपकालङ्कारप्रयोगो विहितः। व्यज्यमानसादृश्येन च विवक्षितार्थः स्पष्टतामानीतः।

(ख) तत्रैव समस्तरूपकमपि–

**विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।**

**सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्।।**(कठ.1/3/9)

(ग) श्वेताश्वतरे अरणिरूपकं व्यस्तं समस्तञ्च यथा–

**स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।**

**ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवत्।।**(श्वेताश्वतर.1-1-14)

(घ) मुण्डके यज्ञेषु अदृढप्लवानारोप्य तेषां पुनः पुनः जरामृत्युकारकत्वं निरूपितम्। यथा–

**प्लवा एते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म।**

**एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति।।**(1-2-7)

अत एव गीतायां "सर्वं ज्ञानप्लवेनैव वृजिनं सन्तरिष्यती"ति यज्ञात्मकप्लवस्यादृढत्वात् त्याज्यता ज्ञानप्लवस्य ग्राह्यता निर्दिष्टास्ति।

(ङ) श्वेताश्वतरेऽपि ओंकाररूपे ब्रह्मणि उडुपारोपं विधाय अयमेवार्थः प्रतिपादितः। यथा–

**त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा सन्निवेश्य।**
**ब्रह्मोडुपेन प्रतरेत विद्वान् स्रोतांसि सर्वाणि भयावहानि।।** (2-28)

(क) मुण्डकेऽतिरमणीयमेकं परम्परितरूपकं निबद्धमस्ति। यथा–

**धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासनानिशितं सन्धयीत।**
**अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्।।**(मु.2-2-4)

तत्रैव विश्वब्रह्मणि शरीरारोपं विधाय साङ्गं रूपकं परिकल्पितमस्ति। यथा–

(ख) **अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः।**
**वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा।।**
(मु.2-1-4)

(ग) कठोपनिषदि सर्वसंहर्तरि ब्रह्मणि भोक्तृत्वारोपोऽपि दर्शनीयोऽस्ति। यथा-

**यस्य ब्रह्म च क्षत्रञ्च उभे भवत ओदनः।**
**मृत्युर्यस्योपसेचनं क इत्थां वेद यत्र सः।।**

## उपनिषत्स्वतिशयोक्त्यलङ्कारप्रयोगाः–

काव्यशास्त्रेऽतिशयोक्त्यलङ्कारो लक्ष्यते। अस्य लक्षणमाचार्यमम्मटेनेत्थं कृतम्-

**निगीर्याध्यवसानं तु प्रकृतस्य परेण यत्। प्रस्तुतस्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम्। कार्यकारणयोर्यश्च पौर्वापर्यविपर्ययः।। विज्ञेयातिशयोक्तिः सा।।**
(का.प्र.100)

अर्थात् प्रकृतस्य परेणोपमानेन निगीर्य कवलीकृत्य यद् अध्यवसानम् आहार्याभेदनिश्चयः सा अतिशयोक्तिः। अयमस्याः प्रथमो भेदः। उपनिषत्सु अस्या अतिशयोक्तेः बहूनि रमणीयान्युदाहरणानि लभ्यन्ते। यथा–

**(i)** श्वेताश्वतरे मुण्डके च द्वा सुपर्णेति प्रसिद्धो मन्त्रः पठ्यते। सम्पूर्णमन्त्रस्त्वित्थं वर्तते–

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।।**

मन्त्रस्यास्य पक्षिद्वयवृत्तान्तरूपः वाच्यार्थः स्पष्टः किन्तु नात्र ब्रह्मविद्याप्रतिपादनपरायामुपनिषदि पक्षिवृत्तान्तः कश्चिद् विवक्षितो भवितुमर्हति। अतः प्रकरणवशाद्



बाधितमुख्यार्थेनानेन मन्त्रेण गौणीसाध्यावसानलक्षणया योऽर्थः प्रतीयते सः अतिशयोक्त्यलङ्काररूपतां भजते। लक्षणानुसारमत्र सुपर्णाभ्यामुपमानाभ्याम् उपमेयभूतयोः जीवात्मपरमात्मनोः, वृक्षेण शरीरस्य, एकेन भुज्यमानस्वादुपिप्पलेन सुखदुःखलक्षणस्य कर्मफलस्य अन्यस्याशनविमुखतया च परमात्मनो नित्यशुद्धबुद्धमुक्तस्वभावस्य निगरणं कृतमस्ति। इत्यमत्र काव्यशास्त्रे लक्षितोऽतिशयोक्त्यलङ्कारः स्फुटमेव सिद्ध्यति। पण्डितराजेन मन्त्रोऽयमतिशयोक्त्युदाहरणत्वेनोपन्यस्तो वर्तते।

**(ii)** श्वेताश्वतरे सांख्यदर्शनस्य मूलभूतो मन्त्रः पठ्यते। स च–

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।।**(4-5)

अत्रापि मूलप्रकृतिजीवात्मपरमात्मसम्बन्धः अजव्यवहारेणाध्यवस्य महर्षिणा वर्णितः। श्रुतिमन्त्रेऽस्मिन् न खलु कश्चिदजानां व्यवहारो वर्ण्यविषयतया स्थानमर्हति। वस्तुतोऽत्र अजया प्रकृतेः, लोहितशुक्लकृष्णविशेषणेन सत्त्वरजस्तमसां प्रथमेनाजेन जीवात्मनः, द्वितीयेन च परमात्मनः निगरणं विधाय अजानां व्यवहारेणाध्यवसितः प्रकृतिजीवपरमात्मनां व्यवहारो वर्णितः। अत्रापि अतिशयोक्तिः स्फुटैव।

**(iii)** श्वेताश्वतर एव नैकावयवस्य जगतः चक्रेण निगरणं विधाय मनोरमैकातिशयोक्तिरुपनिबद्धास्ति। यथा–

**तमेकनेमिं त्रिवृतं षोडशान्तं शताधारं विंशतिप्रत्यराभिः।**
**अष्टकैः षडभिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम्।।**

अत्र चक्रेण जगतः नेम्यादिभिश्चक्रावयवैश्च जागतिकपदार्थानामध्यवसानं विधाय महर्षिणातिशयोक्त्यलङ्कारमवलम्ब्य विवक्षितार्थः प्रतिपादितः। अत्र उपमेयानामुपमानानामध्यवसानप्रक्रियायाश्च व्याख्यानमतिविस्तारमपेक्षत इति न कृतं सुधीभिः स्वयमुन्नेयम्।

**(iv)** अग्रे तत्रैव सावयवस्य जगतः सावयवया नद्या अध्यवसानं विधाय अपराप्येकातिशयोक्तिरुपन्यस्तास्ति। यथा–

**पञ्चस्रोतोम्बुं पञ्चयोन्युग्रवक्रां**
**पञ्चप्राणोर्मिं पञ्चबुद्ध्यादिमूलाम्।**
**पञ्चावर्तां पञ्चदुःखौघवेगां**
**पञ्चाशद्भेदां पञ्चपर्वामधीमः।।** (1-5)

अत्रापि उपमेयभूतस्य संसारस्य विलक्षणनदीरूपेणोपमानेनाध्यवसानं विधाय वर्णनं कृतमस्ति। पञ्चस्रोतोम्बुना ज्ञानेन्द्रियसमवायस्य, पञ्चयोन्युग्रवक्रतया पञ्चभूत-

स्वभावस्य, पञ्चप्राणोर्मिं इत्यत्र रूपकमेव न त्वतिशयोक्तिः प्राणानां विषयाणामुपमेयानां वाच्यत्वात्, एवमेव पञ्चबुद्ध्यादिमूलामित्यत्रापि रूपकमेव बुद्धेरुक्तत्वात्। पञ्चावर्तैः शब्दादिपञ्चविषयाणाम्, पञ्चदुःखौघवेगामित्यत्र रूपकम् दुःखस्योपमेयस्योपात्तत्वात्। पञ्चपर्वभिः अविद्यादिपञ्चक्लेशानामध्यवसानं विधाय कृतेऽस्मिन् वर्णने रूपक-साङ्कर्यसमन्वितातिशयोक्तिः स्फुटैव।

## सारालङ्कारसौन्दर्यम्

काव्यशास्त्रे सारालङ्कारो व्याख्यातो वर्तते। लक्षणञ्च तस्य "उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः" अर्थादुत्तरोत्तरमधिकतया वर्णनीयस्योत्कर्षस्य चरमसीमागामित्वे सति सारालङ्कारः। राज्ये सारं वसुधेत्यादि श्लोकोऽस्योदाहरणम्। कठोपनिषदि सारालङ्कारसौन्दर्यमवलोक्यते। यथा –

**इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।**
**मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः।।**
**महतः परमव्यक्तमव्यक्तात् पुरुषः परः।**
**पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।।**

अत्र स्थूलेभ्य इन्दियेभ्य आरम्भ क्रमशः सूक्ष्मसूक्ष्मतरसूक्ष्मतमानां पुरुषपर्यन्तानां पदार्थानां निर्देशो वर्तते। एते पदार्थाः ज्ञानदृष्ट्योत्तरोत्तरमुत्कर्षवन्तो वर्तन्ते। अन्ते चोक्तं "सा काष्ठा सा परागतिः" सारालङ्कारलक्षणेऽप्युक्तमस्ति "परावधिः"। इत्यमत्र धाराधिरोहितया पर्यन्तभागे उत्कर्षविश्रान्तेः सारालङ्कारच्छटा स्फुटतयावभासते।

उपनिषत्सूक्तालङ्कारव्यतिरिक्ता अन्येऽपि विभावनाविशेषोक्त्यादयोऽलङ्कारा अन्वेष्टुं शक्यन्ते, किन्तु स्फुटप्रतीत्यभावात् सौन्दर्यविशेषासम्पादकत्वाच्च नैतै विचारिताः।



# भर्तृहरेः स्फोटसिद्धान्तः

**डॉ. श्रीमती कामिनी**

वाक्यपदीये उक्तम्–'नित्याः शब्दार्थसम्बन्धाः (वा.प.1/23) शब्दा नित्याः,अर्था नित्याः, तेषां मध्ये सम्बन्धा अपि नित्याः। अत्र शब्दपदेन शब्दतत्त्वाख्यं ब्रह्माभिप्रेतम्।

उच्चरितप्रध्वंसितत्वेऽपि न तस्यानित्यत्वमाकृतिनित्यत्वात्। शब्दः नित्यः अत्र नित्या शब्दाकृतिः इति तात्पर्यम्। गोशब्दः, घटशब्दः, वृक्षशब्दः इत्यादयः शब्दाकृतिः अपि च गौः गौरिति गोशब्दमात्रानुगता गोशब्दाकृतिः। आकृतिनित्यत्वादर्था अपि नित्याः पदादिव्यक्तीनां विनाशेऽपि तद्गतवृत्तिधर्मस्याविनष्टत्वात्। भाष्ये 'सिद्धे शब्दार्थसम्बन्धे' इति आधृत्य एव स्फोटस्वरूपनिरूपणं क्रियते।

'स्फुटत्यर्थोऽनेन सः स्फोटः' इति व्युत्पत्त्यार्थप्रकाशकः अयं शब्दतत्त्वधर्मः नित्यः आगमे सुप्रसिद्धः। स्फोटः नित्यत्वेन तु कालयोगादभिन्नकालः। अर्थात् कालभेदेन न भिद्यते तथापि स्वाभिव्यञ्जकध्वनिकालमनुपतत्येव। ध्वनियुक्तमेव स्फोटस्वरूपमुपलभ्यते अतएव ध्वन्युपलब्धिकालः स्फोटोपलब्धिकाल इव गृह्यते।

ध्वनिः स्फोटः च शब्दस्य द्वौ पृथक्पृथग् धर्मौ स्तः। तत्र तु स्फोटः अर्थप्रकाशको वाचकः प्रत्यायकः भवति, ध्वनिः तु तदभिव्यञ्जकः। स्फोटः ध्वनिना एव गृह्यते। भाष्ये उक्तम् –

**ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।**
**अल्पो महाँश्च केषांचिदुभयं तत्स्वभावतः।।**

महाभाष्ये अपि उक्तम्–'स्फोटः शब्दः, ध्वनिः शब्दगुणः'(महाभाष्य 1/1/9)

**स्फोटस्याभिन्नकालस्य ध्वनिकालानुपातिनः।**
**ग्रहणोपाधिभेदेन वृत्तिभेदं प्रचक्षते।।** (वा.प.1/75)

यावत् कालं ध्वनिः उपलभ्यते, तावत्कालं स्फोटः अपि इति स्फोटस्यापि वृत्तिभेदः प्रतीयते। स्फोटस्य नित्यत्वात् कालभेदाभावेऽपि प्राकृतध्वनेः मात्राकालः

स्फोटरूपशब्दस्य अस्ति इति, उपचारवशात् शब्दः आरोप्यते। परं स्फोटे शब्दे तु न कोऽपि कालभेदः भवति, शब्दस्य नित्यत्वात्–

**स्वभावभेदान्नित्यत्वे ह्रस्वदीर्घप्लुतादिषु।**

**प्राकृतस्य ध्वनेः कालः शब्दस्येत्युपचर्यते।।** (वा.प.1/76)

शब्दस्य यस्मिन्प्रथमक्षणे श्रवणं भवति तत्क्षणे तत्सम्बन्धिस्फोटोऽभिव्यज्यते। ध्वनेः श्रवणं चिरं, चिरतरं, चिरतमं वा कालं भवितुमर्हति। स्फोटाभिव्यक्तेरनन्तरं श्रूयमाणा वैकृता ध्वनयो द्रुतादिवृत्तीनां भेदं जनयन्ति। वैकृतध्वनीनां तु भेदाः न स्फोटभेदः। प्रकाशो यथा वर्त्यग्निसंयोगक्षण एव कक्षस्थं लघु महत् महत्तरं वा वस्तुरूपं प्रकाशयति, अनन्तरं च तद्रूपं तद्रूपेणैव अवस्थितं प्रदर्शयति, तथैव प्राकृतध्वनिभिरभिव्यक्तं स्फोटं वैकृतध्वनयोऽवतिष्ठमानं ग्राहयन्ति, न तु तस्य भेदं जनयन्ति। अतएव तपरसूत्रे भाष्ये – 'द्रुतायां तपरकरणे मध्यमविलम्बितयोरुसंख्यानं कालभेदात्' इति आक्षिप्य 'सिद्धं त्ववस्थिता वर्णाः, वक्तुश्चिराचिरवचनाद् वृत्तयो विशिष्यन्ते, भेर्य्याघातवत्' इति समाहितम्। कालभेदात् वर्णाः न भिनन्ति इति भाष्याशयः। स्फोटे वृत्तिभेदः मात्र उपचार एव–

**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदं तु वैकृताः।**

**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते।।** (वा.प.1/77)

अभिव्यक्तिवादिनां स्फोटाभिव्यक्तिप्रक्रियायाः सम्बन्धे मतत्रयम् अस्ति –

1. ध्वनिभिः इन्द्रियस्यैव संस्कारः क्रियते।
2. ध्वनिभिः शब्दस्यैव संस्कारः क्रियते।
3. ध्वनिभिः शब्देन्द्रिययोः उभयोः अपि संस्कारः क्रियते।

प्रथममतानुसारेण दृष्यन्तमुखेन व्याख्यायते। ध्वनिः श्रवणेन्द्रियं शब्दग्रहणायोद्बुद्धं करोति, न तु शब्दे कमपि विशेषं सम्पादयति। द्वितीयमतानुसारेण ध्वनिभिः शब्दप्रतिपत्तये श्रवणेन्द्रिये न कोऽपि विशेषः क्रियते, अपितु शब्दस्यैव ग्राह्यत्वशक्तिः समुद्बोध्यते। शब्दस्यैव संस्कारो ध्वनिभिः क्रियत इति द्वितीयप्रकाराभिप्रायः।

तृतीयमतानुसारेण चक्षुः तेजःसहकारेण रूपं गृह्णाति। तत्र रूपग्रहणे चक्षुः रूपं पदार्थं गत्वा गृह्णाति। चक्षुः रूपं प्राप्य तद्ग्रहणं करोति इति प्राप्यकारित्वपक्षः अप्राप्यैव करोति इति अप्राप्यकारित्वपक्षः। ध्वनिः विषयरूपशब्दं ग्रहणयोग्यं विधाय



श्रवणेन्द्रियं शब्दग्रहणाय प्रवर्तयति। ध्वनिभिः उभयोरपि संस्कारः क्रियते। न चक्षुः रूपं गृह्णाति, न च चक्षुषि प्राप्यकारित्वमस्ति। चक्षुः प्रकाशं गृह्णाति। प्रकाशस्तु स्वप्रसरणशक्त्या मूर्तिमति पदार्थे पतितः परावृत्य चक्षुषि पतति, प्रकाशितपदार्थस्य परावर्तनयोग्यतापरिमाणेन स च चक्षुःपटलान्ततः मस्तिष्कं नीयते। मस्तिष्केण च तस्य प्राप्यकारित्वाभावे रूपग्राहकत्वाभावेऽपि तेजसा विषयरूपस्य तद्ग्राहकस्य इन्द्रियस्योभयस्य अपि संस्कारः क्रियते–

**चक्षुषः प्राप्यकारित्वे तेजसा तु द्वयोरिति।**

**विषयेन्द्रिययोरिष्टः संस्कारः स ध्वनेः क्रमः।।** (वा.प.1/80)

ध्वनिग्रहणे मतत्रयं प्रदर्श्यते। ध्वनिः स्फोटात् अविभक्तरूपेण संसृष्ट एव स्फोटाभिव्यक्तौ गृह्यते। उदाहरणार्थं स्फटिकादौ संसृष्टपदार्थानां लौहित्याद्यप्रविभक्तं संसृष्टं गृह्यते, तथैव स्फोटे ध्वनिगुणाः संसृष्यः प्रतीयन्ते। स्फोटात् भिन्नप्रतीतिः तु न भवति अपितु ध्वनेः ऐक्यं प्रतीयते।

ध्वनिमसंवेद्यम् इच्छन्ति। इन्द्रियाणि विषयस्य उपलब्धिकाले इन्द्रियस्वरूपेण न गृह्यन्ते, अपितु विषयाकार एव विलीनानि विषयस्वरूपेण एव गृह्यन्ते, तेषां पृथक् संवेद्यता तु न भवति तस्मिन्नेव रूपेण स्फोटे ध्वनिः विलीने एव गृह्यते, तस्यापि पृथक् संवेद्यता न भवति।

स्फोटाभिव्यक्तौ ध्वनिः स्वतन्त्र एव। दूरात् श्रूयमाणे ध्वनौ स्फोटाभावेऽपि कोलाहलेन निनदेन ध्वनेः ग्रहणं भवति। स्फोटाभावेन स्फोटरूपाविभागेन ध्वनेः ग्रहणसम्भवम्। एवं च यत्र ध्वनिः एव गृह्यते न स्फोटः तत्र ध्वनेरसंवेद्यत्वमप्यसम्भवम्। तेन ध्वनिः स्वतन्त्र इति सिद्ध्यति। स्फोटाभावे स्वातन्त्र्येण ध्वनेर्ग्रहणं भवितुमर्हति, परन्तु स्फोटकाले तथा न भवति–

**स्फोटरूपाविभागेन ध्वनेर्ग्रहणमिष्यते।**

**कैश्चिद् ध्वनिरसंवेद्यः स्वतन्त्रोऽन्यैः प्रकल्पितः।।** (वा.प.1/81)

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

- स्थापनातिथिः 22.2.1987
- निबन्धनसंख्या 424/1994-95
- कार्यालयः संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (बिहारः) 802301
- आरण्यकम् (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- पञ्जीकरणसंख्या - RNI 58951/94
- संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः-

| | सम्मानवर्षम् |
|---|---|
| 1. पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. पण्डित सीताराम उपाध्यायः | 1989 |
| 4. पण्डित सभानाथ पाठकः | 1990 |
| 5. पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. पण्डित केदारनाथ शुक्लः | 1993 |
| 8. पण्डित जनार्दन मिश्रः | 1994 |
| 9. पण्डित रामनरेश त्रिपाठीः | 1995 |
| 10. पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. पण्डित रामप्रवेश त्रिपाठीः | 1996 |
| 12. पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. पण्डित अम्बिकादत्त त्रिपाठी 'व्यास' | 1998 |
| 14. पण्डित डॉ. श्यामानन्द झा | 1999 |
| 15. पण्डित वज्रभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. पण्डित जयानन्द मिश्रः | 2001 |
| 18. पण्डित वृन्दावन त्रिपाठी | 2003 |

- प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरः सरं पुरस्कार-प्रमाणपत्रादिवितरणम्।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम् (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम्।

❖



# पाणिनीयव्याकरणे सिद्धासिद्धत्वविमर्शः

डॉ. हरिशंकर मणि त्रिपाठी

घटितबुद्धौ घटकज्ञानस्य कारणत्वमिति नियमात् शोधविषयघटके सिद्धासिद्धत्वे अवश्यं विवेचनीये। तस्मात् इदानीं सिद्धासिद्धत्वपदार्थौ विवेच्यमानौ स्तः। षिध् धातुः अनेकार्थकः अनेकगणपठितश्च। तथापि विवक्षितार्थवशात् अत्र गत्यर्थको निष्पत्त्यर्थको वा। तत्र गत्यर्थकत्वे सकर्मकत्वात् कर्मणि क्त इति। निष्पत्त्यर्थकत्वे कर्त्रर्थे क्त इति। तथा च आद्ये सिद्धमित्यस्य ज्ञानविषयीभूतमर्थः गतेः ज्ञानरूपत्वात्। यो हि सिद्धो भवति स एव ज्ञानविषयी भवति। अन्यथा शशशृङ्गादेः असिद्धस्य व्यवहारनिबन्धनज्ञानविषयत्वात्। ज्ञानविषयीभूतमर्थमादायैव सर्वव्यवहारप्रवृत्तेः, तद् विषयकव्यवहारं प्रति तद्विषयकज्ञानस्य हेतुत्वाच्च। अत एव तर्कसंग्रहे उक्तम् – "सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञान"मिति[1] शास्त्रेऽपि अध्ययनादिक्रियाजन्यज्ञानविषयीभूतं सूत्रादिकं लक्ष्यसाधनाय प्रवर्तते। यच्च न ज्ञानविषयीभवति तेन लक्ष्यसंस्कारो न भवितुमर्हति। तस्मात् सिद्धमित्यस्य ज्ञानविषयीभूतमर्थः। तच्च ज्ञानं प्रमात्मकं भ्रमात्मकं वेति अन्यदेतत्। अतएव अतिदेशशास्त्राणां न वैयर्थ्यापत्तिः।

अन्यथा "रामाय" इत्यत्र यादेशे वस्तुतः सुप्त्वज्ञानाभावात् शास्त्रातिदेशपक्षे दीर्घादिशास्त्राणामप्रवृत्त्यापत्तिः। तेषां धर्माणां शास्त्राणाञ्च प्रमात्मकज्ञानविषयत्वाभावात्। प्राप्त्यर्थकत्वञ्च फलतः ज्ञानार्थकत्वाभिन्नमेव संराद्धिरूपनिष्पत्त्यर्थकत्वे तु षिध् धातुर्दैवादिकोऽकर्मकः। ततः कर्तरि क्त इति। तस्य निष्पन्नत्वमर्थः। निष्पन्नत्वं नाम अतीतकालोत्पत्तिकत्वम्।

न च वेदान्तप्रतिपाद्ये सिद्धे आत्मनि उक्तलक्षणस्य सिद्धत्वानुपपत्तिः। आत्मनः उत्पत्तेरभावादिति वाच्यम्। कार्यद्रव्यस्यैव लक्षणत्वात्। यद्वा स्वोत्पत्यर्थे साधनापेक्षत्वमेव सिद्धत्व वाच्यम्। तथा च न कश्चन दोषः।

महाभाष्यकारस्तु –"सिद्धे शब्दार्थसम्बन्धे" इति वार्तिकविवरणावसरे

सिद्धशब्दार्थमादाय बहु चर्चितवान्। "अथ सिद्धशब्दस्य कः पदार्थः इत्यादिना नित्यपर्यायवाची सिद्धशब्दः। कथं ज्ञायते। यत्कूटस्थेष्वविचालिषु भावेषु वर्तते। तद्यथा – सिद्धा द्यौः सिद्धा पृथिवी, सिद्धमाकाशमिति।[2] कूटम् अयोघनः तद्वत् तिष्ठन्ति ये ते कूटस्थाः, संसर्गिनाशेऽपि स्वयमनष्टः अविनाशिनः इत्यर्थः। अविचालिनः देशान्तरप्राप्तिरहिताः। तथा च द्यावापृथिव्यादीनां नित्यत्वेन तेषु सिद्धप्रयोगात् नित्यपदार्थकं सिद्धशब्दं भाष्यकारो मन्यते। तदनन्तरे च क्रियानिष्पन्नेऽर्थे अनित्येऽपि सिद्धशब्दप्रयोगं दृष्ट्वा नित्यपर्यायवाचित्वमाशङ्कते। तथा हि "ननु च भोः कार्येष्वपि वर्तते। तद्यथा सिद्धः ओदनः सिद्धः सूपः सिद्धा यवागूरिति, यावता कार्येष्वपि वर्तते। तत्र कुत एतन्नित्यपर्यायवाचिनो ग्रहणम्, न च पुनः कार्ये यः सिद्ध शब्दः।[3] तदनु च किं पुनरनेन वर्ण्येन ? किं न महता कण्ठेन नित्यशब्द एवोपात्तः यस्मिन्नुपादीयमानेऽसन्देहः स्यात्।

मङ्गलार्थम्। माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते[4] इत्यादि भाष्यकारः उक्तवान्। तदनेन प्रघट्टकेन सिद्धशब्दः नित्येषु भावेषु अनित्येषु भावेषु च प्रवर्तमानः नित्यानित्यत्वोभयार्थकः ज्ञानविषयीभूतार्थकश्चेति प्रतीयते।

यद्वा द्वितीयार्थस्यापि संग्रहोऽत्र बोध्यः तस्यापि ज्ञानविषयत्वात्। क्वचिच्च भ्रमविषयीभूतत्वरूपं सिद्धत्वमादाय शास्त्राणां प्रवृत्तिः। यथा – 'रामाय' इत्यादि। अत्र हि सुप्त्वरूपनिमित्ताभावेन शास्त्रातिदेशपक्षे "सुपि च" इति शब्दसंस्काराय ज्ञानविषयीभूतं न भवति। अत एव तत्प्रवृत्तेः स्थानिवत्सूत्रं सुप्त्वमतिदिशति। तथा च अयमतिदेशो न प्रमारूपः अपि च भ्रमरूप एव। एवञ्च भ्रमविषयीभूतं सुप्त्वनिमित्तकं सुपि च इति सूत्रसिद्धमिव दीर्घकार्यं विदधाति।

ननु भ्रमात्मकज्ञानस्य प्रवर्तकत्वे प्रवृत्तेः अप्रामाण्यानापत्तिः इति चेन्न। तत्तदतिदेशशास्त्रसामर्थ्यात् तथा प्रवृत्तेः प्रामाण्योपपत्तेः। नागेशस्तु सिद्धपदार्थनिर्वचनं कुर्वाणः सिद्धं निष्पन्नम्[5] इत्याह तदेतदपि ज्ञानविषयत्वरूपसिद्धत्वविरोधि न भवितुमर्हति। प्रवृत्तमित्युक्त्या प्रवृत्तिजनकस्यापि स्वीकारात् ज्ञानं विना प्रवृत्तेरनुपपत्तेः। पूर्वं शास्त्रं ज्ञानविषयी भवति। तदनन्तरं च प्रवर्तते इत्येव क्रमिकः पन्थाः।

**पदमञ्जरीकारोऽपि –** सिद्धशब्दस्य निष्पत्त्यर्थकत्वमाह – तथा चोक्तम्। तेन सिद्धः निष्पन्न[6] इति।



**न्यासकारोऽपि –** अमुमेवार्थमाह – सिद्धशब्दः निष्पन्नवचनः सिद्धं - निष्पन्नमित्यिर्थः। परञ्च शास्त्रं यच्च निष्पन्नं तत्र शक्यं वचनशतेनाप्यनिष्पन्न-सत्तायामापादयितुम्। यथा न कश्चिद् दुःखविवशां दशामनुभवेत्[7] इति वदन् न्यासकारः निष्पन्नार्थक-सिद्धशब्दं व्याकुरुते। तस्यायमर्थः – यो हि पदार्थः ज्ञाने भासते तदनुरोधि एव कार्यं सम्पाद्यते। अत एव यावत् संस्कारज्ञानं बहुधा श्रुतेनापि ब्रह्मज्ञानेन संसार-विक्षेपो न विवर्तते। यावत् विरोधि ज्ञानं नोत्पद्यते। अतएव सिद्धपरशास्त्रस्य अप्रवृत्तये पूर्वत्रासिद्धमिति शास्त्रेण पूर्वशास्त्रस्य ज्ञानमेव निवर्त्यते, ततश्च पूर्वशास्त्र-ज्ञानसत्त्वेन तस्य प्रवृत्तिरिति मन्यते। एवं सति ज्ञानविषयीभूतत्वरूपसिद्धत्वनिर्वचनेन नानेन विरोधः ज्ञानस्यैव प्रवर्तकत्वनिवर्तकत्वयोः औचित्यस्य आचार्यैरभ्युपेयत्वात्। तथा चोक्तं भाष्यकृता "कार्या विपरिणामाद्वा" कार्या बुद्धिः, तस्याः विपरिणामात् स्थान्यादेशभावकल्पना। अतएव स्फोटवादे वाक्येषु पदबुद्धिः पदेषु प्रकृतिप्रत्यय-बुद्धिः तत्तदर्थबुद्धिश्च संगच्छते। अन्यथा निरवयवस्फोटे पदस्य प्रकृतिप्रत्ययादीनाञ्च कल्पनानुपपत्तिः स्यात्। ज्ञानस्य सरणीकृत्वे तु स्फोटे वस्तुतः पदाद्यभावेऽपि कल्पितज्ञानविषयतया तत्तद्विभागोपपत्तिः।

**असिद्धत्वपदार्थः –** सिद्धपदार्थनिवर्चनेनैव असिद्धपदार्थोऽपि निरुक्त एव। तथा चोक्तं –

**पदमञ्जर्य्याम् –** सिद्धः निष्पन्नः ततोऽन्यः अनिष्पन्नः। तत्र शास्त्रस्वरूपं तावन्निष्पन्नमिति परत्र परशब्दप्रयोगादिवार्थोऽवगम्यते। तत्कार्यकरणाच्च सादृश्यम्।[8] लोके तु फलप्राप्तौ प्रवर्तमानोऽपि असिद्धशब्द इह शास्त्रे अनिष्पन्नसदृशेऽर्थे वर्तते। वस्तुतः तेषु तेषु कार्येषु सत्सु अपि असिद्धत्वबुद्ध्या अपरं शास्त्रं प्रवर्तते। यथा – हर इह लोपे विधीयमानेऽपि तत्र लोपस्य असिद्धत्वज्ञानेन व्यवधानबुद्ध्या "आद् गुणः" इति शास्त्रं न प्रवर्तते। तथा च लोपस्य ज्ञानाविषयत्वरूपमसिद्धत्वम्, "आद् गुणः" इत्यस्य ज्ञाने लोपो नास्ति पूर्वत्रासिद्धमित्यादि असिद्धशास्त्रेण तस्य निर्वर्तितत्वात्। शास्त्रबोधितमिदमसिद्धत्वं तत्तच्छास्त्रप्रवृत्युपोयोगि न तु लोपोपयोगि। पूर्वत्रासिद्धमित्यादि शास्त्रेण प्रतिपाद्यमानमसिद्धत्वं सिद्धधर्मिकासिद्धत्वारोपरूपम्, सिद्धे एव असिद्धत्वारोपेण तत्तच्छास्त्रप्रवृत्तिः। 'वति' प्रत्ययं विनापि अतिदेशो गम्यते इति नियमात् असिद्धपदं असिद्धवत् भवति इत्यर्थो जायते। अब्रह्मदत्तं ब्रह्मदत्तं इत्याह तेन गम्यते

ब्रह्मदत्तवदयमिति। तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वमिति।

**अतिदेशपदार्थः –** असिद्धसूत्रेषु यत् असिद्धत्वं विधीयते तदसिद्धत्वातिदेशमेव, तत्र जिज्ञास्यते कोऽयम् अतिदेशपदार्थो नाम – अतिदेशनम् अतिदेशः। अत्युपसर्गकाद् अतिसर्जनार्थकाद् दिश्–धातोः भावे घञ् यद्यपि दिश्–धातोः दानमर्थः तथापि उपसर्गबलात् धातूनामनेकार्थकत्वाद्वा। अतिदेशपदार्थः भ्रमात्मकं ज्ञानम्। तदभाववति तत्प्रकारकं ज्ञानं भ्रमात्मकम्। यथा – शुक्तौ इदं रजतमिति ज्ञानम्।

**भ्रमश्च द्विविधः –** आहार्य्यभ्रमः अनाहार्य्यभ्रमश्च। आहार्य्यभ्रमो नाम बाधज्ञानसमकालिकेच्छाजन्यं ज्ञानम्। व्याकरणशास्त्रे अयमेवातिदेशः उच्यते। यथा - हर इह इत्यत्र पूर्वत्रासिद्धमित्यनेन यलोपासिद्धत्वं ज्ञानीयामिति ज्ञानम्। इदञ्च शास्त्रप्रवृत्तिनिवृत्त्युपयोगि, अत एव यकारव्यवधानमादाय "आद् गुणः" इत्यदीनामप्रवृत्तिः। पाणिनीयव्याकरणे सामान्यतया अयमेव सिद्धासिद्धत्वविमर्शः मयाऽत्र अन्विष्टः।

☯

## सन्दर्भाः


1. तर्क सं., पृ.–15
2. मा. भा.1,6,17–19
3. म.भा., 1,6, 27–28
4. म.भा., 1, 7, 1
5. ल.शे., पृ.33
6. प.म., भाग–4, पृ.550
7. न्यासकारः, पृ.330
8. प.म., भाग–4, पृ.550


☯



# प्राचीनवाङ्मये मातृस्वरूपम्

**डॉ. मञ्जू कुमारी**

मातेत्यस्मिन् शब्दे ईदृशी आकर्षिका शक्तिः विद्यते यद् विविधाः जनाः आकृष्टाः भूत्वा 'जाकी रही भावना जैसी' अर्थात् निजभावनानुसारं विविधया व्युत्पत्त्या निजभिन्नभावान् प्रकटयन्ति। सामान्यतया मातृशब्दः मा माने धातोः तृच् प्रत्यये कृते निष्पद्यते यस्यार्थो भवति - आदरणीया। केचित् सुधियः माङ् माने धातोः "नप्तृनेषट्.." सूत्रात् तृन् किं वा तृच् प्रत्ययं विधाय मातृशब्दं साधयन्ति यस्यार्थो भवति - मीमांस्यते पूज्यते या सा माता। पुनरपरे विद्वांसः "माति गर्भो अस्यामिति माता किं वा मान्यते पूज्यते जनैः इति माता" इति उक्त्वा स्वकीयान् भक्तिभावान् प्रकटयन्ति।

वस्तुतः माता इत्यस्य शब्दस्य श्रवणानन्तरमेव नेत्रयोः समक्षं मातृस्वरूपमेकं स्वयमेव आविर्भवति मनसि च श्रद्धासञ्चारः प्रारभ्यते। या माता नवमासपर्यन्तं स्वरजसा शिशुं पोषयन्ती गर्भे तं दधाति प्रसवकालेऽसह्यां पीडां सहते, शिशोः विकासाय स्वभोजनादिषु कठोरं संयमं विदधाति, पुनश्चाजीवनं सन्ततेः कृते सर्वदा मङ्गलं कामयते, तस्याः मातुः सम्बन्धेऽस्माकं प्राचीने वाङ्मये अत्युत्कृष्टाः विचाराः दरीदृश्यन्ते।

प्राचीनतमे ऋग्वेदे मातृशब्दस्य व्यापकरूपम् उद्घाटितं विद्यते। यतो हि तत्रायं शब्दो ने केवलं जनन्याः कृते एवं प्रयुक्तो विद्यते अपितु नैकट्यं बोधयितुं नदीपृथ्वीजलादीनां कृतेऽपि शब्दोऽयं व्यवहृतो वर्तते। मातुः सम्बन्धः तत्र घनिष्ठः प्रियतमश्चासीत्। मातृदर्शनार्थं व्यग्रतायाः परिचायकेन मन्त्रेणेदं स्पष्टरूपेण ज्ञायते–

**"कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम।**
**को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च।"[1]**

प्रतीयते यत् परमेश्वरस्य कृते 'पिता' इत्यस्यामिधानस्यापेक्षया मातेत्यभिधानं प्रयुञ्जन्तो जनाः महान्तं सन्तोषमनुभवन्ति– **"त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ।"**[2]

संहितासु मातुः पितुश्च समासे मातुः प्रथमस्थाने प्रयोगेणापि मातुः प्राधान्यं ज्ञायते– "मातरापितरा"।[3] इदमेव न तत्र माता जीवनदात्री स्वरूपेणापि चित्रिता विद्यते। सिन्धुसरस्वतीनदीनां प्रसङ्गे मातरं जीवनदात्रीरूपेण स्थापयन् मन्त्रो विद्यते-

**"देवीरापो मातरः सूदयित्न्वो घृतवत्पयो मधुमन्नो अर्चत।"**[4] इत्थमेव रुग्णमनुष्येण विपन्नावस्थायामपि मातुः दर्शनस्य कृते प्रदर्शितया आकाङ्क्षया सिध्यति यत् मातुः स्थानमत्यन्तं हृदयग्राह्यमासीत्। वीरपुत्राणां प्रसविनी माता सर्वान् शास्ति स्म तथा च पतिरपि समादरेण तस्याः सम्मानं करोति स्म। शत्रुहननसमर्थासु निजसन्ततिषु गर्वमावहन्ती सा निजप्रतिष्ठां स्वयमेव प्रकटयति–

**मम पुत्राः शत्रुहरणो यो मे दुहिता विराट्।**
**उताहमस्मि सञ्जया पत्यौ मे श्लोक उत्तमः।।**[5]

निजसन्ततेः कृते प्राणान् त्यक्तुं समर्थायाः मातुः स्वरूपं प्रकाशितं विद्यते। इन्द्रेण क्षतविक्षतः कृतः वृत्रासुरः भूमौ पतति। तं रक्षितुं तस्य माता दानुः तस्य शरीरस्योपरि स्वपिति –

**नीचावचा अभवद् वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार।**
**उत्तरा सूरधरः पुत्रः आसीद्दानुः शये सहवत्सा न धेनुः।।**[6]

पुनश्च उषसः व्याजेन पितरोः उपयोगित्वं वर्णयन् मातुः प्रतिष्ठा एव वर्धते। तत्रोक्तं यद् उषा गगनाकाशरूपिण्योः पित्रोः क्रोडं परिव्यापयन्ती सर्वत्र प्रसरति –

**"व्यु प्रथते वितरं वरीय ओमा पृणन्ती पित्रोरुपस्था।"**[7]

न केवलं उषैवापितु रात्रिरपि तत्र मातृशब्देन सम्बोधिता वर्तते यतो हि सा मातुः क्रोड इव विश्रामस्थलं विद्यते यत्र शिशुः परमशान्तिमनुभवति।[8]

यजुःसंहितायां मातुः पालयितृ स्वरूपं प्रकाशयन् आपोदेव्याः पवित्रयितुं याचना क्रियते–

**"आपो अस्मान् मातरः शुन्धयन्तु।"**[9]



न केवलमिदमेव यजुःसंहितायां मातुः माहात्म्यं परिवर्धयता इदमपि प्रतिपादितं विद्यते यद् तस्याः दर्शनादेव श्रेष्ठपुत्रस्य प्राप्तिः भवति। कियती कल्याणकर्त्री माता विद्यते यस्याः दर्शनमात्रमेव कल्याणं करोति। वस्तुतः कल्पनमिदं मातरं प्रति भक्तेः चरमोत्कर्षं प्रदर्शयति–

**वीरं विदय तव देवि सन्दृशि।**[10]

तदनन्तरम् अथर्ववेदे मातुः पोषकरूपस्य स्पष्टोल्लेखः प्राप्यते यत् सा स्वकीयेन अमृततुल्येन दुग्धेन पुत्रस्य पोषणं करोति स्म–

**माता पुत्रं यथा सिंचाम्येनं भूम उर्णहि।।**[11]

यद्यपि मातुः स्थानं प्रतिष्ठितं दृश्यते तथापि तत्र स्पष्टमस्ति यद् तदानीं पुत्राणां जननी भूत्वा माता समाजे श्रेष्ठा भवति स्म तथा च राजगृहेषु पुत्रप्रसविनी जननी किं वा राज्ञी एव महिष्याः पदमलङ्करोति स्म–

**पुमांसं पुत्रं जनयतं पुमान् नु जायताम्।**
**भवसि पुत्राणां माता जातानां जनयाश्च यान्।।**[12]

पुनश्च–

**"सुवामा पुत्रान्महिषी भवति।"**[13]

पुत्रोऽपि मातुराज्ञापलनं तस्याः तुष्टीकरणं तदीयायाः इच्छाया अनुकूलमाचरति स्म। यतो हि पुत्रं प्रतीदं श्राव्यते स्म यत् मातुरनुकूलमना भवतु इति –

**"अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।।"**[14]

तदानीं मातुः प्रतिष्ठा एतावती उन्नता आसीत् यत् कन्यायाः पाणिग्रहणार्थं मातुः निर्णय एवान्तिमो निर्णयो भवति स्म। मातुरिच्छया एव कन्या कस्मैचित् समर्प्यते स्म। ऋग्वेदस्य 5/61 ऋचायां वर्णितायां कथायां दार्मकन्यायाः विवाहः तावत् न सम्पन्नः यावत् तस्याः मात्रादेशो न लब्धः।

गुरुः समावर्तनसंस्कारावसरे स्नातकान् उपदिशन् मातरं देववत् पूजयितुमादिशति स्म। अर्थात् प्रतीयते यत् कालक्रमेण शनैः शनैः मातुः स्थानं उत्कृष्टतरमेव जातम्।

वशिष्ठधर्मसूत्रे वर्णितमस्ति यत् आचार्यस्य गौरवं दशभ्यः उपाध्यायेभ्यः अधिकं भवति। पितुः महत्त्वञ्चाचार्यशतकाभ्यधिकम् पुनश्च मातुर्गरिमा पितृसहस्रात् अधिक इति।

उपाध्यायाद् दशाचार्या आचार्याणां शतं पिता।
पितुर्दशशतं माता गौरवेणातिरिच्यते।।[15]

इत्थं धर्मसूत्रेषु मातुरेतावन्महत्त्वं प्रतिपादयन्ती ईदृशी व्यवस्था स्थापिता यद् मातृसेवा भरणपोषणञ्च पुत्रस्यापरिहार्यं कर्त्तव्यं जातम्। सुश्रुतो विधिनिर्माता मनुरपि स्वीकरोति यद् मातुः पदं पितुः सहस्रगुणं श्रेष्ठमिति। लिखितमपि तेन–

"सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते।"[16]

बृहति आर्षकाव्ये महाभारतेऽपि मातुः गरिम्णः वर्णनं दृश्यते। तत्र तस्या भविष्यनिर्मातृस्वरूपं प्रस्तुवता कथितं यत् माता न केवलं सर्वश्रेष्ठे गुरुः भवति अपितु तादृशः अन्यो गुरुरपि न भवति –

"माता परमो गुरुः नास्ति मातृसमो गुरुः।"[17]

पुनश्चाग्रे कथितम् –

नास्ति मातृसमा छाया नास्ति मातृसमा गतिः।
नास्ति मातृसमं त्राणं नास्ति मातृसमा प्रिया।।[18]

इत्थं न केवलं श्रुतिस्मृतिषु अपितु पुराणेष्वपि मातृत्वस्य महत्त्वं वर्णयन्तः प्रसङ्गाः प्राप्यन्ते। यथा –

"जनको जन्मदातृत्वात् पालनाच्च पिता स्मृतः।
गरीयान् जन्मदातुश्च योऽन्नदाता पिता मुने।।
तयोः शतगुणे माता पूज्या मान्या च वन्दिता।
गर्भधारणपोषाभ्यां सा च ताभ्यां गरीयसी।।"[19]

ब्रह्मवैवर्तपुराणे मातॄणां षोडशप्रकाराः निरूपिताः। गणेशखण्डे प्राप्यते वर्णनमिदम्-

स्तनदात्री गर्भदात्री भक्ष्यदात्री गुरुप्रिया।
अभीष्टदेवपत्नी च पितुः पत्नी च कन्यका।।
सगर्भजा या भगिनी पुत्रपत्नी प्रियाप्रसूः।
मातुर्माता पितुर्माता सोदरस्य प्रिया तथा।।
मातुः पितुश्च भगिनी मातुलानी तथैव च।
जनानां वेदविहिता मातरः षोडश स्मृताः।।[20]



वस्तुतः षोडशप्रकाराः मातृस्वरूपस्य प्रसारकरूपेण प्रस्तूयन्ते इति प्रतीयते। पुराणेषु यत्र-यत्र मातुः गृहस्थाश्रमस्य वर्णनं लभ्यते तत्र तत्र तस्याः श्रेष्ठत्वं प्रतिपादितमस्ति।

अनेन प्रकारेण दृश्यते यत् प्राचीने वाङ्मये किं वा श्रुतिस्मृतिपुराणेषु मातृस्वरूपस्य विविधाः पक्षाः प्रकाश्यन्ते। सा जनयित्री, पोषिका, आश्रयदात्री, स्नेहसेचिका, कल्याणकर्त्री, उदारचित्ता, रक्षिका, सर्वोत्तमगुरुरूपेण च सन्ततेः कृते आजीवनं प्रयत्नरता भवति। निजस्तन्यपानेन शिशोः शरीरजीवनयोः रक्षणं सम्पादयति एव स्नेहसेचनेन वात्सल्यप्रदानेन च सन्ततिं सर्वदाऽभ्युन्नतिं यशश्च प्रति अग्रेसरं कारयति। तस्याः गुरुस्वरूपं सर्वेभ्यः समाजोपयोगि विद्यते। शैशवे मातुः सकाशात् प्राप्ता शिक्षा एव शिशोः चिरस्थायिन्यः शिक्षाः भवन्ति। सत्याहिंसापरिग्रहादीनां सम्बन्धे सैव सन्ततिं कथोपकथाश्रावणमुखेन हृदयग्राहितया बोधयति। मानवीयसद्गुणानां मानवतालक्षणानाञ्च बोधं जननी सारल्येन सन्ततिं कारयति। या माता ईदृशी उपकारिका भवति तस्याः सेवया सन्ततिः उत्कृष्टं परिणामं प्राप्नोति इति प्रतिपादयत् प्राचीनवाङ्मयं तां सेवितुं सन्ततिं प्रेरयति। महर्षिसुमन्तवचनानुसारं ये सज्जनाः मातृसेवां कुर्वन्ति ते धन्याः स्वर्गे लोके च सुखभागिनो भवन्ति–

"आयुः पुमान् यशः स्वर्गं कीर्तिं पुण्यं बलं श्रियम्।
पशुसुखं धनं धान्यं प्राप्नुयान्मातृवन्दनात्।।"

इत्थं प्राचीनवाङ्मये मातृहृदयं मातृतत्त्वं वा एकमेतादृशं हृदयं मन्यते यत्र करुणास्नेहसहानुभूत्यात्मत्यागसमर्पणमिश्रितं वात्सल्यजलं निश्छलरूपेण सततं प्रवहति। मातृहृदयं सर्वदोपकारकमेव। सत्यमेव उक्तम् आचार्यशङ्करपादेन–

कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।

## सन्दर्भाः


1. ऋग्वेदः – 1.124.1
2. ,, – 8.98.11
3. ,, – 4.6.7
4. ,, – 10.64.9
5. ,, – 8.159.3
6. ,, – 1.32.9
7. ,, – 1.124.5
8. ,, – 6.55.5
9. यजु. – 4.20
10. ,, – 4.23
11. अथर्ववेदः –
12. ,, – 3.23.3
13. ,, – 2.36.3
14. ,, – 8.3.50
15. वशिष्ठधर्मसूत्रम् – 13.48
16. मनुस्मृतिः – 2.145
17. महाभारतम् – 12.108.18
18. ,, – 12.166.31
19. ब्रह्मवैवर्तपुराणं – गणेशखण्डः अध्यायः 40
20. ,, – ,, ,, ,, 15




# आधुनिकसंस्कृतसाहित्ये कतिपयव्यक्तिनिष्ठकाव्यानां परिचयः


**डॉ. रवीन्दकुमारः पण्डा**


अपारे कविपरम्परावाहिनि संसारे नवनवोन्मेषप्रतिभाशालिभिः गम्भीरार्थ-तत्त्वविद्भिर्महाकविभिर्विनिर्मितानि लोकोत्तरानन्दसन्दोहसमुत्पादकानि मनोहराणि काव्यानि केवलं क्षणिकभावात्मकसुखानुभूतिप्राप्तये न भवन्ति। तेषां रमणीयार्थप्रतिपादकानां काव्यानां मानवस्य चरित्रविकासाय तथा च समाजस्य सर्वविधकल्याणसाधनाय संविद्यते महती चावश्यकतेति विषये नास्ति शङ्कालेशः कस्यापि सहृदयस्य मनसि। काव्यं यदि कमनीयकल्पनासन्निविष्टं भूत्वा केवलं मनोरञ्जनसाधनविशेषं भवेत्तर्हि तस्य मूल्यहानिर्भवतीति न संशयः। काव्यस्यासाधारणं प्रयोजनं प्रतिपादयता मम्मटाचार्येण यथार्थेन काव्यप्रकाशे निगदितं यत् काव्यं जनान् 'रामादिवत् प्रवर्तितव्यं न रावणादिवदि'ति व्यवहारज्ञानमुपदिशति। आदिकवेर्वाल्मीकेरारभ्य अद्यावधि कवयो महाकवयश्च तामेव शिष्टपरम्परामनुसृत्य जनान् सन्मार्गे संप्रेरयितुं चरित्रं निर्मातुं च नवरसमयानि सुन्दराणि सुखकराणि काव्यानि रचयन्तीति हेतोः संस्कृतभाषासरस्वती सुतरां समृद्धा भवति। आनन्दवर्धनेन ध्वन्यालोके यद्यपि रामायणरचनायाः कारणं 'क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः' इति कथितं तथापि जनानां समक्षं लोकोत्तरं रामसीतालक्षणभरतादीनां चरित्रमेवोपस्थापयितुं महाकविना वाल्मीकिना प्रणीतं रामायणमिति धारणा तु स्पष्टा भवत्येव। अतः कथयितुं शक्यते यत् चरित्रनिर्माणार्थमुत्तमकाव्यानि कवयो विरचयन्ति। चरित्रनिर्माणद्वारा व्यक्तेर्व्यक्तित्वमेव विकसति। विद्यमानेषु पद्यकाव्येषु च व्यक्तिनिष्ठकाव्यानां प्रचलितास्ति संस्कृतसाहित्यजगति सुमहती परम्परा। विशेषतः संस्कृतसाहित्यस्याधुनिके काले परम्परेयं सुसमृद्धा संजाता। स्वाधीनतासंग्रामे प्राणोत्सर्गं कृतवतां देशभक्तानां महापुरुषाणां विशालं व्यक्तित्वमाधारीकृत्य नैकानि काव्यानि महाकाव्यानि च विरचितानि दृश्यन्ते। यद्यपि काव्यं गद्यपद्योभयमयमिति तद्विदो मन्यन्ते तथापि वेदसूक्तादारभ्य इतिहासपुराणादिषु

प्रस्फुटितः काव्यमार्गः प्रायेण पद्यसरण्यैव प्रसारितः। छन्दोबद्धेषु वाक्येषु गेयपरिस्पन्दः प्रचुरतरमनुभूयते। गेयगर्भितेषु पद्येषु भावशबलता झटिति चमत्कारमादधाति। सहृदयाः काव्यज्ञा न केवलं पदानि वाक्यानि च काव्यपाठसमये स्वयं व्यक्तमुच्चरन्ति, अपि तु कविस्वभावनिष्ठेन कविना काव्यनिर्माणवेलायां स्वस्मै स्वयं श्रावितं गेयवृत्तमनु-शृण्वन्तीवास्वादयन्ति। श्रव्यकाव्यस्य चमत्कारस्तदा वाचकेन स्फुटतरमनुभूयते। अतः कविरत्नब्रह्मानन्दशुक्लमहोदयः कथयति–

**ते वै जयन्ति नितरां कवयो यदीयां**
**वाङ्माधुरीमनुसरन्त्यपरेऽधुनापि।**
**वाल्मीकि-शोधित-नवीन-कवित्व-मार्गं**
**व्यासादयोऽप्यनुययुर्जनजीवनाय।।** (नेहरुचरितम् 1/7)

तथैव त्र्यम्बकशर्मणा कथितम् –

**"हरन्ति सन्तः कवयो निरन्तरं नितान्तमन्तःकरणस्य दूषणम्।**
**सरस्वती यद्रसनाङ्गणे गुणैश्चिरं विरन्तुं सरसा रसामले।।"**
(श्रीस्वामि–विवेकान्दचरितम्, पृ. 23)

अस्मिन् लघुनिबन्धे कतिपयानां प्रमुखाणां व्यक्तिनिष्ठकाव्यानां परिचयमात्रं प्रदीयते।

कविभिः कीर्तितानि महापुरुषाणां चरितानि महान्तमामोदं जनयन्ति। आदर्शास्ते जननिवहस्य येन पथा सञ्चरन्ते, यां पद्धतिमङ्गीकुर्वन्ति, यथा वा प्रवृत्तिमन्तो भवन्ति तथैवेतरे प्रवर्तन्ते। ते हि पथिकृतो भवन्ति पथिदर्शाच्च। आभणति च लोकः–'महाजनो येन गतः सः पन्थाः' इति। महाजनानुसृतपथस्तेषां चरितादेव सुज्ञानाः भवितुमर्हन्ति, अत एव तेषां चरितकीर्तने विदुषां प्रवृत्तिः। आधुनिकैः सुरगवीकविभिर्गांधिजवाहरलाल-राजेन्द्रप्रसादप्रमुखाणां नेतॄणां जीवनवृत्तमधिकृत्य भूयस्यः कृतयस्तेषु जीवत्स्वेव प्रणीताः प्रकाशिताश्च। दरिद्रभारतस्याशातन्तुनिबन्धनबन्धुरस्य कतिपयान् मासानेव देशस्यास्य प्रधानमन्त्रिपदमलंकृत्य स्मरणीयतां गतस्य लालबहादुरशास्त्रिणोऽपि जावनगाथां कवित्वमार्गेण चर्चितुं च कैश्चन प्रयासः कृतः। मातृ-सेवा-परमधर्म-धुरीणस्य कृषकवर्गाधिकारानधिकृत्यकृत-बारडोलीमहासत्या-ग्रहस्याग्रगण्यस्य शतशः खण्डेषु खण्डितस्य स्रक्-सूत्र-न्यायेनैकराष्ट्ररूपे बन्धकस्य



लौहपुरुषस्य जीवनविषये महाकाव्यमपि विरचितमस्ति। एवमपि भक्तसिंह-वीरसावरकर-वीरसुरेन्द्रसायप्रभृतीनां महापुरुषाणां विषये काव्यानि लिखितानि अद्यापि च लिख्यन्ते। इयं सुमहती परम्परा अर्वाचीनसंस्कृतश्रियं संवर्धयति साहित्यक्षेत्रं च पुष्णाति। काव्यमाध्यमेन सहृदयाः पाठ्का न केवलमेतेषां महापुरुषाणां जीवनवृत्तं ज्ञातुं पारयन्ति अपितु तेषामवदानविषये सम्यग् ज्ञानं लभन्ते अतस्तान् प्रति समादरभावः साहित्यमाध्यमेन वर्धत एव।

## नेहरुयशःसौरभम्

नेहरुवंशस्य प्रमुखस्तम्भो जवाहरलालनेहरुः विश्वविख्यातो महामानवो विद्यते। भारतीयस्वाधीनतासंघर्षे तस्यासाधारणं कृत्यं विश्वविदितं वर्तते तथैव स्वाधीनतानन्तरं राष्ट्रनिर्माणस्याधारशिलायाः सुदृढीकरणेऽपि तस्य प्रयासः सततस्मरणीयो वर्तते। अतोऽसौ सामान्यजनानां कृतेऽपि श्रद्धास्पदो वर्तते। ईदृशीं श्रद्धामनुभूय महाकविना गोस्वामीबलभद्रप्रसादशास्त्रिणा 'नेहरुयशःसौरभम्' नामधेयं महाकाव्यं विरचितम्। वस्तुतः काव्यमेतत् तस्य राष्ट्रहिते कृतकार्याणां कृते कवेः श्रद्धाकुसुमाञ्जलिरेव आसीत्। उक्ते काव्ये नेहरुवंशं वर्णयता कविना राजकौलादारभ्य प्रियदर्शिन्या इन्दिराया पूर्वार्धचरितं यावत् कथानकं वर्णितम्।

**न चेति या नो किल राष्ट्रभावना प्रदर्शिनी काव्यकलेवराश्रिता।**
**कथेयमादर्शचरित्रपद्धतेर्बिभर्ति कालमितयेऽपि गौरवम्।।**
**कवेश्चिरं मानसमन्थनोद्धृतं रसार्द्रमेतन्नवनीतमोदकम्।**
**यथा भवेल्लोकमनोहरं तथा तनोतु चित्ते नवराष्ट्रचेतनाम्।।**
(नेहरुयशःसौरभम्, काव्यकथामुखम् पृ. 15-16)

## इन्दिराजीवनम्

तेन कविना पुनः इन्दिराजीवनमिति चापरं महाकाव्यं विरचितम्। तत्तु तस्य वंशस्योत्तरार्धमिव विद्यते। महाकाव्येऽस्मिन् भारतरत्नभूताया गान्ध्युपाह्वायाः श्रीमत्या इन्दिरायास्तथा च तदात्मजस्य श्रीराजीवगान्धि-महाभागस्य प्रशस्तं चरित्रं राष्ट्रहिते तयोर्बलिदानं च काव्यकलालङ्कृतैर्मधुरैः सरसमनोहरैर्भावोन्मेषभव्यैश्च काव्यतत्त्वैर्वर्णितमस्ति। अस्मिन् काव्ये न केवलमिन्दिराराजीवचरितमपितु समाजदर्शनं

चापि प्रस्तुतम्। अत्र राजनीतिधर्मप्रजातन्त्रनियतिभवितव्यता अपि व्याख्याताः सन्ति। मानवीयमूल्यानां महत्त्वं, राष्ट्रस्य गरिमा, तत्कृते भारतीयजनानां समर्पणभावना अपि प्रकाशिताः सन्ति। समाजे विकृतराजनीतेर्नर्तनं हिंसायास्ताण्डवं स्वार्थवृत्ति-प्रभृतितत्त्वानि तथैव शब्दचित्रैः काव्येऽस्मिन् प्रस्तुतानि सन्ति तथैव मानवजीवनस्य क्षणभङ्गुरता त्यागस्य महत्त्वं राष्ट्रियजीवनं चापि सन्मार्गदर्शनाय चित्रितमस्ति।

कविः स्वयं कथयति यदिदं महाकाव्यं नेहरुयशःसौरभमिव दलगतप्रतिबद्धतया राजनीत्या वा नास्त्यपितु 'चारुचारित्र्यगीतिः', 'सहृदयहृदि वेद्या भव्यभावानुभूतिः' 'मङ्गलानां प्रसूति' श्चास्ति।

**न च दलगतनीतिर्नाप्यसौ राजनीतिः**
**सरसकृतिरियं मे चारुचारित्र्यगीतिः।**
**सहृदयहृदि वेद्या भव्यभावानुभूति-**
**र्भवतु कविगिरेयं मङ्गलानां प्रसूतिः।।** (इन्दिराजीवनम् 19/43)

कविः धर्मस्य महत्त्वं सुन्दरैः सरलैश्च शब्दकुसुमैर्वर्णयति यत्तु ग्रहणीयं तथा च स्पृहणीयं प्रतिभाति।

**को नु धर्मो जनान् शास्ति वै हिंसनं को नु धर्मो वदेल्लोकविध्वंसनम्।**
**धर्म आमोदते लोकसंरक्षणम् धर्म एवाह वै राष्ट्रसंरक्षणम्।।**
**धर्म आशंसते स्नेहसंरक्षणम् भ्रातृभावप्रबुद्धैकतारक्षणम्।**
**राष्ट्रसंरक्षणं, बन्धुतारक्षणं मानवीयैर्गुणैर्लोकसंस्मरणम्।।**
(तत्रैव, 10/25-29)

## चन्द्रचरितम्

बभूवुर्भवन्ति चैव भवितारो भारतभुवि शतसहस्रशो नेतारः किन्तु 'नेता' इति पदेनाऽलङ्कृतोऽस्ति केवलं सुभाषचन्द्र इति तथ्यं सुविख्यातमेव। मनसा वाचा कर्मणा च भारतभूमिसुतः स्वदेशोद्धारहेतोर्यादृशं कण्टकाकीर्णवर्त्मावलम्ब्य यद् यन्महत्कर्म चक्रे तादृशमुदाहरणं न कुत्रापि श्रुतन्त्र दृष्टं कदाचन। एतदर्थं स एवांशावतार इवाद्यपि लोके गण्यते। अतीवाद्भुता विस्मयकारिणी च तस्य जीवनलीला प्रतीयते यतश्च तेन देशान्तरेऽपि सैन्यसंघटनं कृत्वा दिग्दिगन्तस्याप्तमपि ब्रिटिशशासनं विनष्टीकर्तुं भगीरथप्रयत्नोऽकारि। तथा च विश्वमहायुद्धे तस्य रणव्यूहरचनाऽ-



तिशयचमत्कारिणीव निश्चीयते सामरिकदृष्ट्या च लोमहर्षिणीव प्रतिभाति। कारणेनानेनैव सुभाषस्य क्षमता प्रतिभासामर्थ्यानि लोके युगे च स्मरणीयानि जातानि। यद्यपि भारतीयानां विश्वासोऽस्ति यद् भारतं गान्धिनोऽहिंसाव्रतेन अलभत स्वतन्त्रतां तथापि राजनीतिज्ञा अद्याप्येवं स्वीकुर्वन्ति यत् सुभाषस्य सशस्त्रक्रान्त्या ब्रिटिशा भयभीताः संजातास्तथा च यदासौ आँग्लीयानां रिपून् स्वपक्षे कृतवान् तदा भाविसंघातसङ्कटं समीक्ष्यैव लन्दनसिंहासनं सहसा विचलितमभूत्। ततस्ते ब्रिटिशा भारताय स्वराज्यं प्रदातुं कटिबद्धा बभूवुश्चेति। एतदर्थं सुभाषस्य जीवनवृत्तं मिथिलेशकुमारीमिश्रेण संस्कृतवाङ्मयेऽवतारयितुं गीतागद्यमयः प्रयासः कृतः।

## विश्वभानुः

भास्वरे भारतनिवासप्रागुदीच्यामुदयमुपलभ्य प्रवृद्धतेजसा भुवनलयमुद्भासयन्तो जगद्देशिकमहिमानमधिगत्य सर्वकालपरोपकारव्रतदीक्षितनामितिहासविषयीभूतानां ज्योतिर्मण्डले देदीप्यन्तेतरां पूजनीयाः श्रीमद्विवेकानन्दस्वामिपादाः, येषां प्रख्यातमितिवृत्तमाश्रित्य निर्मितं महाकाव्यं 'विश्वभानुः'। अस्मिन् सर्गबन्धे प्रबन्धे आजन्मशुद्धस्याफलोदयकर्मणो दयावीरस्यास्य महामनीषिणो गुणशीलचरितवर्णनमिषेण सनातनवैदिकसंस्कृतिस्रवन्त्याः पूर्वमहिमा वस्तुगत्या अनुरञ्जितो भवति। भाविभारतभविकार्यमभीप्स्यमानस्य महार्थस्य प्राप्तये स्वामिपादैरुद्बोधिता पद्धतिरपि तत्त्वार्थध्वनिभरितैः पदनिचयैः प्रकाशिता दृश्यते। काव्यमिमं पदवाक्यवृत्तगत-माधुर्येणोपक्रियमाणां रसभावनिबन्धनामनुभूतिं हृदि समुद्भासयति। पञ्चपञ्चाशदधिकपञ्चशतैः श्लोकैर्निबद्धे विश्वभानौ षोडशमन्तिमं च विहाय इतरेषु पद्यसङ्ख्या प्रतिसर्गं पञ्चविंशत्या नियता। सर्गान्तदीर्घवृत्तपरीपाटी तु प्राचीनेषु केषुचिन्महाकाव्येष्विवात्रापि बाह्यशोभामात्रमिति नादृता। अनुष्टुबुपजाति-वंशस्थवियोगिनीपुष्पिताग्रावसन्ततिलकापृथ्वीसमाख्यैः सप्तभिर्वृत्तैर्निबद्धेऽस्मिन् काव्ये प्रतिसर्गं वृत्तभेदोपादानाय निर्बन्धो न दृश्यते।

एवमेव विश्वभानौ षट्सु सर्गेषूपजातिः, चतुर्षु वसन्तिलका, त्रिषु वंशस्थं, त्रिष्वनुष्टुप्, द्वयोर्वियोगिनी, द्वयोः पुष्पिताग्रा, एकस्मिन् पृथ्वी चेति पश्यामः। रीतिरस्य काव्यस्य स्वाभाविकीति यत्र कुत्रापि द्रष्टुं शक्यते। यथा-

**विजित्य मायां हृदि सारदर्शिनः समस्तलोकोदयचोदिताशयाः।**
**सुदुर्लभाः सन्ति विशुद्धनाविकाः सनातने तत्त्वविचारसागरे।।**(विश्वभानुः1/9)

बन्धपारुष्यरहिता शब्दकाठिन्यवर्जिता, नातिदीर्घसमासा च वैदर्भीरीतिरेवात्र प्रायेण दृश्यते। क्वचिद् गौडीयापि संघटना विषयानुगुण्येन समुपात्ता। यथा-

**भ्रमरूपमरीचिकाहरी परिखीभूतपरार्घ्यनिर्झरी।**
**मुनिमानससोदरी परिस्फुरतात् काशिपुरी पुरीश्वरी।।** (तत्रैव 2/23)

आलङ्कारिकैः सार एवं प्रदर्श्यते-

**शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि।**
**अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः।।**

एवं विधानि विवक्षितविशेषाभिधानक्षमाणि पदानि वर्णनेषु प्रयुञ्जानः कविधर्मज्ञः काव्यकर्ता चमत्कारमादधाति। परिवृत्तिं यत्र पदानि न सहन्ते तत्र शब्दन्यासनिष्णाताः पाकगुणं पश्यन्ति। विश्वभानौ द्राक्षापाकः प्रायेण परीक्षकैरनुभवितुं शक्यते। अग्निः शुष्केन्धनमिव, स्वच्छजलं वस्त्रमिव, चित्तं व्याप्नुवन्ति प्रसादभूयिष्ठानि पदानि रसदीप्त्या बहुत्र सहृदयहृदयान्याह्लादयन्ति।

## इन्दिरागान्धीचरितम्

भारतदेशस्य प्रधानमन्त्री श्रीमती इन्दिरागान्धी कोटिशो जनानां पूजनीयाऽभिवन्दनीया च। विशालस्य जम्बूद्वीपान्तर्गतस्य भारतभूखण्डस्य महापरिमाणस्याधिकदशानि वर्षाणि सफलं शासनमस्याः कमप्यसाधारणं गुणगरिमाणमाविष्करोति। भारतीयाः जनाः कथं सुखिनो भवन्तु, कथं च दैन्यं दारिद्र्यं वा परिहर्तव्यमितीयमनारतं चिन्तयति स्म। तेषां दैन्यादुद्धारः समुन्नतिर्वा प्रधानमन्त्रिणी प्रथमं कृत्यमित्यभ्युपैति। एतदर्थमेव तया विंशतिसूत्रात्मकः आर्थिकः कार्यक्रम उद्भावितः प्रवर्तितश्च। अस्मिन् महाकाव्ये पञ्चविंशतिः सर्गाः सन्ति। काव्यस्य प्रारम्भे पूर्वपीठिका प्रदत्तास्ति। तत्र सत्यव्रत-शास्त्रिमहोदयाः काव्यस्य प्रयोजनमित्थं वदन्ति।

**विशुद्धबुद्धेर्जनताप्रियाया दिगन्तविश्रान्तयशःकथायाः।**
**हृदं विदुष्याः शुभमिन्दिरायाः गीर्वाणवाण्या चरितं ब्रवीमि।।** (श्लोकः7)

## प्रतापराणायनम्

ओगेटि परीक्षितच्छर्मभिः राणाप्रतापनृपतिचरितमत्यद्भुतमुररीकृत्य विरचितं प्रतापराणायनं नाम विशालं महाकाव्यम्। रुचिररससमन्विन्तेऽपि विविधवर्णन-



वर्णच्छटाभास्वरेऽपि अस्मिन् काव्ये न कविना क्वचिदपीतिहासः विकृतिमापादितः। अत एवायं काव्यग्रन्थः सन्नपि रुक्षविवेचनवर्जितः भावानुबन्धी रसस्यन्दी इतिहासोऽपि भवति। प्रायशस्त्रिशतवर्षेभ्यः प्राक् परकीयमोगलसाम्राज्यावलितभीषण-पारतन्त्र्यक्रकचपाशवशात् अनल्पपीडिताया बहुव्यथिताया अतिनिर्विण्णाया भारतमातुः कन्धरां विमोचयितुं कराङ्गुलिपरिमेया एव नृपतयः संस्कृतेर्जीवातुभूता इव, प्रयत्नानां पराकाष्ठं व्यदधुः। तेषु अन्यतमः महाराष्ट्रेषु लब्धजनिः स्वनामधन्यः शाहसूनुः छत्रपतिः शिवः। तत्पूर्वं च राजस्थानराजपुत्रः स्वप्रतापपराभावितपारतन्त्र्यध्वान्तः राणाप्रतापः। विरलतरा हि एतादृशानां महाप्रभावाणां पुरुषाणामाविर्भावा भवन्ति, ये हि क्षणमात्रमपि अविश्रम्य, सोढ्वा च शारीरानपि क्लेशान् बहुतरान्, स्वातन्त्र्ययज्ञकुण्डेषु तिलशः स्वात्मविसर्जनं कुर्वन्तः स्वदेशार्थमात्महोम विदधते। शिवछत्रपतिमुद्दिश्य नैकानि महाकाव्यानि महाकविभिः प्रणीतानि। तेषु 'क्षत्रपतिचरितं' महाकाव्यं सुप्रसिद्धमस्ति।

महाकविः ओगेटि परीक्षितशर्ममहोदयः राष्ट्रभक्तस्य राणाप्रतापस्य विक्रमैकरसं प्रत्यवायसङ्कटं चरितमत्यद्भुतमतिपावनं हृदि ध्यायं राणासमीपतां समासादितुमिव तन्निवासपरिपावितपांसूनि चितोड-उदयपुरादि-दिगन्तराणि, तत्पूजितैकलिङ्गेश्वरादि-देवतामन्दिराणि, तद्विहितपराक्रमस्थानानि हल्दिघाट्याख्यानि च दर्शं दर्शं, तत्रत्येभ्यः ग्रामवृद्धेभ्यश्च राणाप्रतापस्य वीराद्भुतकथायुताः गाथाश्च श्रावं श्रावं, प्रत्नमपि ऐतिहासिकं घटनाक्रमं नितान्ततृषितेन संवेदनक्षमेण तन्मयेनेव हृदयेन मनश्चक्षुषा च साक्षादिव अन्वभूत्। स एवानुभवो वस्तुगत्या वाचामगोचरोऽपि, अर्थसार्थः शब्दराशिरभवदस्मिन् महाकाव्ये। किं तावत् प्रयोजनमस्य काव्यस्येति स्वयं कविः निम्नलिखितैः पद्यैः स्पष्टीकरोति।

**यावत् वाणी चिरं तिष्ठेत् तावद्राणायनं भुवि।**
**लोके निद्राणजन्तूनां कर्तव्यं शासयन् ध्रुवम्।।**
**यावदर्कः चरेत् शून्ये भारतं जगतीतले।**
**तावद्राणायनं भूयात् लोककल्याणसिद्धये।।**
**देशभक्तं महावीरं कथं मे पूर्वसूरयः।**
**विस्मृत्य कृतवन्तो यत् लोके काव्यचयं महत्।।**

राणाजीवितमुद्दिश्य काव्यं नास्तीति संस्कृते।
अपवादात्मकं वाक्यं निरस्तुं कवयाम्यहम्।।
(प्रतापराणायनम्, पृ.11)

ब्रह्मानन्दशुक्लमहोदयः स्वकीये काव्यरत्ने महापुरुषाणां गुणकीर्तनमित्थं करोति।

ये मानवा मनुजतां परिपालयन्तो
राष्ट्रोन्नतौ निजधियं विनियोजयन्ति।
ते वन्दनीयचरणा उभयत्र नूनं
लब्ध्वा यशोऽतिविमलं सततं जयन्ति।।
येषां मनो न रमते विपुलेऽपि वित्ते
नैवात्मजे न च कुले न च लोकसौख्ये।
नाना-विभूति-कलनां ललनां विहाय
ते सर्वविश्वहृदयाः सुतरां जयन्ति।।
तेषां प्रशस्तयशसां किल वर्णनाय
बद्धादरोऽपि नहि वेद्मि निजात्मयोगम्।
पूता भविष्यति ममापि मतिस्तथापि
मत्वेत्थमेव चलितोऽस्मि गतिं विधातुम्।।
(नेहरुचरितम्, 1/11,12,13)

## श्रीस्वामिविवेकानन्दचरितम्

युगपुरुषस्य विवेकानन्दस्य प्रभावशालि व्यक्तित्वमपि संस्कृतकवीनां हृदयान् समाकर्षति। एतदर्थं गद्यरूपेण च नैकानि काव्यानि महाकाव्यनि च तस्य जीवनोपरि विलिखितानि दृश्यन्ते। विश्वभानोश्चर्या आस्माभिः पूर्वं कृतास्ति। अपरमप्येकं महाकाव्यं श्रीस्वामिविवेकानन्दचरितनामधेयं त्र्यम्बकभण्डारकरेण विरचितमस्ति। तत्तु काव्यनायकस्य विवेकानन्दस्य जीवनदर्शनमतिस्पष्टं करोति। भावपूर्णं सरलपदावलियुतं वैदर्भीरीतिमण्डितं महाकाव्यमिदं व्यक्तिनिष्ठकाव्येषु स्वतन्त्रस्थानमर्हति। उदाहरणमेकं प्रदीयते।



श्रीरामकृष्ण-युगमुज्ज्वलमेकसंस्थं
जातं जनेष्जननि विश्वजनीनमुच्चैः।
वन्दे तमन्धतमसावृतजीववृन्दे
प्रज्वालितो जगति येन विवेकदीपः।।
(श्रीस्वामिविवेकानन्दचरितम् 1/1)

## लौहपुरुषावदानम्

भारतस्य स्वातन्त्र्यसंग्रामे महात्मागान्धि-जवाहरलालप्रभृतिनेत्रन्तरवत् वल्लभ-भाईपटेलस्य 'सरदार' इति यथार्थेनोपाधिना प्रसिद्धस्य योगदानं न कस्माच्चिदपि न्यूनमुपेक्षणीयं च। राष्ट्रियमहासभाया नायकेषु गांधि-जवाहरौ स च मूर्धन्या अभवन्। स्वातन्त्र्यलाभानन्तरं विभाजनादिभिरुपसर्गैः सर्वथा विशृङ्खलीभूतस्य भारतराष्ट्रस्य प्रशमनादिभिदृढतापादनेन नैकशतराज्यानां संघटनेन च तस्य कोऽपि निरतिशयो विशेषः स्फुरत्येव। वल्लभो राष्ट्रियमहासभाया निष्ठावान् सदस्यस्तया प्रवर्तितेष्वान्दोलनेषु चान्यतमः सैनिकः सेनानी चावर्ततेति तज्जीवनचरितप्रसङ्गेन मद्यनिषेध-वैदेशिकवस्त्रप्रत्याख्यानलवणनिर्माणसविनयादेशभङ्गप्रभृतीनां संघर्षाणां विस्तृतं वर्णनमत्र लभ्यते। वल्लभचरितप्रसङ्गेन च राष्ट्रियमहासभाया महात्मनो गांधेश्च सकलोऽपि स्वातन्त्र्यसंघर्षेतिहासोऽत्र समासत उपवर्णित इति। कतिपयाः श्लोकाः प्रदीयन्ते।

स्वातन्त्र्यमेवामथ भारतमाड्ढौके
दीनं सुदुर्गतमसङ्ख्यतया विभिन्नम्।
तद् ये यता उदधरन् निजबुद्धिरज्ज्वा
मुख्योऽस्ति वल्लभ उदारमतिस्तु तेषाम्।।
गौराङ्गदुर्नयजयक्षतसंघभावं
राज्येषु नैकशतकेषु पुनर्विभक्तम्।
यो भारतं स्वनयसूत्रबलेन नद्धं
चक्रे स शक्रगुरुधी-विभवः प्रशस्यः।।
वित्तादिलाभपरिलुब्धधिया मयेयं
नोदीर्यते चपलचाटुकृतिः प्रभूणाम्।

यातश्चिराद्दिवमुदारमनाः सधुर्यै-
विस्मारितश्च खलु यः स तु किं प्रयच्छेत्।।
तस्यावदात-महिमा महनीयकीर्ते-
र्मूर्तेश्च विस्मयकरप्रतिभाभराणाम्।
श्रीवल्लभस्य जनवल्लभजीवनस्य
मन्मानसं कुतुकि सच्चरिते करोति।।

(लौहपुरुषावदानम्, पृ.7-8)

एतानि महाकाव्यानि आधुनिकसंस्कृतसाहित्यस्य प्रतिनिधिभूतानि सन्ति। एतेषां साहित्यक्षेत्रे स्वतन्त्रं स्थानमस्त्येव। महाकवयः काव्यनायकानां चरित्रं, जीवनं, गुणावलिं तस्य समाजसमुद्धाराय चोल्लेखनीयं योगदानं च सरलया भाषया, प्रसादगुणोपेतवैदर्भीरीत्या उपमारूपकादिसुमनोहरैरलङ्कारैर्मण्डयित्वा तथ्यपूर्वकं चित्रयित्वा जनानां सम्मुखं समुपस्थापितवन्तः। सहृदयाः पाठ्कास्तान् सर्वान् पठित्वा न केवलं तेषां महापुरुषाणां विषये सम्यग्ज्ञानं लप्स्यन्ते अपितु ताभिः काव्यकृतिभिरुद्बुद्धाः सन्तो समाजहिताय संप्रेरिता भविष्यन्ति। धन्या इमे कवयो यदीयाभिः कृतिभिः संस्कृतसाहित्यं सम्प्रत्यतिभूमण्डलवर्ति सकलान्यसाहित्यं विजित्य विजृम्भते।

लोकोत्तराः प्रियतराः कृतयो रसार्द्रा
भावोन्नताः कृतिवरैरभिनन्दनीयाः।
विद्यावदातहृदया ललिता यदीयाः
स्तोतुं न तान् भवति कस्य मनःप्रसारः।।



# वैदिकभाषायां स्वरोपयोगिता

सुधीरकुमारपाठकः

स्वृधातोः घञ्प्रत्ययेन निष्पन्नः स्वरः इति पदमिदं वर्णविशेषस्य उदातादिस्वरधर्मस्य क्रुष्ट्यदिस्वरस्य चाभिधाने प्रयुक्तो भवति। अत्र स्वरपदस्य प्रयोगः उदात्तादिस्वरधर्मस्यार्थे विद्यते। उदात्तादयः स्वरधर्माः वैदिकभाषायाः प्रमुखं वैशिष्ट्यम्। मन्त्राणामभीष्टार्थनिर्धारणार्थं तेषामभीष्टस्वरेषूच्चारणमपरिहार्यम्। यतो हि स्वरपरिवर्तनेनार्थपरिवर्तनं भवति। अत एव मन्त्राणाभीष्टार्थज्ञानार्थं तेषां स्वराणां समुचितं ज्ञानं महदावश्यकम्। तथोक्तं पाणिनीयशिक्षायाम्–

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रं यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।।**[1]

एवं स्पष्टमिदं यद् मन्त्राणामशुद्धोच्चारणमनर्थस्य कारणं भवति। तथ्यमिदं मीमांसासूत्रभाष्ये शबरस्वामिनापि समर्थितम्–"अथ त्रैस्वर्यादीनां कथं समाम्नातमिति उच्यते–"अर्थावबोधनार्थं भविष्यति।"[2] ऋग्वेदभाष्यकारेण स्वरशास्त्रविदग्धेन वेंकटमाधवेनाप्युक्तम् यत् यथा अन्धतमसि दीपिकाभिः गच्छन् मनुष्यः कदापि मार्गे न स्खलति तथैव स्वरैः सहोच्चारितानां मन्त्राणामर्थाः स्पष्टीभवन्ति–

**अन्धकारे दीपिकाभिर्गच्छन् न स्खलति क्वचित्।**
**एवं स्वरैः प्रणीतानां भवन्त्यर्थाः स्फुटा इति।।**[3]

वेंकटमाधवेन स्पष्टतयोल्लिखितं यदर्थसाम्ये पदानां स्वरोऽपि समान एव भवति। यत्र पदानां स्वरवैषम्यं तत्रार्थेऽपि वैषम्यं विज्ञातव्यम्–

**अर्थभेदे तु शब्दस्य सर्वत्र सदृशः स्वरः।**
**यदानतं स्वरं पश्येदन्यथार्थं तदा नयेत्।।**[4]

दयानन्दस्वामिनाप्येवमेव लिखितं–"वेदार्थोपयोगितया संक्षेपतः स्वराणां व्यवस्था लिख्यते।"[5]

उदात्तादयः स्वरधर्मा मन्त्राणां पदार्थनिर्धारणे त्रिधा साहाय्यं कुर्वन्ति–प्रथमं तावत् पदस्वरूपज्ञानेऽपरं पदगतार्थनिर्णये अन्तिमं च वाक्यार्थप्रकाशने।

**पदस्वरूपज्ञाने–** पदानि चतुर्धा भवन्ति–नामाख्यातोपसर्गनिपाताः। कतिपयपदानां स्वरूपं सन्देहास्पदं भवति। पदानां स्वरूपज्ञानार्थं स्वरधर्माः निर्णायकाः भवन्ति। ऋग्वेदानुक्रमण्यनुसारं स्वरेणैव नामाख्यातयोः विभागः ज्ञायते–"नामाख्यात–विभागश्च स्वरादेवागम्यते।"[6] यथा–किम् इत्यस्य प्रातिपदिकस्य पुंल्लिङ्गे प्रथमैकवचने कः इति रूपं निष्पद्यते। कृधातोः लुङ्लकारे अकः इति रूपं प्राप्यते, तत्रापि अडभावे कः इत्येवावशिष्यते। मन्त्रे प्रयुक्तः कः इति पदं किं प्रातिपादिकस्य सर्वनाम्नः रूपम् अथ वा कृधातोः लुङ्लकारे अडभावेन प्राप्तम् आख्यातरूपम्। अत्र निर्णायकः स्वर एव। यदि कः इत्ययं पदम् उदात्तः तत्सर्वनाम्नः अन्यथा अनुदात्ते सत्याख्यातरूपमिति।

**विभक्तिज्ञाने–** विभक्तिनिर्णयेऽपि स्वराणामुपयोगिता दृश्यते। एकाच्प्रातिपदिकानां द्वितीयाबहुवचने पञ्चमीषष्ठी–एकवचने च समानं रूपं भवति। यथा–वाचः। वेदमन्त्रेषु प्रयुक्तः वाचः इतीदं पदं द्वितीयाबहुवचनस्य पञ्चम्यां षष्ठ्यामेकवचनस्य रूपं वा इति निर्णये स्वरा एव निर्णायकाः। यदि प्रत्ययांश उदात्तः तदा पञ्चम्याः षष्ठ्या एकवचनस्य अन्यथा आद्युदात्ते सति द्वितीयाया एकवचनस्य रूपमिति।

एवमेव प्रथमाबहुचनस्य सम्बोधनबहुवचनस्य रूपेऽपि साम्यं भवति। अत्रापि स्वरेणैव निर्णयो भवति। यदा आद्युदात्तः तदा सम्बोधनस्य अन्यथा अन्तोदात्ते प्रथमायाः बहुवचनस्य रूपमिति। यथा–जनासः प्रथमाबहुचनम्, जनासः सम्बोधनबहुवचनम्। एवमेव देवाः प्रथमाबहुवचनम्, देवाः सम्बोधनबहुवचनम्।

**लिङ्गनिर्धारणे–** पदानां लिङ्गनिर्धारणेऽपि स्वराः सहायकाः भवन्ति। मन्त्रेषु कतिपयानां पदानां पुंल्लिङ्गनपुंसकयोः रूपे साम्यं भवति। तत्रापि स्वरेणैव लिङ्गनिर्णयः जातः। आद्युदात्ते नपुंसकस्य अन्तोदात्ते पुंल्लिङ्गस्य चेति। यथा–ब्रह्मन् नपुंसके (प्रार्थना) ब्रह्मन् पुंल्लिङ्गे (स्तुतिगायकः)। अपस् नपुंसके (कार्यम्) अपस् पुंल्लिङ्गे (कार्यकर्ता)।

**समासनिर्धारणे–** समस्तपदेषु समासनिर्धारणेऽपि स्वराणां महत्युपादेयता विद्यते। पाणिनीयशिक्षायाम् इन्द्रशत्रुरित्यस्य पदस्य स्वरपरिवर्तनेन समासपरिवर्तनस्य तदर्थपरिवर्तनस्य



च निदर्शनं निर्दिष्टम्।[7] इन्द्रशत्रुः इत्यस्मिन्पदे चेत्पूर्वपदस्य प्रकृतिस्वरः उदात्तः सः बहुव्रीहिसमासः अन्यथोत्तरपदान्तोदात्ते तत्पुरुषसमासः। यथा–इन्द्रशत्रुः इत्यत्र बहुव्रीहिः इन्द्रशत्रुः इत्यत्र तत्पुरुषः। एवं तत्पुरुषे इन्द्रस्य शत्रुः शतयिता हन्ता वा तथा च बहुव्रीहौ इन्द्रः शत्रुः शातयिता हन्ता वा यस्य सः इत्यर्थः। अत एव स्पष्टमिदं यत् स्वरपरिवर्तनेन समासपरिवर्तनं तथा च समासपरिवर्तनेनार्थपरिवर्तनं भवति।

महाभाष्ये समासनिर्धारणे स्वरोपयोगित्वं प्रतिपादयता पतञ्जलिनापि निदर्शन-मेकमुद्धृतम्–स्थूलपृषतीमिति। यज्ञकाण्डस्य वाक्यमिदम्–"स्थूलपृषतीमाग्निवारुणीमन-ड्ववाहीमालभेत। अत्रापि सन्देहः भवति यत् आलभमाना गौः कीदृशी भवेत्? स्थूला चासौ पृषती चेति स्थूलपृषती कर्मधारयानुसारमथवा स्थूलानि पृषन्ति यस्या सेति स्थूलपृषती बहुव्रीह्यनुसारम्। भाष्यकारानुसारमत्रापि निर्णयः स्वरेणैव जायते। यदि पूर्वपदस्य प्रकृतिस्वर उदात्तः तत् बहुव्रीहिः अन्यथान्तोदात्ते तत्पुरुषः।"

**पदार्थनिर्णये–** समरूपपदस्याप्यर्थवैभिन्यं भवति। तत्र स्वर एव कारणम्। यथा–तृन्तृच् इति प्रत्ययद्वययोगेन समरूपपदस्यैव निष्पत्तिः भवति। परञ्च स्वरभेदेनार्थभेदो जायते। यतो हि तृन्प्रत्ययान्तं प्रातिपादिकम् आद्युदातम्, तत्र धातोः प्रधानत्वं परञ्च तृच्प्रत्ययान्तः अन्तोदातः तत्र प्रत्ययस्य प्रधानत्वमिति। अतो हि तृन्प्रत्ययान्तस्य होतेति पदस्य सम्यग्रूपेणाह्वानकर्त्ता इत्यर्थः परञ्च तृच्प्रत्ययान्तस्य आह्वानकर्त्तेति। एवं होतेति पदे तृन्तृच्प्रत्यययोः भेदः स्वरेणैवावगम्यते। तृन्प्रत्ययान्ते क्रियायाः तृच्प्रत्ययान्ते च कर्त्तुः प्रधानत्वम्। अत एव रूपसाम्यस्य पदस्य स्वरभेदानुसारं पदार्थनिर्धारणं कर्त्तव्यम्। यथोक्तं वेंकटमाधवेन "सर्वत्रैवं समानेषु स्वरेणार्थो व्यवस्थितः।"[8]

एवमेव निपातेषु केचिदुदात्ताः केचित्सर्वानुदात्ताः भवन्ति। तत्रार्थभेद एव कारणम्। नूनम् एव हि–किलेत्यादयः निपाता उदात्ताः सन्ति। अत एवैतेषामर्थप्रधानत्वम् परञ्च वा–इव–उ–ध–ह–चिदादिष्वनुदात्तत्वाद् अर्थप्रधानत्वाभावः। उदात्तेषूपसर्गेषु तेषामर्थस्य प्रधानत्वं परञ्च धातुयोगे अर्थस्याप्रधानत्वमेव। अत्राख्यातस्यैव प्रधानता भवति। अतः क्रियायोगे उपसर्गा अनुदात्ता भवन्ति। यथोक्तम्–

**उदात्तेषूपसर्गेषु तदर्थो हि स्फुटो भवेत्।**
**समस्तेष्वनुदात्तानां नीचैरर्थं प्रदर्शयेत्।।[9]**

**वाक्यार्थनिर्णये–** संहितायां समानम् एव पदं क्वचिद् उदात्तः क्वचिदनुदात्तः भवति। तत्रापि स्वरभेदस्यार्थभेद एव कारणम्। अर्थसाम्ये स्वरवैषम्यं न भवति।

पादादौ विद्यमानः सम्बोधनपदम् आद्युदात्तं भवति यतोहि तस्यार्थस्य प्राधान्यं वाक्यार्थे भवति परञ्च पादमध्ये सर्वानुदात्तः अर्थस्याप्रधानत्वात्। यथोक्तम्–

**आमन्त्रिताद्युदात्तत्वमुच्चैरामन्त्रणे भवेत्।**
**नीचैरामन्त्रणे कार्ये पदं सर्वं निहन्यते।।**[10]

क्वचिद् आख्यातपदोऽप्युदात्तयुक्तः क्वचिच्च सर्वानुदात्तः भवति। आख्यातस्य क्वचिदुदात्तत्वं क्वचिच्चानुदात्तत्वमर्थभेदेनैव जायते। सोदात्तस्य क्रियापदस्य अर्थप्राधान्यम् सर्वानुदात्तस्य चाप्रधानत्वमिति–

**अर्थस्वभावाद् वाक्यस्य मध्यस्थं तन्निहन्यते।**
**अर्थस्वभावादुच्चैस्तं क्वचिन्मध्येऽपि दृश्यते।।**

एवं स्पष्टमिदं यत् पदस्वरूपज्ञानार्थं, पदगतार्थनिर्धारणार्थं वाक्यार्थावबोधनार्थं च स्वराणां ज्ञानस्य महत्युपयोगिता विद्यते।

## सन्दर्भाः


1. पा.शि. 52
2. जै.मी.सू. 9.2.31 शबरस्वामिभाष्यम्।
3. स्वरानुक्रमणी 1.8.2
4. तत्रैव 1.8.1
5. ऋग्वेदभाष्यभूमिका पृ.374
6. ऋग्वेदानुक्रमणः परिशिष्टम् 4, पङ्क्तिः 8
7. द्रष्टव्यम् पा.शि. 52
8. स्वरानुक्रमणी 1.8.6
9. तत्रैव 1.6.8
10. तत्रैव 1.2.1




# यज्ञोपवीतकालविमर्शः

डॉ.नरेन्द्रदत्ततिवारीः

संस्कृते संस्कारशब्दः 'सम्' उपसर्गपूर्वक 'कृ' (डुकृञ् करणे) धातुना 'घञ्' प्रत्ययेन सिद्ध्यति। संस्कारशब्दस्य प्रयोगः अनेकेषु अर्थेषूपलभ्यते। श्रौतकर्मसु चरुपुरोडाशादिद्रव्याणां शुद्ध्यर्थं यत् मार्जनं प्रोक्षणञ्च क्रियते तत् तेषां संस्कारः कथ्यते। वेदान्तन्यायादिशास्त्रेषु संस्कारशब्दस्य प्रयोगः विभिन्नेषु पारिभाषिकेषु अर्थेषु दृश्यते। संस्कृतवाङ्मये संस्कारशब्दः शिक्षणप्रशिक्षणस्वभावस्मरणप्रभावशक्त्यादिषु विभिन्नेषु अर्थेषु प्रयुक्तोऽस्ति।

शाबरभाष्यानुसारेण संस्कारशब्दस्यार्थः, येन कश्चित् पदार्थः व्यक्तिर्वा कस्मैचित् कार्याय योग्यो भवतीति अस्ति। **"संस्कारो नाम स भवति यस्मिञ्जाते पदार्थो भवति योग्यः कस्यचिदर्थस्य।"**[1] तन्त्रवार्तिकानुसारेण संस्कारो नाम क्रिया या योग्यतां प्रददाति। **"योग्यतां चादधानाः संस्कारा इत्युच्यन्ते।"** एषा योग्यता द्विविधा भवति - पापमोचनादुत्पन्ना, नूतनगुणेभ्य उत्पन्ना च। तपसा पापानां दोषाणां वा मार्जनं भवति। संस्कारैः नूतनगुणानामवाप्तिर्भवति। हारीतस्मृत्यनुसारेण एतेषां संस्काराणां ब्राह्मं दिव्यञ्चेति कोटिद्वयमस्ति।

**ब्रह्मसंस्कारसंस्कृत ऋषीणां समानतां गच्छति।**
**दैवेनोत्तरसंस्कारेण संस्कृतो देवानां समानतां गच्छति।।**

स्मृतिषु वर्णितानां ब्राह्मणां गर्भाधानादिसंस्काराणां सम्पादनेन मनुष्य ऋषीणां समकक्षतामुपैति। इष्टिपशुसोमात्मकानां यज्ञानां दैवसंस्काराणां सम्पादनेन मनुष्यः देवत्वं प्राप्नोति। वीरमित्रोदयानुसारेण संस्कारो नाम एका विलक्षणा योग्यता, या शास्त्रविहितानां क्रियाणां सम्पादनेन उत्पद्यते। एषा योग्यता द्विविधा। प्रथमा सा यया व्यक्तिरन्यासां क्रियाणां सम्पादने समर्थो भवति। यथा – उपनयनसंस्कारेण वेदाध्ययनयोग्यता सम्पद्यते। द्वितीया च यया मनुष्यः दोषमुक्तो भवति। यथा – जातकर्मणा वीर्यगर्भवासादिदोषाः नष्टाः भवन्ति। एष संस्कारशब्दः धर्मसूत्रेषु मुहुर्मुहुः लभ्यते।[2] वस्तुतः वेदाध्ययनव्रतहोमत्रैविद्यव्रतपूजासन्तानोत्पत्तिपञ्चमहायज्ञश्रौतयज्ञैः

मनुष्यशरीरं ब्रह्मत्वमवाप्तुं योग्यं भवति। महर्षियाज्ञवाल्क्यानुसारेण संस्काराणां सम्पादनेन वीर्यगर्भवासादिगता दोषा नष्टा भवन्ति।

**गर्भाधानभृतौ पुंसः सवनं स्पन्दनात्पुरा।**
**षष्ठेऽष्टमे वा सीमन्तो मास्येते जातकर्म च।।**
**अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः।**
**षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम्।।**
**एवमेनः शमं याति बीजगर्भसमुद्भवम्।**
**तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः।।**[3]

संस्काराणां विधानमनेकेषु गृह्यसूत्रेषु प्राप्यते, तथापि अङ्गिरसः मते स्वशाखोक्तसंस्काराणामेव अनुष्ठानं कर्तव्यम्।

**स्वे स्वे गृहे यथा प्रोक्तास्तथा संस्कृतयोऽखिलाः।**
**कर्तव्या भूतिकामेन नान्यथा भूतिमृच्छति।।**[4]

वसिष्ठस्मृतौ स्वशाखां विहाय अन्यस्यां शाखायां प्रतिपादितः संस्कारः न सम्पादनीयः। अन्यथा शाखारण्डदोष आपतति।

**न जातु परशाखोक्तं बुधः कर्म समाचरेत्।**
**आचरन् परशाखोक्तं शाखारण्डः स उच्यते।।**

आश्वलायनादिषूपलब्धेषु विभिन्नेषु गृह्यसूत्रेषु संस्काराणां संख्या भिन्ना अस्ति। यथा - आश्वलायनगृह्यसूत्रे एकादश, पारस्करगृह्यसूत्रे त्रयोदश, बौधायनगृह्यसूत्रे त्रयोदश, वीरमित्रोदयगृह्यसूत्रे त्रयोदश, वैखानसगृह्यसूत्रे अष्यदश एवं च गोभिलधर्मसूत्रे चत्वारिंशदिति। महामहोपाध्यायः नित्यानन्दपर्वतीयमहोदयः स्वसंस्कारदीपकनामके ग्रन्थे जातुकर्ण्य ऋषेः वचनानुसारेण षोडशसंस्काराणां वर्णनं कृतवान् अस्ति।

**आधानपुंससीमन्तजातनामान्नचौलकाः ।**
**मौञ्जीव्रतानि गोदानसमावर्तविवाहकाः।।**
**अन्त्यं चैतानि कर्माणि प्रोच्यन्ते षोडशैव तु।**[5]

महर्षिव्यासेनापि षोडशसंस्काराः निरूपिताः। ते च-

**गर्भाधानं पुंसवनं सीमन्तो जातकर्म च।**
**नामक्रिया निष्क्रमोऽन्नप्राशनं वपनक्रिया।।**
**कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः।**
**केशान्तः स्नानमुद्वाहो विवाहोऽग्निपरिग्रहः।।**
**त्रेताग्निसंग्रहश्चैव संस्काराः षोडश स्मृताः।**



उपर्युक्तेषु षोडशसंस्कारेषूपनयनसंस्कारः बहुमहत्त्वपूर्णोऽस्ति यतो हि एतस्य सम्पादनेनैव वेदाध्ययनयोग्यता सम्पद्यते। तत्र उपनयनसंस्कारे मासतिथिनक्षत्राणां फलोद्देशेन विमर्शः प्रस्तुतेऽस्मिन् शोधनिबन्धे क्रियते।

उपनयनं, व्रतबन्धः, मौञ्जीबन्धनं, यज्ञोपवीतमित्यादि सर्वे शब्दाः समानार्थकाः। उपनयनसंस्कारस्य प्रयोजनं द्विजत्वसिद्धिरस्ति। उपनयनस्य कालः त्रिविधोऽस्ति - नित्यः काम्यः गौणश्च। द्विजातीनां विषये पूर्वं नित्यः काम्यश्चोच्यते।

## उपनयनस्य नित्यकालः

ब्राह्मणानामुपनयनं गर्भदिनमारभ्य अष्टमे सौरवर्षे, जननदिनात् अष्टमे सौरवर्षे वा कारणीयम्। अनेनैव प्रकारेण क्षत्रियाणामुपनयनं गर्भादेकादशे जननादेकादशे सौरवर्षे वा कारणीयम्। वैश्यानां गर्भाद् द्वादशे जननाद् द्वादशे सौरवर्षे वा उपनयनं कारणीयम्।

## उपनयनस्य काम्यः कालः

एतेषां ब्रह्मक्षत्रविशां काम्य उपनयनकालः क्रमेणोच्यते। ब्राह्मणानां गर्भात् पञ्चमे सौरवर्षे वैश्यानाञ्च तथैव गर्भाद् जननाद्वा अष्टमे सौरवर्षे काम्योपनयनकालः विहितोऽस्ति। यथोक्तं नारदेन-

**आधानादष्टमे वर्षे जन्मतो वाग्रजन्मनाम्।**
**राज्ञामेकादशे मौञ्जीबन्धनं द्वादशे विशाम्।।**

एतेषां ब्रह्मक्षत्रविशां काम्योपनयनकालस्य कामनानां विषये मनुनोक्तमस्ति-

**ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे।**
**राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे।।**[6]

अर्थात् ब्रह्मवर्चःकामनया विप्राणामुपनयनं पञ्चमे, बलकामनया क्षत्रियाणां षष्ठे, अर्थकामनया वैश्यानाम् अष्टमे वर्षे सम्पादनीयम्। अत्र ब्रह्मवर्चोबलार्थकामनानां संयोगादेते काम्या उच्यन्ते। वसिष्ठेनापि "गर्भपञ्चमेऽब्दे ब्राह्मणमुपनयेद्" इत्युक्त्वा ब्राह्मणानां गर्भात् पञ्चमे वर्षे उपनयनं सम्पादनीयमिति विधानं कृतम्। आपस्तम्बगृह्यसूत्रेऽपि उपनयनकालविषये उक्तमस्ति यत् -

**"गर्भाष्टमेषु ब्राह्मणमुनपयेद् गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यम्।"**

अत्र गर्भाष्टमेष्विति बहुत्वान्यथानुपपत्त्या गर्भषष्ठगर्भसप्तमगर्भाष्टमेषु सौरवर्षेष्विति वृत्तिकृद्व्याख्यानात् त्रयाणामपि नित्यकालता बोद्धव्या। एवं गर्भैकादशेष्वित्यत्र नवमदशमयोः, द्वादशेष्वित्यत्र च दशमैकादशयोः समाहारः कर्तव्यः।

केचित्तु पञ्चमवर्षारम्भात् षोडशवर्षपर्यन्तं काम्याः काला इत्याहुः। यथापस्तम्बेन विश्वप्रकाशपद्धतावुक्तम्–**"पञ्चमे विद्यापुत्रकामः सप्तमे ब्रह्मवर्चसकामोऽष्टमे त्वायुष्कामो नवमे तेजस्कामो दशमेऽन्नाद्यकामः एकादशे इन्द्रियकामो द्वादशे पशुकामः त्रयोदशे जयकामश्चतुर्दशे पौरुषकामः पञ्चदशे पूर्णकामः षोडशे राज्यकामः।।"**

**उपनयनस्य गौणकालः–**ब्रह्मक्षत्रविशां यः कालः नित्यत्वेनोक्तः तदपेक्षया ब्राह्मणस्य षोडशवर्षपर्यन्तं, क्षत्रियस्य द्वाविंशतिवर्षपर्यन्तं, वैश्यस्य च चतुर्विंशतिवर्षपर्यन्तं कालः गौणत्वेनोच्यते। यथोक्तं मनुना–

**आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्त्तते।**
**आब्दाद् विंशात् क्षत्रबन्धोराचतुर्विंशतेर्विशः।।**
**अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः।**
**सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः।।**[7] इति

अर्थात् गौणकालेप्यतिक्रान्ते सति ते व्रात्याः भवन्ति। एते यथा याज्ञवल्क्येनोक्तं सर्वधर्मबहिष्कृताः भवन्ति।

**अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।**
**सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः।।**[8]

**उपनयनस्य मासाः –** द्विजातीनामुपनयनार्थं वटोः कल्याणार्थं च मासाः उक्ताः सन्ति। तत्र ब्राह्मणस्य वसन्तर्तौ, क्षत्रियस्य ग्रीष्मर्तौ, वैश्यस्य शरदृतावुपनयनं कार्यम्। यथा वसिष्ठेनोक्तम्–

**विप्राणामुपनयनं वसन्तसमये धराधिनाथानाम्।**
**ग्रीष्मर्तौ शरदि विशां मासाः साधारणाश्च माघाद्याः।।**

कश्यपोऽपि एतदेव समर्थयति–

**ऋतौ वसन्ते विप्राणां ग्रीष्मे राज्ञां शरद्यथ।**
**विशां मुख्यं च सर्वेषां द्विजानां चोपनयनम्।।**

उपर्युक्तेषु मासेषु उपनयनसम्पादनेन किञ्चित् विशिष्टं फलं भवति। यथा नारदेनोक्तम् -

**स्वकुलाचारधर्मज्ञो माघमासे तु फाल्गुने।**
**विधिज्ञश्चार्थवाँश्चैत्रे वेदवेदाङ्गपारगः।।**
**वैशाखे धनवान् वेदशास्त्रविद्याविशारदः।**
**उपनीतः कुलाढ्यः स्याज्ज्येष्ठे विधिविदां वरः।।**



एतस्मिन् विषये कैश्चिच्चण्डेश्वराद्यैः द्वादशमासानां फलमपि उक्तम्-

**माघे द्रविणशीलाढ्यः फाल्गुने च दृढव्रतः।**
**चैत्रे भवति मेधावी वैशाखे कोविदो भवेत्।।**
**ज्येष्ठे गृहनीतिज्ञ आषाढे क्रतुभाग्भवेत्।**
**मार्गशीर्षे भवेद् भ्रष्टः शेषे दुःखमवाप्नुयात्।।**

ब्राह्मणस्य वसन्तर्तौ अर्थात् माघफाल्गुनमासयोः, क्षत्रियाणां ग्रीष्मर्तौ अर्थात् चैत्रवैशाखमासयोः, वैश्यस्य शरदि अर्थात् ज्येष्ठाषाढयोः उपनयनं कारणीयम्। अत्र आषाढेऽपि हरिशयनात्प्रागेव कार्यं हरिशयनानन्तरम् न कार्यम्। तत्रापि हरिशयनात्प्रागपि सूर्यस्य मिथुनराशिस्थिते सत्येव, कर्कराशिस्थिते सति उपनयनं न कार्यं यतो हि तद्दक्षिणायनान्तःपाति भवति। किञ्च मिथुनराशौ सूर्ये स्थिते सत्यपि तस्मात् सार्द्धषड्दिनानन्तरं व्रतबन्धादीनां निषेधात्। यथोक्तम्–

**"आर्द्रादिकस्वातिविरामकाले नक्षत्रे वृन्ददशके रविश्चेत्।**
**विवाहचौलव्रतबन्धनाद्यं सुरप्रतिष्ठापि न कार्यमेव।।"**

यज्ञोपवीतसंस्कारः क्षिप्रा अर्थात् अश्विनीपुष्यहस्ताः, ध्रुवा उत्तराफाल्गुन्युत्तराषाढोत्तराभाद्रपदास्तिस्र उत्तररोहिणी च, अहिराश्लेषा, चराणि श्रवणधनिष्ठाशतभिषापुनर्वसुस्वात्यः, मूलं विंशाखाकृत्तिके, पूर्वफाल्गुनिपूर्वाषाढपूर्वभाद्रपदाः, रौद्रमार्द्राः एतेषु द्वाविंशतिनक्षत्रेषु व्रतबन्धनञ्चेत् शुभफलदं भवेत्। उक्तञ्च –

**"प्राजापत्यादिषड्क्षे भगर्क्षादिषु पञ्चसु।**
**मूलादिदशके चैव समैत्रे व्रतबन्धनम्।।"**

अर्थाद् भरणीकृत्तिकामघाविशाखाज्येष्ठासु व्रतबन्धनं न कार्यम्।

**उपनयने मुख्यानि नक्षत्राणि–** वसिष्ठेनोपनयने मुख्यानि नक्षत्राण्युक्तानि–

**"हस्तत्रये च श्रवणत्रये च धातृद्वयेत्युत्तरमैत्रभेषु।**
**पौष्णद्वये चादितिभद्वये च शस्तं द्विजानां खलु मौञ्जिकर्म।।"**

काश्यपेनापि निरूपितम्–

**"मैत्रविष्णुत्रये हस्तत्रयेर्क्षे चोत्तरात्रये।**
**धातृद्वयादितीज्यांत्यस्त्रर्क्षेषूपनायनम्।।"**

अर्थादार्द्राश्लेषाभरणीकृत्तिकाज्येष्ठाविशाखामघापूर्वात्रयमूलानि निन्द्यानि।

बृहस्पतिनापि उक्तम् –

**कृत्तिकाभरणीमूलज्येष्ठार्द्रासु विशाखयोः।**
**पूर्वात्रये च सापर्क्षे न कुर्यादौपनायनम्।।**

चकारान्मघायामपि। अर्थात् कृत्तिकाभरणीमूलज्येष्ठार्द्राविशाखामघासु उपनयनसंस्कारः न कार्यः। पुनश्च राजमार्तण्डः ब्राह्मणस्य पुनर्वसुनक्षत्रे निषेधमाह–

**"चन्द्रतारानुकूलेषु ग्रहाब्देषु शुभेष्वपि।**
**पुनर्वसौ कृतो विप्रः पुनः संस्कारमर्हति।।"**

चन्द्रतारकाः अनुकूलाः स्युः ग्रहादिकमपि शुभं स्यात् तथापि पुनर्वसुनक्षत्रे यदि विप्राणां संस्कारः क्रियते तर्हि तस्य पुनः संस्कारः कार्यः। अर्थात् पुनर्वसौ कृतः उपनयनसंस्कारः व्यर्थः भवति। अन्यत्रापि दृश्यते–

**अहः स्पृशिमूले मासि शूद्रत्वमधिगच्छति।।**

उपर्युक्ते श्लोके विप्रः कृत इति पदद्वयोपादानादितरयोः क्षत्रियविशोः पुनर्वसौ व्रतबन्धो ब्राह्मणस्य मेखलामोक्षश्च प्रशस्त इत्यर्थः। केचित्तु केनचिन्निमित्तेन कर्मनाशानदीतरणाद्यनेकदुष्टकृत्येन पुनः संस्कारे प्राप्ते सति विप्रः पुनर्वसौ पुनः संस्कारमर्हतीति न व्रतबन्धनिषेध इत्येवं व्याचक्षते। तद्विचारणीयम्। यतः "जीवार्केन्दुशुद्धौ हरिशयनबहिर्भास्करे चोत्तरस्थे स्वाध्याये वेदवर्णाधिप इह शुभदे क्षौरभेनादितौ च। शुक्रार्केज्यर्क्षलग्ने रविमदनतिथिं प्रोह्यषष्ठ्यष्टमेन्दुनो जीवास्तातिचारेऽर्कसितगुरुदिने कालशुद्धौ व्रतं स्यात्।"

दीपिकायां पुनर्वसुनक्षत्रविषयकव्रतबन्धंस्यैव सामान्यनिषेधोक्तेः विशेषवचनात् ब्राह्मणे एव निषेधः पर्यवसन्नः।

**उपनयने प्रशस्ताः दिवसाः –** सूर्यबुधगुरुशुक्रचन्द्रदिवसेषु उपनयनसंस्कारः पूर्णतामेति। एते दिवसाः उपनयनकर्मणि प्रशस्ताः सन्ति। एतान् विहाय अन्यौ भौमशनिवासरौ उपनयने निषिद्धौ स्तः। यथोक्तं नारदेन –

**आचार्यकाव्यसौम्यानां वाराः शस्ताः शशीनयोः।**
**वारौ तौ मध्यफलदौ निन्दितावितरौ व्रते।।**

बृहस्पतिनापि उक्तम्–

**पापग्रहाणां वाराः स्युर्न शुभश्चन्द्रवासरः।**
**सिते पक्षे प्रशस्तः स्यात् कृष्णे वारो विधेर्नहि।।**
**शुभो बुधो नास्तमितः पापग्रहयुतोऽपि वा।।**

उपर्युक्तयोः निषिद्धयोः भौमशनिवासरयोः भौमवासरः सामवेदिनालङ्कृतोऽतिप्रशस्तोऽस्ति। यथोक्तं नारदेन –

**शाखाधिपतिवारश्च शाखाधिपबलं शिशोः।**
**शाखाधिपतिलग्नं च त्रितयं दुर्लभं व्रते।।**



एतस्मात् कारणात् सामवेदिनः प्रायः भौमवासरे एव उपनयनसंस्कारं कुर्वन्ति कारयन्ति च।

## उपनयने तिथयः

उपनयनसंस्कारे द्वितीयातृतीयापञ्चम्येकादशीद्वादशीदशमीतिथयः प्रशस्ता उक्ताः। यथोक्तं नारदेन–

**शुक्लपक्षे द्वितीया च तृतीयापञ्चमी तथा।**
**त्रयोदशी च दशमी सप्तमी व्रतबन्धने।।**
**श्रेष्ठास्त्वेकादशी षष्ठी द्वादश्येतास्तु मध्यमाः।**
**एकां चतुर्थीं संत्यज्य कृष्णपक्षेऽपि मध्यमाः।।**

उपनयने शुक्लपक्षस्य द्वितीयातृतीयापञ्चमीत्रयोदशीदशमीसप्तमीतिथयः प्रशस्ताः सन्ति। अथ च.एकादशीषष्ठीद्वादशीतिथयः तु मध्यमाः मध्यफलदा उक्ताः। यथोक्तम्-

**प्रतिपदि मदिरासक्तः श्रुतिधरमेधाधिपो द्वितीयायाम्।**
**नीतिज्ञो मेधावी जितसकलारिस्तृतीयायाम्।।**
**मन्दधिया हतचित्तोऽधीतश्चपलश्चतुर्थ्यां स्यात्।**
**पञ्चम्यां बहुवित्तः पूर्णायुर्धनपतिर्मतिमान्।।**
**षष्ठ्यामशुचिः सततं सप्तम्यां व्याधिसंतप्तः।**
**अल्पायुरथाष्टम्यां नवम्यां धनवर्जितः सदा परुषः।।**
**दशम्यामर्थसम्पत्तिरेकादश्यां गुणान्वितः।।**
**द्वादश्यां नीतिशास्त्रज्ञो निधनाय त्रयोदशी।**
**चतुर्दश्यां भवेन्नाशः पञ्चदश्यां क्षयो भवेत्।।**

एतावता उपर्युक्तप्रकारेण तिथिवारनक्षत्रादीन् सम्यक् विचिन्त्य यदि यज्ञोपवीत-संस्कारः क्रियते तर्हि सः संस्कारः तस्य माणवकस्य अभ्युदयाय भवेत्।

## सन्दर्भाः


1. शाबरभाष्यम् - 3.1.3
2. गोभिलधर्मसूत्रम् - 8.8
3. याज्ञवल्क्यस्मृतिः - 1.11-13
4. अङ्गिरस्मृतिः
5. संस्कारदीपकः भाग - 2, पृ. सं. 1।
6. मनु. 2.37
7. मनु. 2.38-39
8. याज्ञ. 1.2.38




# वाल्मीकीयरामायणे कर्ममीमांसा

**डॉ. पूनम शर्मा**

भारतीयदर्शने पुरुषार्थकल्पनायाः पूर्वपीठिकायां कर्मवादो जीवस्यामरत्वञ्चेति मिथः सम्बद्धं सिद्धान्तद्वयं प्रवर्तते। वैदिकमन्त्रेष्वमरत्वलाभाय प्रार्थनाः लभ्यन्ते। यमलोकं प्राप्तस्य जीवस्य पुनः शरीरान्तरप्राप्तेः निर्देशो वर्तते।[1] इयं शरीरान्तरप्राप्तिः कर्मानुसारिणी भवतीति दर्शनेषु सर्वत्र विवेचिता। कर्मवादानुसारेण जीवने शरीरान्तरे च कर्माण्याश्रित्य शुभाशुभं फलं पुनर्जन्म चाप्नोति जीवः। बृहदारण्यके कथ्यते यत्पुरुषस्य मृतस्य कर्म न जहाति, पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेनेति।[2] वाल्मीकीये रामायणे त्वस्य कर्मवादस्य व्यावहारिकी व्याख्योपलभ्यते।

वाल्मीकिः प्रतिपादयति यन्मानवस्य सुखदुःखे तस्य कर्मानुसरतः। मानवस्य जीवने सर्वोपलब्धिः कर्मनिर्जितैव भवति –

**ऋद्धिं रूपं बलं पुत्रान् वित्तं शूरत्वमेव च।**
**प्राप्नुवन्ति नरा लोके निर्जितं पुण्यकर्मभिः।।[3]**

जीवनस्य मूलं प्रयोजकं मानवकृतं कर्मेति तत्र निरूपितम् –

**कर्म चैव हि सर्वेषां कारणानां प्रयोजकम्।[4]**

जाबालिमतस्य निरसनप्रसङ्गे रामः कथयति यत् सर्वा पृथ्वी कर्मभूमिरेव, तत्र कृतस्य कर्मणः फलं न केवलं मानवाः प्रत्युत देवा अपि भजन्ते–

**कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम्।**
**अग्निर्वायुश्च सोमश्च कर्मणां फलभागिनः।।[5]**

पातकं तु मनसा वचसा कर्मणा चेति क्रियमाणं त्रिविधं भवतीति तत्रैव राम आह।[6] त्रिविधमेव शोभनमपि कर्म पुण्यावहमिति सत्यसन्धत्वं समादृतम्।

कर्मवादश्चायं कार्यकारणसिद्धान्तानुबन्धी विद्यते। तथाहि–

**'यादृशं कुरुते कर्म तादृशं फलमश्नुते।[7]** इति सिद्धान्तस्तद्विषयकः प्रतिपादितो वर्तते। तस्मिन् विश्वासोत्पादनाय तत्रैव श्लोकान्तरे कथितम् –

**यो हि मोहाद् विषं पीत्वा नावगच्छति दुर्मतिः।**
**स तस्य परिणामान्ते जानीते कमणः फलम्।।**[8]

कर्मणः कर्ता अवश्यमेव कर्मानुसारेण शुभं चाशुभं फलं लभते इति न सन्देहः। दशरथो मृत्युकाले स्वस्य कर्मणः एव समागतं पुत्रवियोगफलमिति कौसल्यां सम्बोधयति–

**यदाचरति कल्याणि! शुभं वा यदि वाशुभम्।**
**तदेव लभते भद्रे कर्ता कर्मजमात्मनः।।**[9]

दृष्यन्तरूपेण आदिकविर्विभीषणस्य रावणस्य च कर्मफलं प्रस्तौति। यथा–

**शुभकृच्छुभमाप्नोति पापकृत्पापमश्नुते।**
**विभीषणः सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम्।।**[10]

अशोकवनिकायां बन्दिनी सीता युगपदेव कर्मवादे पुनर्जन्मवादे च विश्वासं प्रकटयन्ती कथयति–

**कीदृशं तु महापापं मया देहान्तरे कृतम्।**
**येनेदं प्राप्यते घोरं महादुःखं सुदारुणम्।।**[11]

एवमेव स्वस्य दुःखस्य परम्परां निर्वर्णयन् महानायको रामोऽपि प्राह –

**पूर्वं मया नूनमभीप्सितानि पापानि कर्माण्यसकृत्कृतानि।**
**तत्रायमद्यापतितो विपाको दुःखेन दुःखं यदहं विशामि।।**[12]

कर्मवादे नियमोऽयं वर्तते यत्कर्तारमेव कर्म फलेन योजयति, नान्यकृतस्य कर्मणः फलमन्यो लभत इति। न च कृतं कर्म विनष्टं जायते। इत्थं कृतप्रणाशस्य अकृताभ्यागमस्य च प्रसङ्गो नोदेति। सामान्यतः कर्मारम्भकाले विवेकशीलो जनस्तत्कर्मणः परिणाममपि विचारयति। किन्तु मूर्खाः कालस्य वशीभूताः सन्तः रावणवन्न कर्मपरिणामं चिन्तयन्ति। विनाशकाले समापन्ने कर्मविषये प्रमादः स्वभावतो दृश्यते इति सीता रावणं कथयति–

**यदा विनाशो भूतानां दृश्यते कालचोदितः।**
**तदा कार्ये प्रमाद्यन्ति नराः कालवशं गताः।।**[13]

कर्मपरिपाकश्च कालापेक्षी भवति। न हि बीजवपनादनन्तरमेव ब्रीहिः फलति। कर्मानुसारेण कर्तारमपेक्ष्य फलं पचति। तथापि फलसमयो नियत एव भवति। किन्तु क्रिययोद्योगेन च फलं प्रकाशयितुं शक्यते। इमामेव युक्तिं पुरस्कृत्य लक्ष्मणो रामं सीतान्वेषणाय प्रोत्साहयति–**सोत्साहता चास्तु विमार्गणेऽस्याः।**[14]

रामायणेऽयमपि सिद्धान्तः प्राप्यते यदुग्रयोः पापपुण्ययोः फलं सत्वरमेवावाप्यते।



कुम्भकर्णः कथयति–

**शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः।**
**निरयेष्वेव पतनं यथा दुष्कृतकर्मणः।।**[15]

तेजस्विभिर्ऋषिभिः दत्तेन शापेनापि त्वरितमेव कर्मफलं प्राप्यते, किन्तु वाल्मीकिरेतस्य शापविधेर्विरोधं करोति। श्रेष्ठ जनाः क्षमां कुर्वन्ति, न शापेनात्महानिं कुर्वन्ति। अत एव क्रूरकर्माणोऽपि न पुरुषैस्तपस्विभिः दण्डनीयाः। तथा च सीता हनुमन्तं कथयति–

**लोकहिंसाविहाराणां क्रूराणां पापकर्मणाम्।**
**कुर्वतामपि पापानां नैव कार्यमशोभनम्।।**[16]

एवं सति परमेश्वरे एव न्यायव्यवस्थाया भारो वर्तते। स एव पापिनां दण्डप्रक्रियां व्यवस्थापयेत्। किन्तु तत्रापि कश्चित्साधनीभूतो भवतीति न विस्मरणीयम्। अशुभानां कर्मणां फलप्रशमनार्थं धर्माचरणं च सर्वत्र विहितमिति रामायणेऽपि तद्विचारितम्। तीर्थयात्रा, पुण्यकथाश्रवणं, गङ्गास्नानं, यज्ञस्तपस्या चेति सर्वमशुभकर्मफलनाशकं मन्यते। एवमेव यदि कश्चिदपराधी राजदण्डं प्राप्नोति तदा निरयभयान्मुच्यते –

**त्वया शस्तस्य राजेन्द्र नास्ति मे नरकाद् भयम्।।**[17]

समांसतः कथयितुमिदमलं वर्तते यद् रामायणे कर्मणः जीवनप्रयोजकता निरूपिता। यच्चानुभवविषयकमस्माकं जीवने प्राप्तं तत्सर्वमेव कर्मणः परिणामरूपेण चिन्तनीयम्। सदैव लोकहिताय प्रयतेत मनुष्यः, न तु शास्त्रेषु गर्हितं किमप्याचरणीयम्।

## सन्दर्भाः


1. ऋग्वेदे 10.58.1
2. बृहदारण्यकोपनिषदि 3.2.13
3. रामा. 7.15.25
4. रामा. 6.64.7
5. रामा. 2.109.28

6. रामा. 2.109.21

7. रामा 7.15.24

8. रामा. 7.15.20

9. रामा. 2.63.6

10. रामा. 6.111.25

11. रामा. 5.25.18

12. रामा. 3.63.4

13. रामा. 3.56.16

14. रामा. 3.63.19

15. रामा. 6.63.3

16. रामा. 6.113.45

17. रामा. 7.59.(2).30



# मधुररसविमर्शः

प्रभातीमिश्रः

भगवन्तं प्रति शृङ्गारभावविशेषो हि भक्तिशास्त्रे माधुर्यभाव उच्यते। माधुर्यभावभावितात्मा कान्ताभिमानी भक्तः भगवतः समक्षं स्वकीयप्रणयनिवेदनपूर्वकं पूर्णतया आत्मसमर्पणं कृत्वा जगत्स्रष्टारं परमेश्वरं परमप्रियतमरूपेण नितरां कामयते। तस्य सः माधुर्यभावः काव्यनाटकाद्यैः आधुनिकानां भक्तानां हृदि चरमास्वाद्यतां प्राप्य मधुररससंज्ञां लभते।

परंब्रह्मणः ऐश्वर्यमाधुर्याख्यौ द्वौ भावौ स्तः। भगवान् स्वकीयेन ऐश्वर्यभावेन जगतः नियन्त्रकः, सतां पालकः, धर्मप्रतिष्ठाता, विश्वस्यास्य सृष्टि-स्थिति-प्रलयकारी, परमेश्वरः, परमैश्वर्यसम्पन्नः भवति। यमाश्रित्य माया सर्वमिदं प्रपञ्चं सृजति। सः जगतः आदिः मध्यः अन्तश्च। पक्षान्तरे माधुर्यभावे सः मधुरस्वरूपः आनन्दस्वरूपः, भक्तस्य विश्रम्भात्मकप्रेम्णः विषयः, परमप्रेमस्वरूपो भवति। तस्य माधुर्यं निर्वर्णयन् कृष्णकर्णामृते उक्तम्–

**मधुरं मधुरं वपुरस्य विभो, मधुरं मधुरं वदनं मधुरम्।**
**मधुगन्धि मृदु स्मितमेतदहो, मधुरं मधुरं मधुरं मधुरम्।।[1]**

सः मधुभ्योऽपि मधुरः। भक्तानां प्रेमपूतदृष्टौ सः मधुमयः, जगति सर्वेभ्यः प्रियतमः।[2] परमानन्दस्वरूपः सः। तैत्तिरीयोपनिषदुक्तः स्वयं रसस्वरूपः।[3] परम-काम्यः सः प्रियतमः आनन्दघनश्च भवति।[4] लीलार्थं धृतनरदेहः सः मानवधर्मी मानवसदृशश्च। अतः प्रेमार्द्रः सः भक्तानां परमाश्रयो भवति। माधुर्यभावेन सः भक्तानां निकटतरः परमप्रियश्च भवति। ऐश्वर्यभावेन सः यतोऽधिकः जीवेभ्यः जगतश्च भिन्नः महान् च प्रतीयते, माधुर्यभावेन सः ततोऽधिकः भक्तानां परमप्रियः निकटतरः आत्मीयश्च। माधुर्यभावे लीलाप्राधान्यात् सर्वमेव मधुमयं प्रतिभाति। प्रेम्णः पूतधारायां सिक्तः समस्तजडजगच्चैतन्यं प्राप्नोति। स्वयं भगवत्स्वरूपः सोऽपि महानन्दं लभते। इदं हि तस्य माधुर्यभावस्य वैशिष्ट्यम्।

भगवतः माधुर्यभावः आकर्षणमयो भावविशेषः भवति। एतद्भावोपासको भक्तः भगवद्रतौ निमग्नः सन् मोक्षमपि तुच्छम् आकलयति। तस्य दृष्टौ माधुर्यभावस्य मुख्यता सततं परिलक्ष्यते। माधुर्यभावयुक्तं भगवन्तं सर्वदा चिन्तयन् सः परमेश्वरम्

आत्मनः सखायं प्रियं वा गणयति। भक्तिशास्त्रे भक्तस्य इयं प्रीतिः मधुरा रतिः कान्तारतिर्वा उच्यते। अत्र भगवान् कान्तः भक्तश्च कान्ताभिमानी भवतः।

हजारीप्रसादमहोदयस्य विचारानुसारम् आगमशास्त्रिणां मते च यदा भगवान् लीलार्थं सृष्टिमसृजत्, तदा सः आत्मानं द्विधा कृतवान्। एकः नारायणस्वरूपः अपरस्तु शक्तिस्वरूपः लक्ष्मीस्वरूपो वा। लक्ष्मीस्वरूपः निषेधव्यापारात्मकताहेतोः सर्वदा आत्मसमर्पणे एव सार्थको भवति। नारायणस्वरूपोऽपि लक्ष्मीस्वरूपनिमित्तं "कञ्चित्" अभावम् अनुभवति।[5] अतः द्वयोर्मध्ये पारस्परिकः अभावः, तदर्थं च अपेक्षा विद्यते। आत्मसमर्पणात्मिकायाः शक्तेः परिप्रकाशः भक्तेषु एव भवति। अतः भक्तः कदाचित् सखिभावेन पुत्रभावेन दासभावेन प्रियभावेन वा आत्मसमर्पणाभिमुखी भवति। एषु कान्ताभावेन आत्मसमर्पणन्तु चरमसीमानं स्पृशति। अतः कान्ताभावेन भगवत्सेवा एव श्रेष्ठा इति स्वीक्रियते। कान्ताभावोऽयं माधुर्यभावः उच्यते। भक्तिशास्त्रकारैः भक्तेः बहुविधतायां स्वीकृतायामपि माधुर्यस्य स्वातन्त्र्यं सर्वाधिकत्वञ्च सर्वसम्मतम्। माधुर्यभावः साधारणतः शुद्धकान्ताभावः, सखिभावः, अनुगाकान्ताभावः इति भेदैः त्रिविधात्मको भवतीति स्वीक्रियते।

भगवतः समीपवर्त्ती भवितुम् उपायान्तरेषु सत्स्वपि ज्ञानाज्ञानपरिसीमास्पृष्टं लौकिकविषयवासनात्यागाऽभावात्मकं भक्तिरूपम् उपायमाश्रित्य भक्तः अनायासेन परमेश्वरस्य निकटतरः आत्मीयः भवितुमर्हति। भक्तः यदा प्रेमप्रणयम् आश्रित्य भगवत्पदारविन्दे आत्मानं पूर्णरूपेण समर्पयति, तस्य भगवत्प्रेम यदा चरमसीमानं स्पृशति, तत्समक्षं मोक्षादयः निःसारतां भजन्ते, तदा सः स्वयं भगवतः निकटतरः भूत्वा तत्रैव एकात्मतां लभते। सा हि सृष्टौ सर्वेभ्यः मधुरतमावस्था। स हि मधुरतमः भावविशेषः, यम् पूर्णकामः स्वयं भगवान् अपि भक्तेभ्यः कामयते। स हि तस्य कृते "कश्चित्" अभावः।

प्रेम्णः चरमसीम्न्युपनीतः भक्तचित्तस्थो भगवदभिलाषः माधुर्यसंज्ञकः भवति। कान्ताभिमानी भक्तो हि तत्सीमाधिकारी भवितुमर्हति। भगवन्तं प्रति भक्तस्य कामार्पणं हि माधुर्यभावः उच्यते। तस्य माधुर्यभावस्य उत्पत्तिः स्वीकारश्च कदा कस्मिन्नवसरे अभूदिति प्रश्नः मनसि स्वतः जायते। अनुध्यानात् एतत् स्पष्टं भवति यत्, वैदिककाले भक्तिः श्रद्धास्वरूपा आसीत्। माधुर्यभावस्योल्लेखः तत्र नोपलभ्यते। ऋग्वेदस्य एकस्मिन् मन्त्रे माधुर्यभावपरकः उपमालंकारः संदृश्यते।[6] संहितायाम् एतदतिरिक्तः अन्यत्र कुत्रापि अन्यत्र माधुर्यभावस्योल्लेखो नास्ति। ब्राह्मणारण्यकेष्वपि तदुल्लेखो नोपलभ्यते। उपनिषदि भक्तेरुल्लेखः प्रथमतया कृतः।[7] परन्तु नास्ति तत्र



माधुर्यभावस्योपरि कोऽपि विचारः। क्वचित्तु दृष्टान्तरूपेण अस्योल्लेखः उपलभ्यते। भगवद्गीतायां भक्तेः नवभेदेषु माधुर्यस्य गणना अस्ति, परन्तु माधुर्यभावस्य शास्त्रीयपद्धत्या प्राधान्येन च उल्लेखः श्रीमद्भागवते एव संदृश्यते। अतः मधुराभक्तेः माधुर्यभावस्य वा शास्त्रसम्मतमर्यादायाः, लोकप्रियतायाः स्रोतः भागवतादेव निःसृतम् इति निश्चीयते। तत्र पञ्चविधभक्तिभावनां विचारपूर्वकं मधुरभक्तिभावस्य औत्कर्ष्यं प्रतिपादितम्। मधुरभक्तेः मधुरलीलायाः वर्णनं प्रायतः पुराणादिषु एव प्राचुर्यम् अलभत। षष्ठशताब्द्यां दक्षिणभारतीयसम्प्रदायान्तर्गते आलावारसम्प्रदाये गीतमाध्यमेन माधुर्यभावः गीयते स्म। आचार्ययुगे भिन्नभिन्नेषु सम्प्रदायेषु मुख्यगौणतया माधुर्यस्योल्लेखः परिलक्ष्यते, तेषु वल्लभसम्प्रदाये भक्तिः पूर्णतया प्रेमरूपतामलभत। शाण्डिल्यभक्तिसूत्रे नारदभक्तिसूत्रे च भक्तेः शास्त्रीयविचारः सम्यक् उपलभ्यते। तत्र नारदभक्तिसूत्रे भक्तेः "तदर्पित......"[8] इत्यादिकं लक्षणं कृतम्। गोपीप्रेम अत्र भक्तेः दृष्टान्तरूपेण[9] उपन्यस्तम्, येन मधुराभक्तेः महत्त्वं प्रतिपादितम्। अनेन च मधुराभक्तेः भिन्नभूमिः संस्थापिता एव। पञ्चदशशतके गौडीयवैष्णवानां मधुराभक्तेः शास्त्रीयविचारविश्लेषणं रसरूपताप्रतिपादनञ्च माधुर्यभावं चरमपर्याये स्थापितवती। वैष्णवानां मान्यतानुसारं माधुर्यभावः प्रमाणमूलकतया आधारग्रन्थरूपेण च श्रीमद्भागवतब्रह्मवैवर्त्तपुराणे स्वीकृतः। गौडीयवैष्णवैस्तु श्रीमद्भागवतपुराणम् एव मधुराभक्तेः आधारंग्रन्थरूपेण स्वीकृतम्।

गौडीयवैष्णवानां साहित्ये सा मधुराभक्तिः रतिभावसंज्ञां लब्ध्वा अनुकूलविभावाद्यैः परिपुष्य भवन्ती मधुरभक्तिरसे परिणमते इति स्वीकृतम्।[10] भागवते प्रतिष्ठितः माधुर्यभावः गौडीयवैष्णवानां साहित्ये रसपरिसरान्तर्भुक्तोऽभवत्।

माधुर्यभावः, भगवति आत्मसमर्पणात्मकप्रेमभावः वा यदा अनुकूलविभावैः श्रीकृष्णतद्वल्लभवंशीस्वनयमुनाकुञ्जादिभिः, अनुभावैः नृत्यविलुठितगीतादिभिः, सात्त्विकैः स्वेदरोमाञ्चाश्रुपातादिभिः, व्यभिचारिभिः स्तम्भनिर्वेदादिभिः परिपुष्टो भवन् आधुनिकैः भक्तसहृदयैः आस्वाद्यते, तदा 'स्थायी'ति पदवाच्यः "मधुरारति"संज्ञकः माधुर्यभावः मधुररससंज्ञां लभते। स एव रूपगोस्वामिना प्रतिपादितः भक्तिरसराट् मधुरः इति।

गौडीयवैष्णवाचार्याः प्राधान्यतः मधुरोपासकाः आसन्। एभिः आचार्यैः विचारितः माधुर्यभावः मधुररसश्च अलंकारसाहित्यजगति विलक्षणसिद्धान्ततया स्वीक्रियते। अस्य रसस्य आस्वादनम् कान्ताभावाश्रयव्यतिरिक्तं न भवति। कान्ताभावस्याधारः यद्यपि कामः रतिर्वा भवति, परन्तु इयं रतिः लौकिकी न। यतः अत्र वासनामूलकस्वार्थतर्पणस्य अवकाशः नास्ति। अत्र रतिः कृष्णसुखेच्छामयी भवति,

न तु स्वसुखेच्छामयी। तत्सुखसुखित्वरूपा इयं भावना कैश्चित् आधुनिकैः कामस्य लौकिकरतेर्वा चरमोन्नतिः इति स्वीकृतम्।

जयशङ्करप्रसादमहोदयेन "काव्यकला और अन्य निबन्ध" ग्रन्थे मंधुररसस्य शृङ्गारान्तर्गततायाः हेतुतया उक्तम्, यथा–'वस्तुतः मधुर या भक्तिरस शृङ्गाररस का ही दार्शनिक रूपान्तर है। शृङ्गार की धारा ही दूसरे रूप में दार्शनिक पृष्ठभूमि पर भक्तिरस के रूप में बह चली।'[11]

यद्यपि कैश्चिदालोचकैः मधुररसः शृङ्गाररसस्य हि भक्तिपरकरूपान्तरम् इति स्वीकृतस्तथापि अनेकैः आलोचकैरपि भक्तिशास्त्रमर्यादानुसारं मतमिदं न स्वीकृतम्। तेषां मते शृङ्गारः जडप्रधानः कामाश्रितः, मधुरस्तु विशुद्धप्रेमाश्रितो भवति।[12] प्राकृतानां जडभावोपपन्नानां लौकिकशृङ्गारान्वितानां विषयः तथा मधुरभावान्वितानां विषयः एकः न। यतः शृङ्गारः काममूलकः मधुरस्तु प्रेममूलको भवति। वैषयिकसुखकामनाप्रधान्यात् लौकिकशृङ्गारः कामप्रधानः इत्युच्यते। निष्कामताशुचितात्मोत्सर्गप्रधानताहेतोः भगवद्रतिः प्रेमप्रधानेति स्वीक्रियते। अत्र प्रेमी प्रेमतत्परो भवति। भगवत्प्रीत्यतिरिक्त-विषयान्तरज्ञानशून्यः सः भवति। अतः गोपीनां प्रेमकामयोः भेदः नास्तीति स्वीक्रियते। तासां सर्वकामनानामाश्रयः स्वयं प्रेमस्वरूपः भगवान् श्रीकृष्णः भवति। अतः तासां प्रणयः स्वतः एवं कृष्णसुखेच्छाप्रधानात्मकः भवति। लौकिकशृङ्गारे तु आत्मेन्द्रियसुखप्रधान्यमनुभूयते। अतः मधुरशृङ्गारयोर्मध्ये भेदः अस्तीति स्वीकरणीयम्।

द्वितीयतः शृङ्गाररसः पूर्णतया ऐहिकः लौकिकश्च भवति। मधुरस्तु पूर्णतः आध्यात्मिकः पारलौकिकश्च भवति। शृङ्गाररसे वैषयिकानन्दः अनुभूयते मधुररसे तु पारमार्थिकसुखानन्दानुभवो भवति। अतः शृङ्गाररसास्वादः ब्रह्मानन्दसहोदरः मधुररसास्वादस्तु ब्रह्मानन्दतुल्य इति स्वीक्रियते। शृङ्गाररसस्य आलम्बनविभावः प्राकृतपुरुषो भवति, मधुररसस्य तु स्वयं जगदाधारभूतः रसमूर्तिः परमेश्वरः भवति। शृङ्गाररसे रतिः परस्परालम्बिनी भवति, मधुररसे तु इयं प्रायशः प्राधान्येन च एकपक्षीयेति स्वीक्रियते। यद्यपि विषयालम्बनस्य श्रीकृष्णस्य रतिभावः स्वीक्रियते परन्तु तस्य रससिद्धिं प्रति अपेक्षा नास्ति। रसेऽस्मिन् आश्रयालम्बनभूतायाः तद्वल्लभायाः कृष्णप्रीतिरेव वर्ण्या भवति। तज्जातीया प्रीतिरेव रसातां लभते। कृष्णसम्बन्धिनी प्रीतिस्तु रतेरुद्दीपिका[13] एव भवति।

मधुररसे सर्वे भावाः आत्मदानसंप्रेरिताः परिप्लाविताश्च भवन्ति। अतः अस्य रसस्य आस्वाद्यता मधुरता अनिर्वचनीया। मानवीयस्थूलव्यावहारिकभावनाक्षेत्रे दिव्य-प्रेमज्योतिःस्वरूपः भवति अयं माधुर्यभावः।



शृङ्गारमधुरयोर्भेदं प्रतिपादयता कृष्णदासकविराजेन उक्तम्– "आत्मेन्द्रियसुखेच्छा शृङ्गाररसस्य विषयः, कृष्णेन्द्रियसुखेच्छा मधुररसस्य विषयः" इति।[14] केषाञ्चित् समालोचकानां मते मधुररसे भावनिविडतायाः प्राचुर्यम् अनुभूयते, यस्याः सर्वथाऽभावः शृङ्गाररसे परिलक्ष्यते। अभिनवेन उक्तञ्च "मधुर भक्तिरस के आनन्दातिरेक से साधक भक्त आत्मसंयुक्त और परसंयुक्त भाव-भावनाओं से सर्वथा असंस्पृष्ट और चिदानन्दमय हो उठता है, किन्तु वैषयिकसुख की वासना से वलित लौकिक शृङ्गार रस में ऐसी स्थिति कभी नहीं आती" इति।[15]

लौकिकशृङ्गारे विप्रलम्भदशायाम् आत्मविश्वासात् प्रियविश्वासस्य प्राधान्यं विद्यते। मधुररसे विप्रलम्भे तु आत्मविश्वासस्यैव प्राधान्यं स्वीक्रियते। अतः शृङ्गारमधुरयोर्मध्ये भेदः सुस्पष्टः। मधुररसः शृङ्गाररसस्य भक्तिपरकं रूपान्तरं न, अपि तु शृङ्गाराद् भिन्नः रसविशेषो भवति।

एतत् सत्य यत् शृङ्गारमधुरयोर्मध्ये भेदः अस्ति। द्वयोः अनुभव एकः न। ह्रदसमुद्रयोः भिन्नता दीपालोकदिवालोकयोः अनेकत्वं वा यथा सर्वदा सर्वथा एव विद्यते तथा अनयोः रसयोर्मध्ये भेदः सदैव स्थास्यति। शृङ्गाररसः जडविषयात्मकः मधुररसस्तु चैतन्यात्मकः, तथापि शृङ्गारमधुरयोर्मध्ये कश्चित् सम्बन्धो विद्यते। सर्वजनसंवेद्यः शृङ्गारः मधुरभावस्य लौकिकता इति प्रतीयते। मधुररसेऽपि भक्तः प्रणयनिवेदनपूर्वकं भगवति आत्मसमर्पणं करोति, तत्समक्षं भगवान् जगत्स्रष्टा ऐश्वर्यवान् न, अपि तु तस्य प्रेम्णः विषयः, अभीप्सितः पुरुषविशेषो भवति। शृङ्गारे परिदृष्टा भावविशेषा अत्रापि परिलक्ष्यन्ते। शृङ्गाररसास्वादने रतिमतां सहृदयानाम् अधिकारोऽस्ति। मधुररसे तु भगवद्रतिमतां सहृदयानामनुकार्याणाञ्च अधिकारः स्वीक्रियते इति विशेषः।

लौकिकवासनाहीनः पारलौकिकः एव भवति मधुररसः। भगवति भक्तस्य विषयान्तरविस्मारितावस्थात्मकं प्रेम अत्र साक्षात्क्रियते। परमास्वाद्यताहेतोः रसोऽयं रसभेदेषु राजवत् नितरां शोभते। शृङ्गाररसेन सह अस्य रसस्य साम्याभासः विद्यते, न तु साम्यम्। अतः ये शृङ्गाररसास्वादकाः सहृदयाः तदास्वादनाभिलाषेण मधुररसं प्रति उन्मुखाः भवन्ति, तेषां कृते रसोऽयं दुर्बोध्यो भवति। जीवगोस्वामिना उक्तम्, यथा – "निवृत्तेषु प्राकृतशृङ्गाररससाम्यदृष्ट्या... अयोग्यत्वादिति।"[16] द्वितीयतः सगुणपरंब्रह्मणः पूर्णकामस्य वल्लभाभिः सह रमणादिः साधारणभक्तानां कृते बोधबहिर्भूत-विषयो भवति, का वार्त्ता पुनः साधारणजनानाम्? अतः रसोऽयं दुरूहः दुर्बोध्यः इति उक्तम्। तृतीयतः लीलार्थमेव स्वीकृतस्य नरदेहस्य भगवतः श्रीकृष्णस्य

बहुपुण्यलब्धैः गोपीस्वरूपैः भक्तैः सह प्रीतिः रहस्यमयी एव भवति। तत्र पुनः गोपीभावभावितचेतसाम् आधुनिकभक्तानां काव्यनाट्यादिगतविभावानुभावादिभिः मधुररसास्वादनं सततं रहस्यमयं हि भवति। अतः रहस्यमयो भवत्ययं रसः इत्युच्यते। अनेन च मधुररसस्य रसान्तरविलक्षणत्वम् असामान्यत्वं सर्वजना-स्वाद्यानर्हकत्वञ्च सिध्यति। अतः रसभेदेष्वस्य मधुररसस्य वैशिष्ट्यं स्वीक्रियते। रसोऽयं न शृङ्गाररसपरकः अपि तु स्वतन्त्रो रसविशेषः भवतीति।

## सन्दर्भाः


1. कृष्णकर्णामृतम्, प्रथमः आश्वासः, श्लोक सं.91
2. प्रेयः अन्यस्मात् सर्वस्मात् – बृहदारण्यकोपनिषत् 1/4/8
3. रसो वै सः। रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति – तैत्तिरीयोपनिषत् 2/7
4. अस्मात् सर्वस्मात् प्रियतमः आनन्दघनं हि–नृसिंहतापिनी उप.
5. मध्यकालीन धर्मसाधना, हजारीप्रसादग्रन्थावली 5
6. अच्छा म इन्द्रं प्रतयः स्वविदः. . . .ऋक्संहिता 10/31/1
7. यस्य देवे परा भक्तिर्यथा देवे यथा गुरौ. . . ., श्वेताश्वतरोपनिषत् 6/23
8. . . . तदर्पिताखिलचरिता तद्विस्मरणे परमव्याकुलतामेतीति-नारदभक्तिसूत्रम्।
9. यथा व्रजगोपिकानाम्, नारदभक्तिसूत्रम् - 21
10. आत्मोचितैर्विभावाद्यैः पुष्टिं नीता सतां हृदि।
मधुराख्यो भवेद् भक्तिरसोऽसौ मधुरा रतिः।।
भक्तिरसामृतसिन्धुः, पश्चिमविभागः, पञ्चमलहरी, श्लोक सं.1
11. हिन्दी वैष्णवसाहित्य में रसपरिकल्पना, पृ. 218
12. मधुर रस : स्वरूप और विकास, पृ. 302, भाग - 2
13. "भक्ताश्रयायाः कृष्णविषयायाः एव रतेः रस्यमानतया निर्देश्यत्वाद् भक्तविषयकश्रीकृष्णस्तु तत्रोद्दीपनत्वात्, सा च मधुरापरपर्य्यायेति मधुरा नाम्नीत्यर्थः।" भक्तिरसामृतसिन्धोः स्थायिभावाख्या पञ्चमलहरी, 36 श्लोकव्याख्या। विश्वनाथ-चक्रवर्तिना कृता टीका, भक्तिसारप्रदर्शिनी।
14. चैतन्यचरितामृतम्, चतुर्थोऽध्यायः, पद्यसंख्या 174, 175
15. मधुररस : स्वरूप और विकास, पृ. 363, भाग - 2
16. भक्तिरसामृतसिन्धोः जीवगोस्वामिना कृता टीका - दुर्गमसंगमनी, मधुरभक्तिरसाख्या पञ्चमलहरी श्लोक 2 व्याख्या।




# उपमालङ्कारे चमत्कारतत्त्वम्


**लीना केसवानी**


## अलङ्कारे चमत्कारतत्त्वम्

'**वैचित्र्यमलङ्कारः**'[1] अर्थात् वैचित्र्यमेव अलङ्कारस्य प्राणाः। भामहमते अलङ्कारमूला या वक्रोक्तिः काव्यस्य प्राणप्रदो धर्मः सैव वक्रोक्तिः वैचित्र्यपदेन चमत्कृतिपदेन वा अभिधीयते।

**सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।**
**यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।।**[2]

आनन्दवर्धनमते अलङ्काराः चारुत्वहेतवः भवन्ति –

**अलङ्कारो हि चारुत्वहेतुः प्रसिद्धः।**[3]

अलङ्कारचन्द्रिकाकाराचार्यवैद्यनाथानुसारेण रसव्यङ्ग्यादिभिन्नत्वे सति यः विषयतांसम्बन्धेन शब्दे अर्थे वा विद्यमानत्वे सति चमत्कृतिजनकतायाः अवच्छेदको भवति सः अलङ्कारपदवाच्यो भवति।

**'अलङ्कारत्वञ्च रसादिभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयतासम्बन्धावच्छिन्ना चमत्कृतिजनकतावच्छेदकता तदवच्छेदकतत्त्वम्।'**[4]

रसगङ्गाधरकारोऽपि अलङ्कारप्रकरणारम्भे कथयति–

**व्यङ्ग्यस्य रमणीयताप्रयोजका अलङ्काराः।**[5]

पुनश्च 'रमणीय' शब्दस्य व्याख्यां कुर्वन् स सन्देहालङ्कारप्रकरणे कथयति–

**रमणीयेति चमत्कारिणीत्यर्थः।**[6]

इत्थं जगन्नाथानुसारेण अलङ्काराः चमत्कारप्रयोजका भवन्तीति निर्णीयते।

**उपमालङ्कारस्य प्राणाः साधर्म्यरूपः चमत्कारः।**

सादृश्यमूलकार्थालङ्कारेषु भेदाभेदप्रधानोऽर्थालङ्कारः – उपमालङ्कारः। अर्थालङ्कारेषु उपमैव प्रधानास्ति। कस्यचिदाचार्यस्य मते सर्वेषामलङ्काराणां बीजभूता उपमा।

**उपमैवानेकप्रकारवैचित्र्येणानेकालङ्कारबीजभूतेति प्रथमं निर्दिष्टा।**[7]

**अलङ्कारबीजभूतत्वादुपमा निरूप्यते।**[8]

अत्यन्तभिन्नयोः पदार्थयोः समानधर्माधारेण यत्र किञ्चित् सादृश्यं वर्ण्यते तत्र

उपमालङ्कारो भवति। उपमालङ्कारस्य एतत् सादृश्यं भेदाभेदप्रधानो भवति अर्थात् अस्मिन् अलङ्कारे न भेदस्य प्राधान्यं भवति न च अभेदस्य अपितु उभयोः प्राधान्यं वर्तते। महाभाष्यकारेण पतञ्जलिनापि सादृश्यस्य अयमेवार्थः स्वीकृतः।

**यत्र किञ्चित्सामान्यं कश्चिच्च विशेषः स विषयः सदृशतायाः।**[9]

उपमानोपमयोः भेदाभेदप्राधान्यरूपम् एतदेव सादृश्यम् आह्लादकारित्वात् उपमायाः प्राणाः। अत एव उपमालङ्कारे सादृश्यमेव चमत्कारहेतुः। सादृश्यबलात् चमत्कारकारिणः अस्यालङ्कारस्य चत्वारि अङ्गानि स्वीक्रियन्ते। तानि च उपमेयोपमानसाधारण-धर्मसादृश्यवाचकशब्दाः।

**उपमेयम् –** उपमातुं योग्यम् उपमेयम् अर्थात् यस्य उपमा दीयते तदुपमेयं भवति। साधारणतः एतद् न्यूनगुणयुक्तं भवति – न्यूनगुणम् उपमेयम्।

**उपमानम् –** उपमीयते अनेनेति उपमानम् अर्थात् येन उपमा दीयते तद् उपमानं भवति। साधारणतः एतदधिकगुणयुक्तं भवति – अधिकगुणमुपमानम्।

**साधारणधर्मः –** उपमालङ्कारस्य प्राणाः साधारणधर्माः एव भवन्ति। अस्यैव अपरपर्यायः साधर्म्यम्, सादृश्यञ्च। सूक्ष्मदृष्ट्या विचारणे एतौ उभावपि भिन्नधर्मिणौ, आचार्यैस्तु नात्र विशेषभेदः स्वीकृतः। आचार्यैरुपमालङ्कारः साधर्म्यसादृश्योभयमूलकोऽ-ङ्गीकृतः। वस्तुतस्तु साधर्म्यसादृश्ययोः प्रयोज्यप्रयोजकभावरूपसम्बन्धो वर्तते। साधर्म्यस्य प्रयोजकत्वम्, सादृश्यस्य प्रयोज्यत्वम्।

**साधर्म्यम् –** 'समानो धर्मो ययोस्तौ सधर्माणौ तयोः भावः साधर्म्यम्'।

**सादृश्यम् –** 'तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम्।'[10]

यथा – 'चन्द्र इव मुखम्' अत्र मुखमुपमेयम् चन्द्रश्च उपमानम्। इव उपमावाचकशब्दः, साधर्म्यञ्च आह्लादकता, सुन्दरता इत्यादयः एवं क्रमेण चन्द्रमुखयोः साधर्म्यनिरूपितं सादृश्यं वर्तते।

अत्र ध्यातव्यं यत् साधर्म्यम् उपमानोपमेयभूतपदार्थेषु एव भवति, न तु कार्यकारणादिरूपेषु। यथोक्तं मम्मटेन –

**उपमानोपमेययोरेव न तु कार्यकारणादिकयोः साधर्म्यं भवतीति।**[11]

उपमायाः प्राणभूतस्य अस्य सादृश्यस्य चारुता आवश्यकी। आचार्यहेमचन्द्रेण उपमालक्षणप्रसङ्गे 'हृद्यम्' इति पदस्य प्रयोगः अनेनैव अभिप्रायेण कृतः।

**हृद्यं साधर्म्यमुपमा।**[12]

हृद्यः सहृदयहृदयाह्लादकः सम्बन्धः एव उपमेति उच्यते। अत एव सत्त्वज्ञेयत्वप्रमेयत्वादिसाधर्म्येषु नोपमा लक्ष्यते। यतो हि एतादृशसाधर्म्येषु न कोऽपि



चमत्कारो दृश्यते – **तेन सत्त्वज्ञेयत्वप्रमेयत्वादिसाधर्म्यं नोपमा।**[13]

पण्डितराजमते सुन्दरसादृश्यमेव उपमेति –

**सादृश्यं सुन्दरं वाक्यार्थोपस्कारमुपमालङ्कृतिः।**[14]

सौन्दर्यस्य अभिप्रायोऽत्र चमत्कारजनकत्वमेव। चमत्कारश्च सहृदयहृदय-प्रमाणितविलक्षणानन्दः –

**सौन्दर्यं च चमत्कृत्याधायकत्वम्। चमत्कृतिरानन्दविशेषः सहृदयहृदयप्रमाणकः।**[15]

उपमालङ्कारस्य चमकारोत्पादकः प्राणप्रदः साधारणधर्मः द्विधा भवति–

(क) बिम्बप्रतिबिम्बभावरूपः (ख) वस्तुप्रतिवस्तुभावरूपश्च

**(क) बिम्बप्रतिबिम्बभावः –** भिन्नयोः उपमानोपमेययोः धर्मयोर्मिथः सादृश्यवशात् अभिन्नधर्मस्य पृथगुपादानं बिम्बप्रतिबिम्बभावः उच्यते –

**वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालङ्कारिकसमयः।**[16]

**गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेलाविवेश्वरः।**
**शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति।।**[17]

अत्र उपमानरूप ईश्वरः उपमेयरूपश्च बुधः भिन्नधर्माणौ तथापि उपमानोपमेययोः परस्परसादृश्यवशात् अभिन्नधर्मस्य ग्रहणम्, श्लाघनम्, नियमनं शब्दैः अभिहितमस्ति। अत एव अत्र बिम्बप्रतिबिम्बभावेन उपमालङ्कारो वर्तते।

**(ख) वस्तुप्रतिवस्तुभावः –** उपमानोपमेययोः एकस्यैव धर्मस्य सम्बन्धिभेदात् द्विरुपादानं वस्तुप्रतिवस्तुभावः।

**एकस्यैव धर्मस्य सम्बन्धिभेदेन द्विरुपादानं वस्तुप्रतिवस्तुभावः।**[18]

**यान्त्या मुहुर्वलितकन्धरमाननं त-**
**दावृत्तवृन्तशतपत्रनिभं वहन्त्याः।।**
**दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या**
**गाढं निखात इव मे हृदये कटाक्षः।।**[19]

प्रस्तुत उदाहरणे उपमानोपमेययोः (आननशतपत्रयोः) परिवृत्तिरूपस्य एकस्यैव धर्मस्य सम्बन्धिभेदेन वलितावृत्त इति पृथक्शब्दाभ्याम् अभिधानमस्ति। अत एव अत्र वस्तुप्रतिवस्तुभावरूपसम्बन्धेन घटितः उपमालङ्कारः वर्तते।

**सादृश्यवाचकशब्दाः–** यान् दृष्ट्वा उपमानोपमेयनिष्ठसादृश्यस्य झटिति प्रतीतिः भवति ते सादृश्यवाचकाः शब्दाः। वस्तुतः एते उपमानोपमेयोभयनिष्ठसाधारणधर्मस्यैव वाचकाः भवन्ति। ते च–यथा, इव, तत्, तुल्यम्, समम्, सदृशः इत्यादयः।

उदाहरणम् –

**विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।**
**स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव।।**[20]

कालिदासस्य प्रसिद्धकृतेः अभिज्ञानशाकुन्तलस्य चतुर्थाऽङ्कस्य श्लोकेऽस्मिन् दुष्यन्तः उपमेयः प्रमत्तो जनः उपमानम्। इव उपमावाचकशब्दोऽस्ति। साधारणधर्मः- बोधितः सन्नपि न स्मरिष्यति। "यथा प्रमत्तः पुरुषः पूर्वकथितवार्तां न स्मरति तथैव स (दुष्यन्तोऽपि) त्वां (शकुन्तलां) न स्मरिष्यति" इत्ययमेव कवेः अभिप्रायोऽस्ति। एवम् असावेव साधारणधर्मः पद्येऽस्मिन् वर्णितोपमालङ्कारस्य प्राणभूतः। निष्कर्षतः साधारणधर्मेण अनुप्राणितम् उपमालङ्कारस्य साधर्म्यमेव चमत्कृतिहेतुः।

## सन्दर्भाः


1. काव्यप्रकाशः, पृ. स. 432
2. काव्यालङ्कारः (भामह) 1.85
3. ध्वन्यालोकः, पृ.सं. 208
4. कुवलयानन्दः, अलङ्कारचन्द्रिकासहितः पृ.सं. 2-3
5. रसगङ्गाधरः, पृ.सं. 210
6. तत्रैव, पृ.स. 604
7. अलङ्कारसर्वस्वम्, सूत्र 12 वृत्ति
8. प्रतापरुद्रीयम्, पृ.सं. 414
9. अलङ्कारसर्वस्वम्, पृ.सं. 80
10. न्यायसिद्धान्तमुक्तावली पृ.सं. 31
11. काव्यप्रकाशः, सू. 124 वृत्ति
12. काव्यानुशासनम्, 6/1
13. तत्रैव, 6/1 वृत्ति
14. रसगङ्गाधरः, द्वितीयाननम्, पृ.सं. 211
15. तत्रैव, पृ.सं. 211
16. कुवलयानन्दः, 5 वृत्ति
17. तत्रैव, पृ.सं. 22
18. चित्रमीमांसा, पृ.सं. 89
19. मालतीमाधवम्, 1/30
20. अभिज्ञानशाकुन्तलम् 4/1




# नैषधीयचरिते कतिपयव्याकरणसिद्धान्तानां शब्दानाञ्च काव्यात्मकाः प्रयोगाः

**कु. बिन्दु**

काव्यशास्त्रपरम्परायां काव्यकारणविचारः प्रवर्तते। तत्राचार्यैः शक्तिनिपुणता-भ्यासादयो नैके काव्यस्य कारणविशेषाः व्याख्याताः। येषु प्रतिभायाः काव्यकारणत्वे सर्वेषां सम्मतिः विद्यते। निपुणतापि बहुभिराचार्यैः काव्यकारणत्वेनाङ्गीक्रियते। निपुणता कवेः कथं सम्पद्यते इति जिज्ञासायां मम्मटेनोक्तं लोकशास्त्रकाव्याद्यवेक्षणात् निपुणता अर्थात् लोकज्ञानेन सह प्रायः समेषां शास्त्राणां ज्ञानमपि निपुणतायै अपेक्षितं भवति। लोको विद्या प्रकीर्णञ्च काव्याङ्गानि-इत्युक्त्वा वामनेन विद्यानां काव्याङ्गत्वं काव्यकारणत्वं च पूर्वमेवोक्तमासीत्। विद्यासु शास्त्रेषु च व्याकरणशास्त्रस्य सर्वातिशायि महत्त्वं विद्यते। अतः व्याकरणज्ञानं विना काव्यनिर्माणस्य कल्पनापि कर्तुं न शक्यते।

संस्कृतमहाकविषु नैषधीयचरितकर्तुः महाकवेः श्रीहर्षस्य नाम अत्यादरेण गृह्यते। श्रीहर्षः उभयविधप्रतिभायाः अधिष्ठनमासीत्। तत्र भावपक्षेण सह कलापक्षस्यापि सुवर्णसौगन्धसम्बन्धः शोभते। श्रीहर्षस्य प्रौढपाण्डित्याकृष्टैः समालोचकैः 'नैषधं विद्वदौषधम्', 'उदिते नैषधे काव्य' इत्यादिभिरुक्तिभिः तस्य प्रशंसनं क्रियते। सर्व-शास्त्रज्ञः श्रीहर्षः व्याकरणशास्त्रस्याप्यासीन्मर्मज्ञो विज्ञः। तेन नैषधे न केवलं नव्याभिधाननिर्माणपुरःसरमर्थानामुपस्थापनं विहितम् अपितु विभिन्नव्याकरणसिद्धान्ता-नुपमानत्वेन, समर्थकवाक्यत्वेन, प्रतिबिम्बरूपेण वा प्रयोगं विधाय स्वप्रतिभाचमत्कारः प्रदर्शितः।

## (क) व्याकरणशास्त्रीयसिद्धान्ताः

अत्र श्रीहर्षप्रतिपादिताः केचन व्याकरणशास्त्रीयसिद्धान्तानां काव्यात्मकाः प्रयोगा उदाह्रियन्ते–

(i) श्रीहर्षः व्याकरणसिद्धान्तमुपमानत्वेन कल्पयन्नाह–

**क्रियेत चेत्साधुविभक्तिचिन्ता व्यक्तिस्तदा सा प्रथमाभिधेया।**
**या स्वौजसां साधयितुं विलासैस्तावत्क्षमानामपदं बहु स्यात्।।**[1]

पाणिनीयव्याकरणे प्रथमाविभक्तेः स्वौजसादिरूपाणि उपमानतयावलम्ब्य हंसदमयन्तीसम्मुखं श्लेषमाध्यमेन नलस्य प्रशंसां कुर्वन् स्वकल्पनाचमत्कारं प्रस्तौति- यदि महापुरुषाणां श्रेणिषु विभाजनं क्रियेत तदा सा व्यक्तिः अर्थात् नलनामकः सः पुरुषविशेषः प्रथमाभिधेयः स्वीकर्त्तव्यः, या स्वौजसां विलासैः अर्थात् स्वकीयौजोबलविलासैः असंख्यशत्रूनपि स्वाधीनान् कर्तुं शक्नोति इत्यस्य वाच्यार्थस्य प्रतीत्यनन्तरं विभक्तिस्वौजसादिशब्दमूलकः अपरो व्याकरणसिद्धान्तपरो व्यङ्ग्यार्थोऽपि प्रतीतिपथमवतरति। स च यथा-यदि साधुतया सम्यग्रूपेण विभक्तयः विचार्यन्ते तदा सा प्रथमा नाम्नी विभक्तिः वर्तते या स्वौजसाम् अर्थात् सु, औ जस् इति एकवचनद्विवचनबहुवचनानां विवक्षायां जायमानानां प्रत्ययानां विलासैः यथासम्भवं विसर्जनीयलोपागमादेशशीभावादिरूपैः प्रकारविशेषैः बहुनामपदं प्रातिपादिकं पदं सुबन्तं साधयितुं समर्था भवति। पाणिनीयव्याकरणे प्रथमाविभक्तेः प्राधान्यमङ्गीक्रियते। अन्यविभक्तीनामप्राप्तौ प्रथमा भवति। उक्तमपि "एकवचनमुत्सर्गतः करिष्यते" इत्यादिवचनात्। वाक्येऽपि विभिन्नेषु कारकेषु व्यापाराश्रयत्वात् कर्तृकारकस्य प्राधान्यं कर्तरि च प्रथमा भवति। अनयोः नलप्रथमापरकयोः वाच्यव्यङ्ग्यार्थयोः परस्परासम्बद्धतां परिहर्तुं ध्वनि-सिद्धान्तानुसारमत्र तयोः उपमानोपमेयभावं परिकल्प्योपमालङ्कारः व्यङ्ग्यतयाङ्गीक्रियतें। तेन च नलस्य प्रथमाविभक्तिवत् महत्ता सामर्थ्यवत्ता धरणौं सर्वराजाग्रगण्यता च व्यज्यते।

(ii) पाणिनीयाष्टाध्याय्याम् 'अपवर्गे तृतीये'ति सूत्रं कारकेषु पठ्यते। अस्यार्थोऽस्ति फलप्राप्तौ सत्यां कालमार्गवाचकशब्देभ्यः तृतीया भवतीति। यथा-क्रोशेनाऽनुवाकोऽधीतः।

नैषधे सप्तदशसर्गे नलं प्रतारयितुं प्रस्थितः चार्वाकः शब्दच्छलेन पाणिनिप्रोक्तस्योक्तस्य सूत्रस्य अर्थान्तरमधिगमय्य प्रस्तौति-

**उभयी प्रकृतिः कामे सज्जेदिति मुनेर्मनः।**
**अपवर्गे तृतीयेति भणतः पाणिनेरपि।।**[2]

अर्थात् महामुनेः पाणिनेरपि मनः वर्तते यत् उभयी प्रकृतिः अर्थात् स्त्रीपुमांसौ कामे सज्जितौ भवेताम्। तृतीया प्रकृतिः अर्थात् षण्ढात्मिका तृतीया प्रकृतिः अपवर्गे अर्थात् मोक्षे सज्जेत्। अत्र पाणिनिप्रयुक्तस्यापवर्गशब्दस्य फलप्राप्त्यर्थकस्य मोक्षार्थे प्रयोगं कृत्वा श्रीहर्षेण स्वकीयं कवित्वललितं व्याकरणपाण्डित्यं प्रदर्शितम्।

(iii) व्याकरणशास्त्रानुसारेण "अस्तेर्भूः"[3] इति सूत्रेण आर्धधातुकप्रत्यये परे अस्धातोः स्थाने भूरादेशो जायते। अतः अद्यतनभूतार्थे लुङ्लकारविवक्षायाम्



अस्स्थाने भूरादेशो सम्भाव्यत एव। व्याकरणोक्तस्यास्य नियमस्य उपमानतया प्रयोगं कृत्वा श्रीहर्षेण श्लिष्टोपमायाः चमत्कारोऽजनि। यथा-

**सायुज्यमृच्छति भवस्य भवाब्धियादस्तां पत्युरेत्य नगरीं नगराजपुत्र्याः।**
**भूताभिधानपटुमद्यतनीमवाप्य भीमोद्भवे भवतिभावमिवास्तिधातुः।।**[4]

अस्यायं भावः - हे भीमोद्भवे भैमि! भवाब्धेः यादः जन्तुः नगराजपुत्र्याः पार्वत्याः पत्युः भवस्य सायुज्यम् ऋच्छति प्राप्नोति। वाराणस्याख्यां भूताभिधानपटुं नगरीम् एत्य कः कमिवेति जिज्ञासायां श्रीहर्षः व्याकरणनियमम् उपमानतया न्यस्यति- यथा अस्ति-धातुः अर्थात् अस्-धातुः भूताभिधानपटुम् अतीतकालार्थाभिधानसमर्थाम् अद्यतनीं लुङ्विभक्तिं प्राप्य भवतिभावं अर्थात् भूधातुताम् भजते।

(iv) व्याकरणशास्त्रे लोट्लकारे तुह्योः तातङ्-आदेशः जायते।[5] श्रीहर्षेण व्याकरणशास्त्रप्रोक्तस्यास्य नियमस्य अवलम्बनं विधाय प्रभातवर्णने काकपिकयोः प्रश्नोत्तरात्मिका मनोरञ्जनात्मिका उक्तिः परिकल्पिता। यथा-

**इह किमुषसि पृच्छाशंशिकिंशब्दरूपप्रतिनियमितवाचा वायसेनैष पृष्टः।**
**भण फणिभवशास्त्रे तातङः स्थानिनौ काविति विहिततुहीवागुत्तरःकोकिलोऽभूत्।।**[6]

अस्यायं भावः-उषःकाले काकेन प्रश्नवाचिनः किंशब्दस्य प्रथमाद्विवचनान्तरूपं द्विः प्रयुज्य अर्थात् 'कौ कौ' इत्युचार्य प्रश्नः कृतः-भण फणिभवशास्त्रे तातङ्लक्षणादेशस्य स्थानिनौ आदेशिनौ कौ? प्रश्नमिममाकर्ण्य कोकिलः 'तुही' अर्थात् 'तु च हि च इति तुहि' इति उत्तरं ददौ।

काकः स्वभावतः प्रभाते 'कौ कौ' इति वदति, कोकिलश्च 'तुही तुही' इति स्वाभाविकीं खगवाचं श्रीहर्षः व्याकरणनियमत्वेन परिकल्प्य कामपि विलक्षणां चमत्कृतिमत्रोद्भावयामास।

(v) प्रभातवर्णन एव श्रीहर्षेण एकस्यापरस्य व्याकरणसिद्धान्तस्य उत्प्रेक्षणं विधाय कपोतवाचः वर्णनं कृतम्-

**दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत्कोप्यधीती कपोतः**
**कण्ठे शब्दौघसिद्धिक्षतबहुकठिनीशेषभूषानुयातः।**
**सर्वं विस्मृत्य दैवात्स्मृतिमुषसि गतां घोषयन्यो घुसंज्ञां**
**प्राक्संस्कारेण संप्रत्यपि धुवति शिरः पट्टिकापाठजेन।।**[7]

अस्यायं भावः-प्रभाते कपोतवाचमाकर्ण्य कविः कल्पयति-अयं कपोतोऽपि पाणिनीयशास्त्रस्य कोऽप्यध्येतासीत्, तदध्ययनवशादेव रामादिशब्दौघानां सिद्धये प्रयुक्ता अस्य कण्ठे भूषणत्वेनावलिप्ताः अतोऽयं खटिकाशेषरेखया कण्ठेऽलंकृतो वर्तते।

इदानीं सर्वं शास्त्रं विस्मृत्य दैवात् उषसि स्मृतिं गतां घुसंज्ञाम् अर्थात् 'दाधा घ्वदाप्' इति सूत्रेण विहितां घुसंज्ञां पुनः पुनः पठन् पट्टिकापाठजेन प्राक्संस्कारेण इदानीमपि शिरः धुवति।

कपोताः प्रभाते स्वभावादेव घुघुशब्दं कुर्वन्ति शिरश्च कम्पयन्ति। कपोत-स्वभावोऽयं कविनात्र तस्य पूर्वव्याकरणाध्येतृत्वेनोत्प्रेक्षितः यथा बालाः श्यामासु काष्ठघटितपट्टिकासु खटिकादिलिखितं धवलाक्षरं सूत्रादिकं पुनः पुनः रटन्ति शिरश्च कम्पयन्ति तथैवाऽयं पूर्वपठितव्याकरणशास्त्रः सम्प्रति विस्मृताखिलः कपोतः दैवात् घुसंज्ञां स्मृत्वा सशिरःकम्पं रटतीवेति भावः।

(vi) प्रथमसर्गे नलवर्णनप्रसङ्गे श्रीहर्षेण अधीतिबोधाचरणप्रचारणैः इत्याद्युक्त्वा विद्यायाः याश्चतस्रो दशा उक्ताः तासां मूलमपि पतञ्जलेः महाभाष्यमेवास्ति। यथा-

चतुर्विधप्रकारकैर्विद्योपयुक्ता भवति आगमकालेन, स्वाध्यायकालेन, प्रवचन-कालेन, व्यवहारकालेन।।[8]

एवमेव कुण्डिनपुरवर्णनप्रसङ्गेऽपि श्रीहर्षः तस्य परिखां फणिभाषित-भाष्यफक्किकारूपेण परिकल्प्य वैयाकरणसिद्धान्तस्य काव्यात्मकतां विहितवान्।

(vii) दमयन्ती 'सरूपाणामेकशेष एकविभक्तौ' इत्यदः सूत्रमाश्रित्य स्वाशयं व्यनक्ति-

**श्रुतः स दृष्टश्च हरित्सु मोहाद् ध्यातः स नीरन्ध्रितबुद्धिधारम्।**
**ममाद्य तत्प्राप्तिरसुव्ययो वा हस्ते तवास्ते द्वयमेकशेषः।।[9]**

(viii) स्वयंवरे राजपरिचायिकायाः सरस्वत्याः मेखला मन्ये व्याकरणशास्त्रेणैव व्यरचि, यतो हि व्याकरणशास्त्रं गुणदीर्घभावं दधत् विस्तारमाप्नोति, शब्दपरम्पराणां विधायकमपि भवति। सरस्वत्याः रशनापि गुणदीर्घभावकृतां विततिं दधाना शिञ्जनादिशब्दपरम्पराणां विधायिका च वर्तते। अत एव अस्याः रचना समानधर्मवता व्याकरणशास्त्रेणैव कृतेति सम्भाव्यते। यथा-

**असंशयं सा गुणदीर्घभावकृतां दधाना विततिं यदीया।**
**विधायिका शब्दपरम्पराणां किं वारचि व्याकरणेन काञ्ची।।[10]**

## (ख) नवीनव्युत्पादितशब्दाः

श्रीहर्षेण नैषधे न केवलं वैयाकरणसिद्धान्तानामलङ्कारत्वेनोपयोगोऽकारि अपितु केषाञ्चिन्नवीनव्युत्पादितानां शब्दानां प्रयोगोऽपि विहितः। नितरामास्वादनीयतामभिधातुं तेनानेकवारं 'निपीय' शब्दस्य प्रयोगः कृतः। शब्दोऽयं भ्वादिगणीयपाधातोः न



निष्पद्यते यतः 'न ल्यपि' इति सूत्रानुसारं "घुमास्थागापाजहातिसां हलि" इति सूत्रेण ल्यपि सति ईकारो न सम्भवति। रूपमिदं पीङ्-पाने इत्यस्माद् धातोः निष्पद्यते।

एतदतिरिक्ताः श्रीहर्षेण भूजानिः (1/2) सूननायकः (18/129) अप्रतीतचरः (18/129) अधिगामुका (18/129) हसस्पृशम् (18/130) इत्यादयो नवीनाः शब्दाः अपि व्युत्पादिताः।

## (ग) अप्रसिद्धशब्दप्रयोगाः

श्रीहर्षेण नैषधे केषाञ्चिदप्रचलितानामप्रसिद्धानाञ्च शब्दानां प्रयोगो विहितः। यथा-अकूपारः (12/18) अगदारः (4/116) चिपिटः (22/85) श्यैनपाता (19/12) मिहिकारुचम् (19/35) इत्यादयः।

## (घ) लोकभाषाशब्दप्रयोगः

श्रीहर्षः नैषधे कांश्चित् लोकभाषाशब्दान् प्रायोजयत् यथा-इङ्गालः (1/9) विरुदम् (11/37) धोरणिः (15/49) इत्यादयः। तत्र तेन केचित् तादृशाः वाक्यप्रयोगा अपि विहिताः येषां प्रयोगः लोकव्यवहारे भवति यथा-जनानने कः करमर्पयिष्यति (9/125), असितुं नादत्त (18/53) वीक्षितुं नादत्त (18/53) कथमास्यं दर्शयिताहे (5/71) नवीनमश्रावि तवाननादिदम् (9/41) ब्रवीषि न (9/89) इत्यादयः।

## (ङ) विवादास्पदप्रयोगाः

श्रीहर्षेण प्रथमसर्गे 'अक्रामि' (1/70) पदं प्रायुञ्जि पदमेतत् टीकाकर्तुः नारायणस्य दृष्ट्या चिन्त्यमस्ति। तेनोक्तम्-"नोदात्तोपदेशस्य मान्तस्यानाचमेः"।।[11] इति वृद्धिनिषेधात् अक्रामि इति चिन्त्यम्।

इत्येवं प्रकारेण पूर्वोक्तैः उदाहरणैः श्रीहर्षस्य न केवलं व्याकरणशास्त्रपाण्डित्यं प्रमाप्यते अपितु तस्य नीरसव्याकरणशास्त्रीयसिद्धान्तानवलम्ब्य सरसकाव्य-प्रणयनपाटवमपि प्रत्यक्षं भवति।

**सन्दर्भाः**

1. नै.3.23

2. नै.17.70

3. पा.अ. 2.4.52

4. नै.11.117

5. तुह्योस्तातङाशिष्यन्यतरस्याम् पा.अ. 7.1.35

6. नै.19.60

7. नै.19.61

8. भाष्य 1.1.1

9. नै. 3.82

10. नै.10.77

11. पा.अ.7.3.34



# प्रेमतत्त्वम्

डॉ.शरदिन्दु कुमार त्रिपाठी

इह चराचरात्मके जगति असङ्गस्यात्मनः क्वचित् निरतिशया शक्तिः क्वचिच्च सातिशया शक्तिर्लक्ष्यते। जगतः सर्वोऽपि व्यवहारः स्नेहमूलक एव प्रचलति। अपि च जायमानः प्राणी एकाकी एवोत्पन्नः बहुविधैः सम्बन्धैः आत्मानं बध्नाति। क्वचित् जनकः, क्वचित् जननी, कश्चिद् भ्राता, कश्चन गुरुः, काचित् पत्नी, कश्चन पुत्रः, किमपि मित्रं, कश्चन शत्रुः, कश्चन सेव्यः आराध्यः इत्यादि, सर्वत्र सम्बन्धे स्नेह एव कारणम्। यथा सिकता नीरसा सती मिथो निरपेक्षा असम्बद्धा च भवति, पिष्टकञ्च शुष्कं सत् पिण्डतां नापद्यते परं स्निग्धं सत् पिष्टातकं भवति सिकता च पिण्डीभूता जायते, तत्र परस्परं स्नेह एव निबन्धनम्। एवं लोकव्यवहारेऽपि स्नेह एवात्मन्यार्द्रतामापादयन् नानाविधसम्बन्धान् बध्नाति। न खलु मानवेष्वेव मानवेतरेष्वपि प्राणिषु यः पारस्परिकः व्यवहारः सः प्रेममूलक एव। उक्तञ्च मार्कण्डेयपुराणे–

**ज्ञानेऽपि सति पश्यैतान् पतङ्गाञ्छावचञ्चुषु।**
**कणमोक्षादृतान्मोहात्पीड्यमानानपि क्षुधा।।**
**मानुषा मनुजव्याघ्र साभिलाषाः सुतान् प्रति।**

इत्थं लौकिकं पारलौकिकं वा प्रेयःसम्पादनार्थं प्रेम एव कारणं भवति।

## प्रेमपदार्थनिरूपणम्

तदेतत् आध्यात्मिकाधिभौतिकव्यवहारमूलं प्रेम किमिति? तत्प्रेमपदार्थः विविच्यते। शब्दशास्त्रदृष्ट्या प्रेमशब्दस्य निष्पत्तौ उपादानभूतो धातुः प्री। स चायं धातुः प्रीञ्-तर्पणे चौरादिकः, प्रीञ्-तर्पणे कान्तौ च इति क्रैयादिकः, प्रीङ्प्रीतौ इति दैवादिकः इति धातुत्रयं दृष्टिपथमवतरति। इत्थं प्रेमशब्दस्य निष्पत्तिः–अतिशेयन प्रियः इति प्रेम अथवा प्रियस्य भावः प्रेम। तत्र प्रियशब्दस्यापि निष्पत्तिः–चौरादिकात् प्रीञ्धातोः प्रीणयति, प्राययति, प्रयति प्रयते वा इति प्रियः। अथवा क्रैयादिकात् प्रीणाति प्रीणीते वा प्रियः अथवा दैवादिकात् प्रीयते इति प्रियः इति विग्रहे निरनुबन्धकप्रीधातोः "इगुपधज्ञाप्रीकिरः कः" इति 'क' प्रत्यये अनुबन्धलोपे प्री अ इति जाते इयङि प्रिय इति सिद्धम्। पुनः प्रियस्य भाव इति विग्रहे पृथ्वादिभ्यः इमनिज् वा इति इमनिचि

प्रत्यये अनुबन्धलोपे प्रिय इमन् इति जाते प्रियस्थिरस्फिरोरुः इत्यादिना प्रिय इत्यस्य प्र आदेशे गुणे 'प्रेमन्' शब्दस्य सिद्धिः। इत्थं प्रियस्य भावः प्रेमेति। भावप्रत्ययस्य इमनिचः अर्थः प्रकृतिजन्यबोधे प्रकारीभूतो भावः इति सिद्धान्तात् अत्र प्रकृतिः प्रिय इति तस्यार्थः तृप्तिकर्ता कामनाकर्ता प्रीतिकर्ता वा। तत्र प्रकारीभूता तृप्तिः कामना प्रीतिर्वा प्रेमपदार्थः। तृप्तेरपि प्रकारद्वयम् आत्मतृप्तिः परतृप्तिश्च। तत्रात्मतृप्तौ धातुरयमकर्मकः, यतोहि धातोः फलव्यापारौ अर्थः "फलव्यापारयोर्धातुः" इति सिद्धान्तात् तत्र व्यापाराश्रयः कर्ता फलाश्रयं कर्म भवति। परं यत्र फलं व्यापारश्च एकनिष्ठः भवति स धातुरकर्मकः, फलव्यापारयोरेकनिष्ठतायामकर्मकः इति सिद्धान्तात्। अत्र 'प्री' धातोः फलं तृप्तिः तदनुकूलश्च व्यापारः एकनिष्ठ एव। यथा अहं प्रियः इत्यत्र प्रीत्याश्रयोऽस्मदर्थः तदनुकूलव्यापारोऽपि अस्मदर्थ एव अतः एकनिष्ठ-त्वादकर्मकः। प्रिया मां प्रीणयति अहं प्रियां प्रीणयामि वा इत्यत्र फलव्यापारयोः भिन्नाश्रयत्वात् सकर्मकः। इत्थञ्च तृप्तिभवनं तृप्तिकरणञ्च प्रेमपदवाच्यं भवति। अथवा गणत्रयपठितात् 'प्री' धातोः क्विब्विब्मनिन्क्वनिपश्च इति मनिन्-प्रत्यये अनुबन्धलोपे प्री मन् इति जाते सार्वधातुकार्धधातुकयोः इति इकारस्य गुणे प्रेमन् शब्दस्य सिद्धिः। 'नान्तं क्लीवं' इति नियमेन नपुंसकम्। इदं प्रेम तृप्तिः तर्पणञ्च। तर्पणं स्वस्यापि परस्यापि भवति। प्रेम इदं निरतिशयं मधुरमाह्लादकं नितान्तसुन्दरं वस्त्वस्ति। यदपेक्षया अन्यत् रमणीयमाह्लादकं वा नास्ति तत् प्रेम। यद्यपि रमणीषु रागः, गुरुजनेषु श्रद्धा, शिशुषु स्नेहः, ईश्वरे भक्तिः इदं सर्वमपि प्रेम एव इदं प्रेम क्रियया नोत्पद्यते अपितु निष्पन्नं सत् ज्ञातं भवति। विवेकशून्यतायां जातं प्रेम अन्धमिति निगद्यते। इत्थं प्रीतिः प्रेम, प्रीतिश्च निरतिशयानन्दे विश्रान्तिः। निरतिशया-नन्दस्वरूपश्चात्मैव आत्मनः सच्चिदानन्दमयत्वात्। अतः परमानन्दस्वरूपात्मैव प्रेमपदार्थः। तस्यैव आनन्दांशस्य चित्ते प्रतिबिम्बनं वृत्यात्मकं प्रेम भवति, यथा आदर्शे प्रतिबिम्बं बिम्बातिरिक्तं नास्ति तथैव अन्तःकरणे आत्मनः प्रतिबिम्बनं (छाया) आत्मातिरिक्तं नास्ति इत्थमात्मस्वरूपं प्रेम तत् प्रतिबिम्बरूपं (चित्तवृत्तिरूपं) प्रेम द्विविधं निष्पन्नम्। आत्मनः प्रेम नित्यं वृत्त्यात्मकं प्रेमानित्यम्। सुषुप्तौ चित्तवृत्तेर्लयत्वात् वृत्तिरूपस्य प्रेम्णोऽपि लयः स्वतः सिद्धः। इदं वृत्तिरूपं प्रेम परस्मिन्नपि भवति, तत्प्राप्तौ सुखं विरहे च दुःखं भवति, अतः रामादयो सीतावियोगे रुदन्तो दृश्यन्ते। परस्मिन् जातं प्रेम कर्तारं रोदयति। अतएव श्रुतिः प्राह "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात् प्रियं रोत्स्यतीतीश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य



आत्मानमेव प्रियमुपास्ते न ह्यस्य प्रियं प्रमायुकं भवति।" (बृहदारण्यकोपनिषद् 1, 4-8) अनेनेदं सिद्धं भवति यत् आत्मातिरिक्ते अन्यस्मिन् पदार्थे या प्रियात्मिका वृत्तिः सा बन्धप्रदा भवति। तद्वियोगे दुःखं जायते रोदनञ्च भवति। अतः प्रियं त्वां रोत्स्यति। अतः आत्मैव प्रियः न हि आत्मना कदाचित् वियोगो न वा किमपि बन्धनम्। स तु सर्वत्र सर्वदा स्वस्वरूपम्, न कदाचित् भिन्नः, अतो न बन्धनं न वा रोदनम्, अतः आत्मानमेव प्रियमुपासीत। अपि च आत्मैव प्रियतमं वस्तु, अन्यस्मिन् प्रेम प्रेमाभासः। एतत् कैश्चित् उपनिषद्वाक्योदाहरणैः विचार्यते।

बृहदारण्यकोपनिषदि याज्ञवल्क्यमैत्रेयीसंवादे मैत्रेयीं सम्बोधयन् याज्ञवल्क्यः न्यगदत्-"स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति। न वा अरे जायायै कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति। न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्त्यात्मनस्तु कामाय पुत्राः प्रियाः भवन्ति। न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति आत्मनस्तु कामाय वित्तं प्रियं भवति। न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवत्यात्मनस्तु कामाय ब्रह्म प्रियं भवति। न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवत्यात्मनस्तु कामाय क्षत्रं प्रियं भवति। न वा अरे लोकानां कामाय लोकाः प्रिया भवन्त्यात्मनस्तु कामाय लोकाः प्रियां भवन्ति। न वा अरे देवानां कामाय देवाः प्रिया भवन्त्यात्मनंस्तु कामाय देवाः प्रिया भवन्ति। न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति। न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।" (बृह.उप.2.4.5) अतः एते सर्वेऽपि आत्मनः कामाय प्रिया भवन्ति अनेन सिद्धमात्मनः प्रियतमत्वम्। आत्मनि ज्ञाते एव सर्वमिदं विज्ञातं भवति, ब्रह्म, क्षत्रं, लोकाः, देवाः, भूतानि आत्मैवेति। अन्यत्र च जनकमुपगतो याज्ञवल्क्यः। जनकस्तं पृष्टवान् किमर्थमागतोऽसि पशून् धनं वा इच्छन्? स प्राह उभयमिति। जनकः प्राह श्रावय किमपि, तदा उदङ्कशौल्वायनः अब्रवीत् 'प्राणो वै ब्रह्मेति' अप्राणतः किं स्यात् तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्व एतत्सम्राडिति स वै नो ब्रूहि याज्ञवल्क्य आकाशः प्रतिष्ठा प्राण एवायतनं प्रियमिति ऐनत् उपासीत ततः जनकोऽपृच्छत् का प्रियता? याज्ञ. . . . . .प्राण एव सम्राट् प्राणस्य वै सम्राट् कामाय अयाज्यं याजयति तत्र प्राणरक्षार्थमेव दिशमेति, अतः प्राणो वै परमं ब्रह्म इति। अर्थात् प्राणरक्षार्थमेव अकृत्यं करोति वधशङ्कायां प्राणरक्षार्थमेव दिशं पलायते अतः प्रियं प्राणान् वदन्ति। (बृ.1/4/3)

बृहदारण्यके चतुर्थाध्यायस्य तृतीयब्राह्मणे आख्यानमिदं निर्दिष्टं, याज्ञवल्क्यः वैदेहं जनकमाजगाम स अग्निहोत्रशालायां जनकाय वरं ददौ कामप्रश्नस्य। सम्राट् पुरुषविषयकं प्रश्नमपृच्छत्, तत्समादधानः याज्ञवल्क्यः पुरुषस्य अपहतपांप्मा अभयं रूपं प्राह तद्दृष्टान्तेन समर्थयन् अवोचत् "तद्वा अस्यैतदतिच्छन्दा अपहतपाप्माऽभयं रूपं तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरं तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम्। अत्र स्त्रिया इत्यस्य विशेषणं प्रियया इति, स्त्री प्रिया इति उक्तं परञ्च आत्मभिन्ने वस्तुनि प्रियता उपपादिता इयं प्रियतापि स्वत्वबुद्ध्या एव। स्वस्य आत्मनः सम्बन्धात् भवति।

वाल्मीकीयरामायणस्य सुन्दरकाण्डस्य पञ्चदशे सर्गे सीतामन्विष्यतः भगवतः हनुमतः सीतायाः प्रथमदर्शनानन्तरं उक्तिरियं इदमेव तथ्यं समर्थयति–

**इयं कनकवर्णाङ्गी रामस्य महिषी प्रिया।**
**प्रणष्टापि सती यस्य मनसो न प्रणश्यति।।**
**अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम्।**
**तेनेयं स च धर्मात्मा मुहूर्त्तमपि जीवति।।**

इत्थं वेदोपनिषत्सु प्रेम परमतत्त्वरूपेण वा व्याख्यातमस्ति, एतदेव लौकिक-दशायां नानारूपात्मकं सत् आलम्बनभेदात् भेदबाहुल्यं भजते। संस्कृतवाङ्मयेऽस्य प्रेम्णः विस्तरेण वर्णनमुपलभ्यते, प्राधान्येन रसानन्दमभिलक्ष्य कृतेषु काव्येषु प्रेमतत्त्व-माधारभित्तिरूपेण स्थितमवलोक्यते। संस्कृतसाहित्ये वर्णितस्यास्य प्रेम्णः स्वरूपं भेदोपभेदाः प्रकारविशेषाश्च विस्तरेण अनुसन्धानयोग्यतामायान्ति।



# ब्रह्मसूत्रशाङ्करभाष्यस्थमङ्गलाचरणविमर्शः

**डॉ.करुणानन्दमुखोपाध्यायः**

## भूमिका

आद्यशङ्कराचार्यप्रणीतं ब्रह्मसूत्रशाङ्करभाष्यम् एको महान् ग्रन्थोऽस्ति, यस्य प्रयोजनम् अन्तेवासिनां मुमुक्षूणां निःश्रेयससिद्धिः। 'श्रेयांसि बहुविघ्नानि' इति नियमानुसारेण निःश्रेयससाधकस्य ब्रह्मसूत्रभाष्यात्मकमहाग्रन्थस्य निर्मितौ विघ्नबाहुल्यं सम्भावितमस्ति। विघ्नानामुपस्थितौ शास्त्रप्रतिपादिते अर्थे अप्रतिपत्त्यन्यथा-प्रतिपत्तिविप्रतिपत्तयः सम्भवन्ति। "विघ्नविध्वंसकामो मङ्गलमाचरेत्" इत्यनुमितश्रुत्या विघ्नविनाशाय ब्रह्मसूत्रभाष्यप्रारम्भे आद्यशङ्कराचार्यस्य कृते मङ्गलाचरणम् अनुष्ठेयमासीत्। परन्तु तेन तन्नानुष्ठितम्।

किञ्च "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते" इति महाभाष्यकाराणाम् एतत्प्रसिद्धोक्त्यनुसारं प्रत्येकं शिष्टेन ग्रन्थप्रणेतृणा ग्रन्थप्रारम्भे मङ्गलाचरणं करणीयम् अस्ति, एष एव शिष्टाचारः, किञ्च अस्माकम् अन्तेवासिनां कृते शिष्टाचारः प्रमाणम्। मङ्गलाचरणात्मक-शिष्टाचारपालनाभावे ब्रह्मसूत्रभाष्यम् अनाप्तप्रणीतमस्ति इत्यपि धारणा अन्तेवासिनां हृदये सम्भाव्यते, तस्माच्च तेषां ग्रन्थाध्ययने अप्रवृत्तिरपि सम्भाव्येत। अतः स्वरचितग्रन्थाध्ययने अन्तेवासिनां प्रवृत्त्युत्पत्तयेऽपि आद्यशङ्कराचार्येण ब्रह्मसूत्रशाङ्करभाष्यप्रारम्भे मङ्गलाचरणं कर्तव्यमासीत् परन्तु तेन तत्र कृतम्।

प्रश्नो जायते यत् किम् आद्यशङ्कराचार्यः शिष्टाचारम् उल्लङ्घयन् ब्रह्मसूत्रभाष्य-संरचनायां प्रवृत्तोऽभवत्?

## ब्रह्मसूत्रशाङ्करभाष्यप्रारम्भे मङ्गलाचरणं विद्यते

एतत्प्रश्नस्य समाधानविषये आचार्यवाचस्पतिमिश्रचरणाः, तदनुयायिनः अमलानन्द-प्रभृतयः, अन्ये च अनेके व्याख्यातारः मौनावलम्बिनो दृश्यन्ते। आचार्यपद्मपादः, आचार्यप्रकाशात्मपतिचरणाः, अन्ये च विवरणप्रस्थानानुयायिनः आचार्याः एतत्प्रश्नस्य समाधानं कुर्वन्तः कथयन्ति – आद्यशङ्कराचार्यपादैः ब्रह्मसूत्रशाङ्करभाष्यप्रारम्भे मङ्गला-चरणं कृतम्। इष्टदेवतानमस्कारात्मकमङ्गलाचरणाऽकरणेऽपि देवतातत्त्वानुस्मृत्यात्मकं

मङ्गलाचरणं तैरनुष्ठितमेव। तथाहि "**युष्मदस्मत्प्रत्ययगोचरयोर्विषय-विषायिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायां तद्धर्माणामपि सुतराम् इतरेतरभावानुपपत्तिः, इत्यतोऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम्।**" आद्यशङ्कराचार्यस्य इयं प्रथमपङ्क्तिः तत्त्वानुस्मरणात्मकतया मङ्गलाचरणमस्ति। तात्पर्यमिदमस्ति युष्मत्प्रत्ययेन प्रकाशितवस्तुनः बुद्ध्याद्यनात्मभूतजडविषयाः, अस्मत्प्रत्ययेन प्रकाशित-मस्ति विषयी अर्थात् शरीरादिसमस्तानात्मभूतजडविषयाणां प्रकाशकः शुद्धः विज्ञानघनः प्रत्यगात्मा। एतदुभयम् अन्धकारप्रकाशवत् परस्परविरुद्धस्वभावतया तयोः इतरेतरभावः तादात्म्याध्यासो वा न सम्भवति, तस्माच्च एतद्धर्मिणोः विद्यमानधर्माणामपि परस्परविनिमयात्मकसंसार्गाध्यासोऽपि न सम्भवति। तथा च एतया पङ्क्त्या चिदात्मनि अध्यासमात्रस्य निषेधः क्रियते।

उपर्युक्तभाष्यपङ्क्तौ विद्यमानमिथ्याशब्दः निषेधवाचकोऽस्ति। आचार्यः पद्मपादः भाष्यस्थमिथ्याशब्दस्य अर्थं प्रतिपादयन् कथयति– **अध्यासो नाम – अतद्रूपे तद्रूपाभासः स मिथ्येति भवितुं युक्तम् इति। मिथ्याशब्दो द्व्यर्थः - अपह्नवचनोऽनिर्वचनीयतावचनश्च। अत्र अयमपह्नववचनः। मिथ्येति भवितुं युक्तम्, अभाव एव अध्यासस्य युक्तः इत्यर्थः** (पञ्चपादिका, पृ.42)। अर्थात् आद्यशङ्कराचार्यैः मिथ्याशब्दप्रयोगमाध्यमेन प्रत्यगात्मनि बुद्ध्यादि-विषयतादात्म्याध्यासस्य बुद्ध्यादिविषयनिष्ठजडत्वादिधर्माणां संसर्गाध्यासस्य च अभावः प्रतिपाद्यते। प्रकृते तु भाष्यकारेण अध्यासाभावप्रतिपादनवेलायां धर्मिरूपेण प्रत्यगभिन्नब्रह्मतत्त्वस्य स्मरणात्मकं मङ्गलाचरणं कृतम्।

## वाक्यभेदस्य आशङ्का

अत्र एकः प्रश्न उदेति यत् **"युष्मदस्मत्प्रत्ययगोचरयोः"** इत्यादिवाक्यात् प्रत्यगात्मनिष्ठाऽध्यासाभाव एव प्रतिपाद्यते, न तु देवतातत्त्वानुस्मृतिरपि। तथा सति वाक्यभेदः स्यात्। **सकृदुच्चरितं वाक्यं सकृदेवार्थं गमयति** इति नियमानुसारेण एकं वाक्यम् एकमेवार्थं प्रतिपादयति, अर्थद्वयप्रतिपादने तु वाक्यभेदः दुर्वारः स्यात्। **मीमांसाभाष्यकारशाबरस्वामिना** वाक्यभेदस्वरूपं प्रतिपादयन् आह–**"उभयविधाने वाक्यभेदः"** इति (शाबरभाष्यम् 1.4.2)। अर्थात् अर्थद्वयस्य प्रतिपादनं विधानं वा यदि एकेन वाक्येन क्रियते तदा वाक्यभेदो भवति।

यथा प्रमाणान्तरेण यागगुणयोरुभयोरप्यप्राप्तत्वात् 'सोमेन यजेत' इति विधि-



वाक्येन यागसोमयोः उभयोर्विधानमभीष्टं वर्तते। उभयोः पृथग्विधाने स्वर्गमुद्दिश्य यागस्य यागञ्चोद्दिश्य सोमस्य विधानं भवति, तथा सति वाक्यभेददोषो भवति, यतो हि 'सोमेन यजेत' इत्यनेन वाक्येन तदा 'यागेन स्वर्गं भावयेत्' 'सोमेन यागं भावयेत्' इति शाब्दबोधद्वयस्वीकारप्रसक्तिः स्यात्। एकेन वाक्येन शाब्दबोधद्वयप्रसक्तौ शबरस्वामिन इयं प्रसिद्धा उक्तिर्विद्यते–'**वाक्यं भिद्येत**' (शाबरभाष्यम् 1.4.3)। वाक्यभेददोषात् विमुक्तये एव मीमांसकाः सोमपदे मत्वर्थीयलक्षणामङ्गीकृत्य सोमविशिष्टयागविधानं स्वीकुर्वन्ति।

प्रकृते च आद्यशङ्कराचार्यः "युष्मदस्मत्प्रत्ययगोचरयोः. . . ." इत्यादि प्रथम वाक्यमेकवारमेव प्रयुङ्क्ते। "सकृदुच्चरितं वाक्यं सकृदेवार्थं गमयति" इति नियमेन उक्तं प्रथमवाक्यं प्रत्यगात्मनिष्ठाऽध्यासाभावं प्रत्यगात्मतत्त्वानुस्मृतिं वा प्रतिपादयितुं शक्नोति, अन्यथा उभयविधाने वाक्यभेददोषः दुर्वारः स्यात्। तस्माद् एकस्यैव बोधस्वीकार उचित इति। आद्यशङ्कराचार्यः प्रथमपङ्क्त्या चिदात्मनि अध्यासाभावम् एव प्रत्यपादयत् इत्यस्ति सर्वेषाम् आचार्याणां सम्मतिः, तस्मात् प्रत्यगात्मतत्त्वानु-स्मृत्यात्मकं मङ्गलाचरणं न "युष्मदस्मत्प्रत्ययगोचरयोः. . . ." इत्यादिप्रथमवाक्य-प्रतिपाद्यम् इत्यमेव स्वीकर्तव्यम् अन्यथा वाक्यभेदप्रसक्तिः।

## शङ्कायाः समाधानम्-

एतच्छङ्कायाः समाधानं कुर्वन् आचार्यः पद्मपादः कथयति–**अत्रोच्यते 'युष्मदस्मदि'त्यादि 'तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यन्तमेव भाष्यम्। अस्य चायमर्थः सर्वोपप्लवरहितो विज्ञानघनः प्रत्यगर्थ इति। तत्कथञ्चन परमार्थत एवम्भूते वस्तुनि रूपान्तरवदवभासो मिथ्येति कथयितुम्। तदन्यपरादेव भाष्यवाक्यान्निरस्तसमस्तोपप्लवं चैतन्यैकतामात्मानं प्रतिपाद्यमानस्य कुतो विघ्नोपप्लवसम्भवः? तस्मादग्रणीः शिष्टाचारपालने भगवान् भाष्यकारः।** (पञ्चपादिका पृ.33)।

इदमत्राऽऽकूतं यत् ज्ञानस्वरूपप्रत्यगात्मा सर्वविधविघ्नदोषादिभ्यः सर्वथा रहितोऽस्ति। परमार्थत एवम्भूते प्रत्यगात्मनि अन्यात्मनावभासकतात्मकः अध्यासः कथमपि न सम्भवति। प्रत्यगात्मनिष्ठाऽध्यासाभावप्रतिपादकात् प्रथमवाक्यात् सर्वविध-दोषशून्यचैतन्यैकरसस्य प्रत्यगात्मनः प्रतिपादनात् भाष्यकारस्य कृते विघ्नजन्यविपत्तिः कथं सम्भवति? नैव सम्भवति इत्यर्थः। तथा च मङ्गलाचरणात्मकशिष्टाचारपालने आद्यशङ्कराचार्यः अग्रगण्योऽस्ति।

तात्पर्यमिदमस्ति यत् यद्यपि आद्यशङ्कराचार्येण प्रत्यगात्मनि अध्यासाभावप्रति-

पादनाय एव "युष्मदस्मत्प्रत्ययगोचरयोः. . ." इत्यादिप्रथमवाक्यं लिखितं, तेन चिदात्मनिष्ठाऽध्यासाभाव एव तद्वाक्यस्य एकमात्रं प्रतिपाद्यमस्ति, प्रत्यगभिन्नब्रह्म-तत्त्वानुस्मृत्यात्मकं मङ्गलाचरणं न तत्प्रतिपाद्यम्, तथापि यथा सायंकाले गोशालायां धूमार्थमेव अग्निं प्रज्ज्वालयति गोपालकः, तस्य अन्यत्किमपि प्रयोजनं नास्ति, तत्र अग्निः स्वभावादेव तृणादिकं दहति एव। तथैव प्रकृतेऽपि प्रत्यगात्मनिष्ठाऽध्यासाभाव-प्रतिपादनाय भाष्यकारेण "युष्मदस्मत्प्रत्ययगोचरयोः" इत्यादिप्रथमवाक्यलेखनकाले प्रत्यगात्मतत्त्वस्य स्मरणं कृतम्, तच्च स्मरणं स्वभावादेव विघ्नजन्यविपत्तीनां समूलं नाशम् अकरोत्। विघ्नजन्यविपत्तीनां नाशकं प्रत्यगभिन्नब्रह्मतत्त्वस्मरणमस्ति मङ्गलाचरणम्। मङ्गलाचरणमिदं न प्रथमवाक्यप्रतिपाद्यम् अतो विधेयभेदाभावात् न वाक्यभेदगन्धोऽपि इति शम्।

## सन्दर्भाः


1. आद्यशङ्कराचार्यः, ब्रह्मसूत्रशाङ्करभाष्यम्, श्रीदक्षिणामूर्तिमठप्रकाशनम्, प्रथमसंस्करणम् 2002, वाराणसी।

2. आचार्यः पद्मपादः, पञ्चपादिका, महेश–अनुसन्धानसंस्थानम्, प्र.सं.1992

3. आचार्यः प्रकाशात्मयतिः, पञ्चपादिकाविवरणम्, महेशअनुसन्धानसंस्थानम्, प्रथमसंस्करणम् 1992, वाराणसी।

4. श्रीमदखण्डानन्दमुनिः, तत्त्वदीपनम्, महेशअनुसन्धानसंस्थानम्, प्रथमसंस्करणम् 1992, वाराणसी।

5. श्रीविष्णुभट्टोपाध्यायः, ऋजुविवरणम्, महेश-अनुसन्धानसंस्थानम्, प्र.सं.1992

6. आचार्यवाचस्पतिमिश्रः, भामती, परिमल पब्लिकेशन्स, तृ.सं.1996,दिल्ली

7. श्रीमदमलानन्दसरस्वती, कल्पतरुः, परिमल पब्लिकेशन्स, तृ.सं.1996,दिल्ली

8. श्रीमदप्पयदीक्षितः, परिमलः, परिमल पब्लिकेशन्स, तृ.सं.1996,दिल्ली।

9. श्रीमदानन्दगिरिः, न्यायनिर्णयः, श्रीदक्षिणामूर्तिमठप्रकाशनम्, प्र.सं.2002

10. श्रीचित्सुखाचार्यः, भाष्यभावप्रकाशिका, श्रीदक्षिणामूर्तिमठप्रकाशनम्, प्र.सं.2002, वाराणसी।

11. आचार्यः जैमिनिः, मीमांसादर्शनम्, आनन्दाश्रमप्रकाशनम्, द्वि.सं. 1970,पुणे।




# आधुनिकसंस्कृतकवयित्र्यः

डॉ. उमा तिवारी

विश्वस्य अन्यभाषाणाम् अपेक्षया संस्कृतभाषायाः साहित्यं बहुविशालं वर्तते। ईदृशस्य विशालस्य संस्कृतसाहित्यस्य निर्माणे समाजस्य प्रधानभूतानां पुरुषाणामेव न प्रत्युत अर्द्धांशभूतानां नारीणामपि महत् अवदानं वर्तते। वैदिककालात् आरभ्य इदानीं यावत् नार्य्यः साहित्यनिर्माणपरम्परां सततं प्रवाहयन्त्यः सन्ति। वैदिककालीनाः अपाला-रोमशाघोषालोपमुद्राशाश्वतीविश्ववारायमीमेधादक्षिणासरमाप्रभृतयः नार्य्यस्तु योगबलेन वैदिकमन्त्रान् दृष्टवत्यः सन्ति। बहूनां मन्त्राणां दर्शनकर्तृत्वेन तासामुल्लेखः वर्तते। एवमेव मैत्रेयी, सुलभा, आत्रेयीगार्गीप्रभृतयः नार्य्यः दर्शनशास्त्रीयज्ञानेन नैजं पाण्डित्यं ख्यापितवत्यः सन्ति। बौद्धकालेगौतमी–उत्पलवर्णा–क्षेमा–तारा–उत्तरा–संघा–पूर्णा–पटाचारा–पूर्णिमाप्रभृतयः अनेकाः नार्य्यः अभवन् यासामुल्लेखः थेरीगाथा- नामके बौद्धपुस्तके वर्तते। किम्बहुना गङ्गा–तिरुमलाम्बा–शशिप्रभा–लक्ष्मीदेवी–विज्जिका मोरिका विद्या शीलाभट्टारिकादीनां कवयित्रीणां काव्यानि काव्यकलाकाशे कीर्तिकौमुदी इव राजन्ते। नारीणाम् इयं साहित्यनिर्माण 'परम्परा'धारा अद्यापि निर्बाधगत्या प्रवहन्ती वर्तते। अद्यापि सम्पूर्णस्यापि भारतस्य प्रत्येकं कोणे पर्याप्ताः कवयित्र्यः सन्ति याः काव्यनिर्माणेन संस्कृतसाहित्ये अनुदिनं कामपि विशिष्टामेव शृङ्खलां योजयन्त्यः सन्ति।

आधुनिकसंस्कृतकवियत्रीषु प्रख्यातां पण्डितां क्षमारावमहाभागां को न जानीते। तासां भूयांसि काव्यानि आधुनिकसंस्कृतसाहित्याकाशे देदीप्यमाननक्षत्राणीव प्रकाशन्ते। महाराष्ट्रप्रदेशे लब्धजन्मनी इयं कवयित्री नानाविधानि काव्यानि रचितवती, तेषु श्रीरामदासचरित - श्रीतुकारामचरितश्रीज्ञानेश्वर-चरितप्रभृतीनि महाकाव्यानि नूनमेव कवयित्र्याः लोकोत्तरप्रतिभां ख्यापयन्ति। महाराष्ट्रदेशीयसाधूनां जीवनवृत्तमाश्रित्य लिखितानि इमानि काव्यानि नानाभावभरितानि, विविधविषयसंबलितानि सन्ति कस्य सहृदयस्य मनांसि न मोहयन्ति, चित्तानि वा नानुरञ्जयन्ति। एवमेव अस्याः एव कवयित्र्याः पुत्री पण्डिता लीलारावमहाशया अभूत् या किल मातेव काव्यरचनायां

दर्शनग्रन्थानां निबन्धने च प्रख्याता अभवत्। "गिरिजायाः प्रतिज्ञा" नामकम् अस्याः नाटकं पौराणिकमपि आख्यानं नितान्तं रोचकतया प्रस्तौति, नाटकस्य पात्राणां संवादाः अपि भावगाम्भीर्यं विषयवैशिष्ट्यञ्च सम्यक् उपस्थापयन्ति। एवमेव कवियित्र्याः अस्याः मीराचरित्र-मिथ्याग्रहण–असूयनी-क्षणिकविभ्रम-कपोतालय-कटुविपाक-तुलाचलाधिरोहणमायाजाल-वृत्तशंसिच्छत्र-स्वर्णपूर–कृषिबल-गणेशचतुर्थी-होलिकोत्सव-प्रभृतयः रचनाः संस्कृतसाहित्यनिर्माणपरम्परायां कामपि विशिष्टमेव शृङ्खलां योजयन्ति।

बङ्गप्रदेशीया रमाचौधरीमहोदया अपि साहित्यनिर्माणपरम्परायां विशिष्टमेव स्थानं स्थापयति। तया पत्या सह अहमहमिकया त्रयोदश नाटकानि लिखितानि। शंकर-शंकर-देशद्वीप-पल्लीकमल–कविकुलकोकिल-मेघमेदूरमेदनीय-निवेदितनिवेदितम्-अभेदानन्द-रसमयरासमणि-चैतन्यचैतन्यम्-नगरनूपर-भारतपथिक-अग्निवीणा-गणदेवता-भारततात-यतीन्द्रसंसारामृतप्रभृतीनि अस्याः काव्यानि नूनमेव नानाविधान् रसान् अभिव्यञ्जयन्ति।

कर्णपुरवास्तव्या नलिनीशुक्लमहोदया अपि अस्यां श्रेण्याम् अग्रगण्या एव वर्तते। तस्याः वाणीशतकमिति काव्यं शिखरिणीच्छन्दसि निबद्धं वर्तते। काव्येऽस्मिन् भावानुकूला शब्दसंरचना, पदप्रवृत्तिः अलंकाराश्च सर्वत्रैव प्राचुर्येण दृश्यन्ते, संस्कृतसाहित्यस्य गीतिकाव्यपरम्परायाः अयमेकः आदर्श एव। एवमेव भावाञ्जलिनामकः काव्यग्रन्थः अस्याः कवयित्र्याः गीतानां संकलनं वर्तते।

क्रमेऽस्मिन् पाटलिपुत्रवास्तव्या डॉ. मिथिलेश कुमारी मिश्रमहोदया कथं विस्मर्तुं शक्यते, या किल भारतीयेतिहासस्य महानायकं सुभाषचन्द्रबोसमहोदयं नायकत्वेनाश्रित्य दशसर्गेषु निबद्धं चन्द्रचरितमिति महाकाव्यं विरचितम्। चरितकाव्यपरम्परायामयमेकः अभिनवप्ररोहो विद्यते। न केवलं इदमेव प्रत्युत अस्याः कवयित्र्याः सरसमधुरगीतानां संकलनमपि 'काव्यायनी' इति नाम्नां प्रकाशितं वर्तते, यत्र पञ्चाशतः गीतानां सन्निवेशः विद्यते।

एवमेव भारतस्य प्रत्येकं कोणे ज्ञाता अनेकाः कवयित्र्यः सन्ति याः निजनवनवरचनाभिः संस्कृतसाहित्यं सम्वर्द्धयन्ति। वस्तुतः भारतस्य सर्वासामाधुनिककवयित्रीणां रचनाः एकत्र क्रियते तदा महाभारतसदृशः कश्चन विशालः ग्रन्थः प्रकाश्येत।



# जयशेखरसूरिकृतं जैनकुमारसम्भवम् - समीक्षणम्

डॉ. नीलम रानी श्रीवास्तव

वाल्मीकिव्यासकालिदासप्रभृतीनां महाकवीनां प्रत्यक्षं परोक्षं वा प्रभावः परवर्तिनां कवीनां कृतिषु दरीदृश्यते। वाल्मीकिव्यासादीनामपेक्षयाऽधमर्णता परवर्तिषु कविषु बहुशः दृश्यते। एतैः कविभिः प्रभावितैः बहुभिः जैनकविभिः नानाविधाः रचनाः कृताः। संस्कृतपुराणान्यनुसृत्य जैनपुराणानां रचना कृता इति तु विदितमेव सर्वैः संस्कृतज्ञैः। जैनकविना जयशेखरसूरिणा कालिदासीयं कुमारसम्भवमनुसृत्य एकं जैनकुमारसम्भवं रचितमिति तु नातिप्रसिद्धम्। एतस्मात्कारणात् अस्मिन् विषयेऽस्ति किञ्चिद् विचारणीयम्। कालिदासकृतकुमारसम्भवशैल्यां लिखितं जैनकुमारसम्भवमपि एकं रोचकं सरसं पाण्डित्यपूर्णञ्च महाकाव्यं जयशेखरसूरिणा प्रणीतम्।

महाकविजयशेखरसूरिणः रचनाकालः विक्रमसंवत्सरस्य चतुर्दश–पञ्चदश शताब्द्योः मध्ये वर्तते।[1] जैनकुमारसम्भवे महाकविना जैनानामादितीर्थङ्करस्य ऋषभदेवस्य तस्य पुत्रस्य कुमारभरतस्य च चरिते वर्णिते। महाकाव्यस्यास्य वैशिष्ट्यमिदं यदस्मिन् महाकविकालिदासकृतकुमारसम्भवस्य शैली पदे पदे दृश्यते। महाकविजयशेखरसूरिणा नैषधकारश्रीहर्षेणेव यदा कदा स्वकीयकाव्यस्य वैशिष्ट्यमुक्त्वा गर्वोक्तयः कृताः, अन्यत्र तु तेनैव कविना महाकविकालिदासवत् महाकाव्यरचनासम्बद्धः स्वकीयो विनयोऽपि प्रदर्शितः। ऋषभदेवस्य गुणानां गणनाप्रसङ्गे जयशेखरसूरिणा स्वकीयः सङ्कोचः प्रदर्शितो यथा ऋषभदेवस्य गुणानां गणनाप्रसङ्गे महाकविना उक्तम्।[2] जयशेखरसूरिणः सङ्कोचोऽयं कालिदासस्य सङ्कोचं स्मारयति यत् महाकविना कालिदासेन रघूणामन्वयवर्णने स्वकीयः सङ्कोचः प्रकटितः।[3] यथा महाकविः कालिदासः रघूणामन्वयप्रभावितो भूत्वा रघुवंशस्य रचनां कृतवान् तथैव महाकविना जयशेखरसूरिणापि ऋषभदेवप्रभावितेनैव तस्य चरितं वर्णितम्। कवेरियं स्वीकारोक्तिः यद् ऋषभभेदवस्य प्रभाव एव तं मुखरीकरोति।[4] जयशेखरसूरिणापि श्रीहर्षमनुसृत्य स्वकीये विषये गर्वोक्तयः कृताः। यथा महाकविः श्रीहर्षः स्वकीयं काव्यं विदुषां वैदुषीनिकषमुक्त्वा सहृदयंमन्यान् जनान् तस्याध्ययनात् वर्जयति।[5]

पद्यस्यास्य छाया जैनकुमारसम्भवस्याधोलिखिते पद्ये द्रष्टुं शक्यते।[6]

न केवलं स्वकीयस्य महाकाव्यस्य विषयेऽपितु स्वकीयरचनाकौशलविषये जयशेखरसूरिणा बहूक्तम्। जैनकुमारसम्भवस्य सर्गान्तवर्तिन्यां पुष्पिकायां स्वकीयं महाकवित्वसरित्कृते महाशैलमुक्तवान्। जयशेखरसूरिणः रचनाः चतस्रः सन्ति- प्रबोधचिन्तामणिः उपदेशचिन्तामणिः जैनकुमारसम्भवं धम्मिलचरितञ्च।[7] जिनरत्नकोशानुसारं जयशेखरसूरिणः रचनाः सन्ति आत्मावबोधकुलम्, उपदेशचिन्तामणिः, छन्दःशेखरः, जैनकुमारसम्भवम्, पुष्पमाला, प्रबोधचिन्तामणिः नवतत्त्वकुलकम्, धम्मिल्लचरित्रम्, धर्मसर्वस्वाधिकारः, क्रियागुप्तस्तोत्रम्, सम्बोधसप्ततिका, त्रिभुवनदीपकप्रबन्धः, अजितनाथस्तवटीका, आत्मकुलकम्, आत्मबोधकुलञ्च।[8] केषाञ्चित् अन्येषामपि ग्रन्थानां रचनाकाररूपेणापि जयशेखरसूरिः स्मर्यते। ताः रचनाः सन्ति आराधनाचतुर्विंशतिजिनस्तवनम्, वीरजिनस्तवनम्, मुनिसुव्रतजिनस्तवनम्, अजितशान्तिस्तवनम्, जीरापल्लिस्तवनम्, नवखण्डपार्श्वनाथस्तवनम्, आराधना- सूक्तसङ्ग्रहः, उपदेश-मालावचूरिः, शत्रुञ्जयतीर्थद्वात्रिंशिका, महावीरजिनद्वात्रिंशिका, उपदेशचिन्तामणिः, अवचूरिगिरिनारगिरिद्वात्रिंशिका, नेमिनाथफागु, अर्बुदाचलवीनती च।[9] एतेषु ग्रन्थेषु संस्कृतकृतयः सन्ति जैनकुमारसम्भवम्, प्रबोधचिन्तामणिः, धर्मसर्वस्वाधिकारः, धम्मिलचरितंञ्च।

जयशेखरसूरिविरचितस्य जैनकुमारसम्भवस्य विशिष्टमध्ययनमपेक्षितमस्ति। जयशेखरसूरिणा जैनकुमारसम्भवस्य रचनायाः प्रेरणा कविकुलगुरोः कालिदासादेव प्राप्ता। तथापि जयशेखरसूरिः कालिदासस्याधमर्णो न प्रतीयते। कतिपयेषु स्थलेषु जयशेखरसूरिणा कालिदासस्यानुकरणं नूनमेव कृतम्। स्थलानीमानि सन्ति मङ्गलाचरणं वरवध्वोरलङ्करणं विवाहोत्सवः वरदर्शनाय स्त्रीणां कुतूहलञ्च। काव्ययोर्द्वयोः भावसाम्यं तु बहुशः दृश्यते। महाकविकालिदासेन कुमारसम्भवस्य प्रारम्भः वस्तुनिर्देशा- त्मकमङ्गलाचरणेन कृतः। श्लोकोऽयं उपजातिनाम्नि छन्दसि निबद्धः। पद्यमस्ति-

**अस्त्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो नाम नगाधिराजः।**
**पूर्वापरौ तोयनिधी वगाह्य**
**स्थितः पृथिव्या इव मानदण्डः।।[10]**

जयशेखरसूरिणापि स्वकीयस्य महाकाव्यस्य मङ्गालचरणं वस्तुनिर्देशात्मकरूपेण कृतम्। छन्दस्तु उपजातिरेवास्ति। द्रष्टव्यमिदं पद्यं निर्देशात्मकरूपेण कृतम्। छन्दस्तु उपजातिरेवास्ति। द्रष्टव्यमिदं पद्यं-



**अस्त्युत्तरस्यां दिशि कोशलेति**
**पुरी परीता परमर्द्धिलोकैः।**
**निवेशयामास पुरः प्रियायाः**
**स्वस्या वयस्यामिव यां धनेशः।।[11]**

द्वयोर्महाकाव्ययोः वर्णनेषु रसपरिपाके प्रकृत्यादिवर्णने च बहुधा साम्यं दृश्यते। विवाहपूर्वं कन्यास्नानस्य दृश्ये द्वयोर्महाकाव्ययोः समानमेव वर्णिते-

**विन्यस्तवैदूर्यशिलातलेऽस्मिन्नाबद्धमुक्ताफलभक्तिचित्रे।**
**आवर्जिताष्टापदकुम्भतोयैः सतूर्यमेनां स्नपयांबभूवुः।।[12]**

तथा च-

**अथालयः शैलिभिदः प्रियायाः संस्कर्तुकामा वसुधैकरत्ने।**
**निवेश्य कन्ये कनकस्य पीठे रत्नासनाख्यां ददुरस्य दक्षाः।।[13]**

कुमारसम्भवे सख्याः पार्वत्याः केशपाशः अगरुचन्दनादिभिः अलङ्कृतः। लोध्रगोरोचनादिविलेपनैः पार्वत्याः गौरं कपोलस्थलं कर्णाश्यामालम्बितेन यवाङ्कुरेण सहृदयानां हृदयं ह्रियते। तथा च सख्यानया पार्वत्याः नेत्रे कज्जलेनाञ्जिते स्तः। कविनोक्तं यत् पार्वत्याः नेत्रयोः सौन्दर्यं तु नैसर्गिकमासीत्। तयोः कज्जलादिभिः न किञ्चिद् वैशिष्ट्यमुत्पादितम्-

**धूपोष्मणा त्याजितमार्द्रभावं केशाऽन्तमन्तःकुसुमं तदीयम्।**
**पर्याक्षिपत्काचिदुदारबन्धं दूर्वावता पाण्डुमधूकदाम्ना।।[14]**
**कर्णार्पितो लोध्रकषायरूक्षे गोरोचनाक्षेपनितान्तगौरे।**
**तस्याः कपोले परभागलाभाद् बबन्ध चक्षुँषि यवप्ररोहः।।[15]**
**तस्याः सुजातोत्पलपत्रकान्ते प्रसाधिकाभिर्नयने निरीक्ष्य।**
**न चक्षुषोः कान्तिविशेषबुद्धया कालाञ्जनं मङ्गलमित्युपात्तम्।।[16]**

वर्णनेन अनेन जैनकुमारसम्भवस्य कानिचिद् पद्यानि तुलनीयानि वर्तन्ते। सुमङ्गलासुनन्दयोः केशपाशेषु लग्नेन कुङ्कुमादिविलेपनेन तयोः मुखयोः श्रीवृद्धिरेव कृता-

**भोगीदमीयः किल केशहस्तस्ततान यूनां हृदि यं विमोहम्।**
**सोऽवधि चूडामणिनापि तेषामथो गतिः केत्यवदन्मघोनी।।[17]**

जैनकुमारसम्भवस्य एका उक्तिर्द्रष्टव्या। कयाचिद् देवाङ्गनया सुमङ्गलासुनन्दयोः कर्णद्वारे कर्णाभरणेन सज्जिते। कविना उत्प्रेक्षितं यत् तयोः सुन्दर्योः कर्णाच्छादनस्य कारणमिदं यत् आच्छादनेन विना युवकानां चित्तानि कामान्धानि सन्ति न तत्र पतेयुरिति-

**मा स्म स्मरान्धं त्वरया पुरान्तःसंचारि चेतः पततत्र यूनाम्।**

**इतीव काप्युत्पलकर्णपूरैस्तत्कर्णकूपौ त्वरितं प्यधत्त।।**[18]

कालिदासरचितकुमारसम्भवजयशेखरसूरिविरचितजैनकुमारसम्भवयोः अलङ्कार-साम्यमपि बहुशः दरीदृश्यते। आचार्यैरुक्तं यत् काव्येषु शोभाकारिधर्मरूपेण अलङ्काराणां महत्त्वमस्ति। काव्येषु अलङ्काराः ललनासु कटककेयूरादिवत् शोभन्ते। प्रतिभावतां कवीनां रचनासु अलङ्काराः अहमहमिकया परापतन्ति। अतएव उक्तं ध्वन्यालोकवृत्ति-कारेण-'रससमाहितचेतसः प्रतिभावतः कवेरहम्पूर्विकया परापतन्ति अलङ्काराः।'[19] प्रस्तुतयोः महाकाव्ययोः ते ते अलङ्काराः न पृथक्प्रयत्ननिर्वर्त्याः अपितु तेषां सौष्ठवेन इदमेव प्रतिभाति यत् ते ते अलङ्काराः तत्र तत्र स्थलेषु अहमहमिकयैव परापतन्ति।

अर्थालङ्कारेषु उपमालङ्कारस्य महत्त्वं विदितमेव सहृदयैः। आलङ्कारिकैः सा तु अनेकेषामलङ्काराणां बीजभूतत्वेन निर्दिष्टा-

**उपमैवानेकप्रकारवैचित्र्येणानेकालङ्कारबीजभूतेति प्रथमं निर्दिष्टा।**[20]

संस्कृतसाहित्याकाशे उपमाप्रयोगसम्बन्धे कालिदासस्य महती ख्यातिः। प्रसिद्धं चास्ति यत् 'उपमा कालिदासस्य' इति। महाकवेः जयशेखरसूरिणः उपमालङ्कारं प्रति विशेषः पक्षपातः दृश्यते। जैनकुमारसम्भवे पूर्णोपमायाः एकमुदाहरणमत्र द्रष्टव्यम्-

**लसद्विशेषाकृतिवर्णवेषा लेखाः परेषामसुलंभमर्भम्।**

**यं बालहारा इव खेलनौघैः कटीतटस्थं रमयांबभूवुः।।**[21]

पार्वत्याः सौन्दर्यवर्णने कालिदासेनोक्तम्-

**आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम्।**

**पर्याप्तपुष्पस्तबकावनम्रा सञ्चारिणी पल्लविनी लतेव।।**[22]

जयशेखरसूरिणापि सुमङ्गलायाः सौन्दर्यवर्णने उपमायाः कृतः प्रयोगो द्रष्टव्यः-

**स्मेरास्यपद्मा स्फुटवृत्तशालि-क्षेत्रा नदद्धंसकचारुचर्या।**

**याऽपास्तपङ्का विललास पुण्यप्रकाशकाशा शरदङ्गनीव।।**[23]

द्वयोः काव्ययोः लुप्तोपमायाः एकैकम् उदाहरणं द्रष्टव्यम्-

**शतमखस्तमखण्डितपौरुषं, सपदि मातृगृहे विहिताग्रहः।**

**अभिनिषण्णवरेन्दुमुखीद्वयं, जिनवरं नवरङ्गभृदासयत्।।**[24]

**हरस्तु किञ्चित्परिलुप्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।**

**उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि।।**[25]

कल्पनाचमत्कारं प्रदर्शयितुं कवयः उत्प्रेक्षालङ्कारमाश्रयन्ते। द्वयोः कव्योः काव्येषु उत्प्रेक्षालङ्कारस्य प्रयोगोऽपि दृश्यते। शरदर्तौ कमलानां विकासः हेमन्तर्तौ तेषां



विनाशः च स्वाभाविकमेव भवति। जयशेखरसूरिणा उत्प्रेक्षितं यत् शरदृतौ यैः मदपरवशैः पद्मैः ऋषभदेवस्य स्तोकतरां मुखश्रियं हर्तुं वाञ्छिता, तानि कमलानि विनश्य हेमन्तर्तुः तेषाम् अपराधस्य फलं दत्तवान्। उदाहरणं द्रष्टव्यम्-

**मनाङ् मुखश्रीः परमेश्वरस्य जिहीर्षिता यैः शरदा मदाढ्यैः।**

**विधायमन्तोः फलमन्तेषु पद्मेषु भेजे प्रशलर्तुरेनम्।।**[26]

महाकविना कालिदासेन कृतः वाच्योत्प्रेक्षायाः प्रयोगः द्रष्टव्यः-

**यश्चाऽप्सरोविभ्रममण्डनानां सम्पादयित्रीं शिखरैर्बिभर्ति।**

**बलाहकच्छेदविभक्तरागामकालसन्ध्यामिव धातुमत्ताम्।।**[27]

अर्थान्तरन्यासालङ्कारोऽपि कालिदासजयशेखरसूरिकव्योः प्रियः। ऋषभदेवं विवाहाय प्रेरयतः इन्द्रस्येयमुक्तिः द्रष्टव्या-

**तनोषि तत्तेषु न किं प्रसादं न सायुगीनायदमीतवयीश।**

**स्याद्यत्र शक्तेरवकाशनाशः श्रियेत सूरैरपि तत्र साम।।**[28]

महाकविकालिदासप्रयुक्तार्थान्तरन्यासालङ्कारेषु सूक्तयः संस्कृतसाहित्ये तु प्रसिद्धाः सन्त्येव। द्रष्टव्यमिदमुदाहरणम्-

**अनन्तरत्नप्रभवस्य यस्य हिमं न सौभाग्यविलोपि जातम्।**

**एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।।**[29]

छन्दसां प्रयोगेऽपि द्वयोः महाकव्योः साम्यं बहुधा दृश्यते। उभाभ्यां कविभ्यां यानि छन्दांसि प्रयुक्तानि तानि सन्ति अनुष्टुप् उपजातिः रथोद्धता वंशस्थं मालिनी वसन्ततिलका। जैनकुमारसम्भवे शिखरिणीशार्दूलविक्रीडितशालिनीपृथिवीमन्दाक्रान्ता-वैश्वदेवीस्वागताद्रुतविलम्बितप्रहर्षिणीहरिणीन्द्रवज्रोपेन्द्रवज्रादीनां छन्दसां प्रयोगः बहुधा दृश्यते। कुमारसम्भवे तु वियोगिनीपुष्पिताग्राच्छन्दसोः प्रयोगोऽपि दृश्यते। उभाभ्यां कविभ्यां उपजातिच्छन्दसः प्रयोगः सर्वाधिकं कृतः। आचार्यक्षेमेन्द्रानुसारेण शृङ्गाररसा-लम्बनविभावरूपे उदारनायिकासौन्दर्यवर्णने उपजातिच्छन्दसः प्रयोगः स्यात्।[30] सुमङ्गलायाः सौन्दर्यवर्णने जयशेखरसूरिणा उपजातिच्छन्दस्य प्रयोगः कृतः। एकमुदाहरणं द्रष्टव्यम्-

**यज्ज्वालमालायुजि काञ्चनेनाहुतिः स्वतन्वा विहिता हुताशे।**

**तत्तेन तुष्टेन यदङ्गवर्णसवर्णतादायि मनाक्किमस्मै।।**[31]

सुमङ्गलायाः शीलवर्णनेऽपि उपजातिच्छब्दः प्रयुक्तम्-

**गरेणगौरीशगलो मृगेण, गौरद्युतिर्नीलिकयाम्बु गाङ्गम्।**

**मलेन वासः कलुषत्वमेति, शीलं तु तस्या न कथंचनापि।।**[32]

महाकविना कालिदासेनापि नायकस्य वंशवर्णने, नायकनायिकयोः सौन्दर्यवर्णने

उपजातिच्छन्दः प्रयुक्तम्। वंशवर्णने एकमुदाहरणं द्रष्टव्यम्–

**तां पार्वतीत्याभिजनेन नाम्ना बन्धुप्रियां बन्धुजनो जुहाव।**
**उमेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम।।[33]**

पार्वत्याः सौन्दर्यवर्णनेऽपि उपजातिच्छन्दःप्रयोगे कवेः कौशलं द्रष्टव्यम्–

**असम्भृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य।**
**कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे।।**
**उन्मीलितं तूलिकयेव चित्रं सूर्यांशुभिर्भिन्नमिवारविन्दम्।**
**बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन।।[34]**

द्वयोः काव्ययोः छन्दसां यः प्रयोगः कृतः तेन द्वयोः काव्ययोः सौष्ठववृद्धिरेव सञ्जाता।

रसाभिव्यक्तिदृष्ट्यापि द्वयोः महाकाव्ययोः साम्यं दरीदृश्यते। रसध्वनिवादिभिः आचार्यैः रसः काव्यात्मरूपेण प्रतिष्ठितः। मुनिना भरतेनोक्तम्–'न हि रसादृते कश्चिदर्थः प्रवर्त्तते।[35] आचार्यैः महाकाव्ये शृङ्गारवीरशान्तानामेकोऽङ्गीरसः स्वीकृतः। अङ्गरूपेण अन्यरसानां परिपोष इष्यते।[36] कुमारसम्भवजैनकुमारसम्भवयोः अङ्गी रसः शृङ्गारो वर्तते। जैनकुमारसम्भवे शान्तवात्सल्यहास्यभयानकरसानाम् अङ्गरूपेण परिपोषः दृश्यते। कुमारसम्भवे करुणरौद्राद्भुतरसानां परिपोषः दृश्यते। जैनकुमारसम्भवे विवाहपूर्वे सुमङ्गलासुनन्दयोः प्रसाधनवर्णे शृङ्गाररसस्य परिपोषः दृश्यते। द्वयोः कन्ययोः नितम्बस्थल्यां मेखलायाः क्षुद्रघण्टिकाभिः कृतः मधुरः शब्दः अश्वानां कण्ठावेष्टितघर्घरीघोषं स्मारयति। कविना उत्प्रेक्षितं यत् तयोः नितम्बस्थली कामदेवस्य अश्ववाहनिका भूमिरिव प्रतीयते। तद्यथा–

**त्रिभुवनविजिगोषोर्मारभूपस्य बाह्या-**
**ऽवनिरजनिविशाला तन्नितम्बस्थलीयम्।**
**व्यरचि यदिह काञ्ची किंकिणीभिः प्रवल्ग-**
**च्चतुरतुरगभूषा घर्घरीघोषशङ्का।।[37]**

ऋषभदेवस्य सुमङ्गलासुनन्दाभ्यां सह विवाहवर्णनप्रसङ्गेऽपि शृङ्गाररसस्य परिपोषः दृश्यते। एकमुदाहरणं द्रष्टव्यम्–

**तदाऽन्यबालावदुपेयिवत्प्रभोर्दिदृक्षयोत्पिञ्जलचित्तयोस्तयोः।**
**शचीनियुक्तस्वसखीनियन्त्रणा बहिर्विहारेऽभवदर्गलायसी।।[38]**

उपर्युक्तविवेचनेन इदं स्पष्टं यद् जयशेखरसूरिणा रचितं जैनकुमारसम्भवमपि महाकविकालिदासरचितं कुमारसम्भवमिव रसपेशलं विविधैरलङ्कारैलङ्कृतं संस्कृत-साहित्यस्य गौरवं वर्धापयति।



## सन्दर्भाः

1. (क) New Catalogus Catologorum Vol II, page no.347
   (ख) New Catalogus Catologorum Vol VI, page no.19
   (ग) Jain Religion and Literature by H.P. Kapadia, Vol I, Page no.49
   (घ) Jainism in Rajasthan by K.C. Jain, Page no.59
   (ङ) Jain Religion and Literature, page no.49
   (च) जिनरत्नकोश, पृ.सं. 265, 188
   (छ) जिनरत्नकोश, पृ.सं. 47
   (ज) Catalogue of Sanskrit and Prakrit Manuscripts Part I, page no.328-329
   (झ) Collected works of R.G. Bhandarkar Vol II, page no.48-49
2. गुणास्तवाङ्कोदधिपारवर्तिनो मतिः पुनस्तच्छफरीव मामकी।
   अहो महाधाष्ट्र्यमिदं यदीहते जडाशया तत् क्रमणं कदाशया।
   जैनकुमारसम्भवम् 2/50
3. क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
   तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।। रघुवंशम् 1/2
4. सुरद्रुमाद्यामुपमां स्मरन्ति यां जनाः स्तुतौ ते भुवनातिशायिनः।
   अवैमि तां न्यक्कृतिमेव वस्तुतस्तथापि भक्तिर्मुखरीकरोति माम्।।
   जैनकुमारसम्भवम् 2/52
5. ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया
   प्राज्ञं मन्यमाना हठेन पठितो मास्मिन्खलः खेलतु।
   श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय-
   त्वेतत् काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः।।
   नैषधीयचरितम् 22/152
6. सूरिः श्रीजयशेखरः कविघटाकोटीरहीरच्छविः,
   धम्मिलादिमहाकविकविताकल्लोलिनी सानुमान्।
   वाणीदत्तवरश्चिरं विजयते तेन स्वयं निर्मिते,
   सर्गो जैनकुमारसम्भवमहाकाव्येऽयमाद्योऽभवत्।।जैन.कु.कविप्रशस्तिः1

7. श्रीमदञ्चलगच्छेशजयशेखरसूरयः।
चत्वारस्तैर्महाग्रन्थाः कविशक्रैर्विनिर्मिताः।। जैन.कु.प्रशस्तिः पद-2
प्रबोधश्चोपदेशश्च चिन्तामणिकृतोत्तरौ।
कुमारसम्भवं काव्यं चरित्रं धम्मिल्लस्य च।। तथा - 3

8. जिनरत्नकोश पृ.सं.27,47,128,94,254,265,206,188, 194, 96, 422, 162, 3, 26

9. (क) Catalogue of Sanskrit and Prakrit Manuscripts Part I, page no. 74-75, 150-151, 232-233, 204-205, 198-199, 262-263, 266-267, 316-317

(ख) त्रिभुवनदीपकप्रबन्ध, प्रस्तावना पृ.सं.-4

(ग) New Catalogus Catalogorum Vol VI, page no.19

10. कुमारसम्भवम् 1/1
11. जैनकुमार. 1/1
12. कुमारसम्भवम् 7/10
13. जैनकुमार. 3/60
14. कुमारसम्भवम् 7/14
15. कुमारसम्भवम् 7/17
16. कुमारसम्भवम् 7/20
17. जैनकुमार. 3/73
18. जैनकुमार. 3/72
19. ध्वन्यालोकः 2/16 वृत्तिः
20. अलङ्कारसर्वस्वम् वृत्तिः 12
21. जैनकुमार. 1/32
22. कुमारसम्भवम् 3/54
23. जैनकुमार. 6/41
24. जैनकुमार. 4/75
25. कुमारसम्भवम् 3/67
26. जैनकुमार. 6/66
27. कुमारसम्भवम् 1/4
28. जैनकुमार. 3/15



29. कुमारसम्भवम् 1/3
30. शृङ्गारालम्बनोदारनायिकारूपवर्णनम्।
वसन्तादि तदङ्गञ्च सच्छायमुपजातिभिः।। सुवृत्ततिलकम् 3/17
31. जैनकुमार. 6/34
32. जैनकुमार. 6/38
33. कुमारसम्भवम् 1/26
34. कुमारसम्भवम् 1/31-32
35. नाट्यशास्त्रम् 6/31
36. साहित्यदर्पणः 6/317
37. जैनकुमार. 3/79
38. जैनकुमार. 4/60

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र–तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते। अ0 = अष्टाध्यायी। वा0 = वार्तिकम्

अध्वर्युक्रतुः — अध्वर्युवेदे यस्य क्रतोर्विधानं सः अध्वर्युक्रतुः।
अ. अध्वर्युक्रतुरनपुंसकम् 2.4.4

अविप्रकृष्टम् — अविप्रकृष्टं प्रत्यासन्नम्
अ. विप्रकृष्टाख्यायाम् 2.4.5

नदी — नद्यवयवो द्वन्द्वः नदी इत्युच्यते।

देशः — देशावयवश्च देशः।
अ.विशिष्टलिङ्गो नदीदेशोऽग्रामाः 2.4.7

क्षुद्रः — अपचितपरिमाणः क्षुद्रः।
अ.क्षुद्रजन्तवः 2.4.8

विरोधः — विरोधः वैरम्।

शाश्वतिकः — शाश्वतिकः नित्यः।
अ.येषां च विरोधः शाश्वतिकः 2.4.9

निरवसानम् — निरवसानं बहिष्करणम्।

निरवसिताः/ अनिरवसिताः — भुक्ति पात्रं संस्कारेणापि न शुद्ध्यति ते निरवसिताः, न निरवसिताः अनिरवसिताः।
अ.शुद्राणामनिरवसितानाम् 2.4.10

विप्रतिषिद्धम् — परस्परविरुद्धं विप्रतिषिद्धम्।
अ.विप्रतिषिद्धं चानधिकरणवाचि 2.4.13

अधिकरणम् — अधिकरणं वर्तिपदार्थः। अ.अधिकरणैतावत्त्वे च 2.4.15

एतावत्त्वम् — एतावत्त्वं परिमाणम्।
अधिकारणैतावत्त्वे च 2.4.15

उयज्ञा — उयज्ञायते इति उपज्ञा।

उपक्रमः — उपक्रम्यते इति उपक्रमः।

आचिख्यासा — आख्यातुम् इच्छा आचिख्यासा।
अ. उपज्ञोपक्रमं तदाद्याचिख्यासायाम् 2.4.21



## फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

ह. गोपबन्धु मिश्रः
सम्पादकः